श्रीः

श्रीमन्महर्षिवरयास्कीय—

निरुक्त(लघु)विवृतिः ।

पञ्चपादिका ।

सेयं

सर्वविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजमिथिलेश
श्री ५ मल्लक्ष्मीश्वरसिंहबहादुर-जी-सी-आइ-ई. महोदयानां
ज्येष्ठधर्मपत्न्याःश्री ५ मल्लक्ष्मीवतीत्यन्वर्थाख्याविभूषिताया धर्माधिकारिपदवीमनुसंदधता
मैथिलज्ञोपाख्यपण्डितवर-
श्रीमुकुन्दशर्मणा
प्रणीता परिष्कृता संशोधिता च ।

मुम्बय्यां
तुकाराम जावजी
इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये बा. रा.
घाणेकरद्वारा मुद्रयित्वा प्रकाशिता ।

संवत् १९६८, सन १९१२.

PUBLISHER.—Tukaram Javaji, } "Nirnaya-sagar" Press,
PRINTER:—B. R. Ghanekar, } 23, Kolbhat Lane, Bombay.

अथात्र निरुक्तोपोद्घातग्रन्थे आदितः सप्तपादात्मके समासतो विषयसंदर्भ उच्यते—

१. तत्रादौ नामाख्यातोपसर्गनिपातलक्षणम् ।

२. भावविकारलक्षणम् ।

३. नामान्याख्यातजानि सर्वाणि च यथोपन्यस्य पक्षप्रतिपक्षतो विचार्यावधारणम् ॥

४. सर्वाण्याख्यातजानि, कानिचिदेवानेकधातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्त्वावधारणम् ॥

५. पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनायादिमध्यान्तानेकदैवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा ॥

६. अर्थज्ञप्रशसा ॥

७. अनर्थज्ञावधीरणम् ॥

८. वेदवेदाङ्गव्यूहः ॥

९. सप्रयोजननिघण्टुसमाम्नायविरचनम् ॥

१०. प्रकरणत्रयविभागेन नैघण्टुकप्रधानदेवताभिधानप्रविभागलक्षणम् ॥

११. निर्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः ॥

१२. अर्थप्राधान्याल्लोपोपधाविकारवर्णलोपविपर्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता ॥

१३. अन्तस्थान्तर्धातुनिमित्तेन संप्रसार्यासंप्रसार्योभयप्रकृतिधातुनिर्वचनोपदेशः ॥

१४. भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः ॥

१५. नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः ॥

१६. देशव्यवस्थया शब्दरूपव्यपदेशः ॥

१७. तद्धितसमासनामनिर्वचनलक्षणम् ॥

१८. शिष्यलक्षणम् ॥

॥ इति ॥

कलिवत्सराः ५००९
शकवत्सराः २४८३
विक्रमवत्सराः १९६५
शालिवाहनवत्सराः १८३०
लक्ष्मणसेनवत्सराः ७४८
ईशवीयवत्सरास्तु १९०९

शरतर्करत्नपृथिवी–१९६५ ।
मितवैक्रमवत्सरे तपसि सुदिके ॥
करमाहावंशाम्बुधि-
चन्द्रो व्यलिखन्मुकुन्दोऽदः ॥ १ ॥
शुभं भूयात् ॥

अथ निरुक्तविवृत्युपोद्घातः ॥

अथ—सर्वकामप्राप्त्यादिर्मोक्षान्तःपुरुषार्थोवेदप्रतिपाद्यः। तत्परिज्ञानाय शिक्षा-छन्दः-कल्पो-ज्यौतिषं-व्याकरणं-निरुक्त-मिति अङ्गानि प्रवृ-

---

१ अतएवैषामपरविद्यात्वं मुण्डकोपनिषद्यथर्वणिका आमनन्ति "द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च । तत्रापरा ऋग्वेदो यजुर्वेदः

अथ निरुक्तविवृत्युपोद्घातः ॥

अथ—सर्वकामप्राप्त्यादिर्मोक्षान्तःपुरुषार्थोवेदप्रतिपाद्यः। तत्परिज्ञानाय शिक्षा-छन्दः-कल्पो-ज्यौतिषं-व्याकरणं-निरुक्त-मिति अङ्गानि प्रवृ-

---

१ अतएवैषामपरविद्यात्वं मुण्डकोपनिषद्यथर्वणिका आमनन्ति "द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च । तत्रापरा ऋग्वेदो यजुर्वेदः

न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥१॥ इति ॥ इन्द्रशत्रुर्वर्धस्वेत्यस्मिन्मन्त्रे इन्द्रस्य शत्रुर्घातक इत्यस्मिन्विवक्षितेऽर्थे तत्पुरुषसमासे "समासस्ये" (पा० ६ । १ । २२३) ति सूत्रेण तत्पुरुषत्वादन्तोदात्तेन भवितव्यम् । आद्युदात्तस्तु प्रयुक्तः । तथासति बहुव्रीहित्वा"द्वहुव्रीहौ प्रकृत्या पूर्वपद"मिति पूर्वपदप्रकृतिस्वरत्वेन इन्द्रः शत्रुर्घातको यस्येत्यर्थः संपन्नस्ततश्च वृत्र उदभूदित्याद्युपरिष्टाद्व्यक्तीभविष्यति । तस्मात्स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः ॥ १ ॥ कल्पस्त्वाश्वलायनापस्तम्बबौधायनादिसूत्रं, कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः । स यथा–इषेत्वेति छिनत्ति, ऊर्जेत्वेत्यनुमार्ष्टीत्यादि । नहि कल्पानभिज्ञः प्रयोगान्विजानीयादतः कल्पसूत्रं मन्त्रविनियोगेन

२ निरुक्तविवृत्याः ।

न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥१॥ इति ॥ इन्द्रशत्रुर्वर्धस्वेत्यस्मिन्मन्त्रे इन्द्रस्य शत्रुर्घातक इत्यस्मिन्विवक्षितेऽर्थे तत्पुरुषसमासे "समासस्ये" (पा० ६ । १ । २२३) ति सूत्रेण तत्पुरुषत्वादन्तोदात्तेन भवितव्यम् । आद्युदात्तस्तु प्रयुक्तः । तथासति बहुव्रीहित्वा"द्वहुव्रीहौ प्रकृत्या पूर्वपद"मिति पूर्वपदप्रकृतिस्वरत्वेन इन्द्रः शत्रुर्घातको यस्येत्यर्थः संपन्नस्ततश्च वृत्र उदभूदित्याद्युपरिष्टाद्व्यक्तीभविष्यति । तस्मात्स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः ॥ १ ॥ कल्पस्त्वाश्वलायनापस्तम्बबौधायनादिसूत्रं, कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः । स यथा–इषेत्वेति छिनत्ति, ऊर्जेत्वेत्यनुमार्ष्टीत्यादि । नहि कल्पानभिज्ञः प्रयोगान्विजानीयादतः कल्पसूत्रं मन्त्रविनियोगेन

स्त्र निःशेषेणोच्यन्त"इति सायणः प्राह । निश्शेषेण व्याकरणानुशिष्टेन, वर्णागमादिनिरुक्तलक्षणलक्षितेन वर्त्मना विशदीकरणेन । तथा च पाणिनिसूत्रम् । "पृषोदरादीनि यथोपदिष्टम्" (६–३–१०९) इति । अनेन हि वर्णागमादि ५ सर्वमपि संक्षेपेण विहितं तदेव निरुक्ते विशदीकृत्य प्रदर्शितम् । तथाच तत्र (पृ० सू०) महाभाष्यम्–पृषोदरादीनीत्युच्यन्ते कानि पृषोदरादीनि ? पृषोदरप्रकाराणि । कानि पुनः पृषोदरप्रकाराणि ? येषु लोपागमवर्णविकाराः श्रूयन्ते नञ्चोच्यन्ते (६ अ० ३ पा० ३ आ०) इति । ते चात्र (यास्कीये निरुक्ते) विशेषेणोच्यन्त इति निरुक्तत्वमस्यापि । यथाह हरिः—"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ॥ धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ १ ॥" इति ॥ एतन्निरुक्तलक्षणलक्षितं वेदाङ्गान्तःपात्यन्यदपि शाकपूण्यादिप्रणीतं शास्त्रं वर्तते यल्लक्षणमुपक्रमे विष्णुमित्रोक्तमुपवर्णितम् ॥ एतन्मूलकएव चतुर्दशधानिरुक्तमितिलेखो दुर्गाचार्यस्य निरुक्तव्याख्यायामृज्वर्थाख्यायां वेदाङ्गानिचे-(नि० १–६–६) त्यस्य व्याख्याने दृष्टोऽस्ति । यास्केनापि "नैरुक्तसमयः । नैरुक्ताः ।" इत्येवं तत्रतत्र प्रदर्शनेनोक्तार्थः सूचित एव ॥ एतन्मूलसूत्रभूते पञ्चाध्यायीशास्त्रसंग्रहे निघण्टुपरनामके गवादिदेवपत्न्यन्ते शब्दसमुदाये "अर्थावबोधनिरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्त"मिति सायणोक्तनिरुक्तत्वं तु

---

1. निर्वचनलक्षणसाजात्यात् । वेदाङ्गत्वमपि तथैव । नह्यन्यथाऽनादिश्रुतिचोदिते पूर्वोक्तार्थवर्णिकवाक्येऽर्वाचीनानामुल्लेख उपपद्यते । अतएव च छान्दोग्योपनिषदि श्रूयते "स वा एष आत्मा हृदि तस्य तदेव निरुक्तं हृदयमिति तस्माद्धृदयम्" (८–३–३) इति । एवं गोपथब्राह्मणेऽपि "ओंकारं पृच्छामः * * किंनिरुक्तम् ? * * आपेरोंकारः सर्वमाप्नोतीत्यर्थः (१–१–१४–३०) एवमन्यत्रापि । नह्येषां हृदयौंकारादीनां सत्यपि प्रसङ्गे निर्वचनमत्र (या० नि०) समस्ति । एवमेषां षण्णामप्यङ्गानां तत्तल्लक्षणलक्षितानां तैत्तिरीयब्राह्मणादिषु समुट्टङ्कनादनादित्वम् ।

2. एतत्समन्वयप्रकारश्च तेनैव (सायणेन ऋग्भाष्यभूमिकायां) दर्शितः । योऽयं गौरित्यादिपदानां समाम्नायः समाम्नातस्तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते–एतावन्ति पृथिवीनामधेयानि–एतावन्ति हिरण्यनामधेयानि–इत्येवं तत्र विस्पष्टमभिहितत्वात् । तदेतन्निरुक्तं त्रिकाण्डम् । तत्र–एकार्थवाचिनां पर्यायशब्दानां संघो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः प्रसिद्धः । तादृशेष्वमरसिंह–वैजयन्ती–हलायुधादिषु दशनिघण्टव इति व्यवहारात् । एवमत्रापि पर्यायशब्दसंघोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम् । तस्मिन्काण्डे त्रयोऽध्यायाः । तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि । द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि । तृतीये तदुभयद्रव्यगततनुबहुत्वह्रस्वत्वादिधर्मविषयाणि । निगमशब्दो वेदवाची यास्केन तत्रतत्रापि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात् । तस्मिन्निगम एव प्रायेण वर्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन्काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम् । पञ्चमाध्यायरूपतृतीयकाण्डस्य

तादर्थ्यात्तच्छब्दमिति न्यायेन द्रष्टव्यम् । यथाऽणादिप्रत्याहारमूलसूत्रभूते "अइउण् ऋलृक्" इत्यादिवर्णसमाम्नाये प्रत्याहारपदप्रयोगः "प्रत्याहारेऽनुबन्धान कथमग्रहणेषु न । आचारादप्रधानत्वाल्लोपश्च बलवत्तर"इति श्लोकवार्तिके कात्यायनोक्ते तन्महाभाष्ये च दर्शित इति तस्यापि प्रत्याहारत्वम् । प्रत्याह्रियन्ते संक्षिप्य बोध्यन्ते वर्णा यत्रेति तन्निर्वचनात् । प्रत्याहारे (प्रत्याहारार्थे) वर्णसमाम्नाये यान्येतान्यग्रहणानि अग्राहकाणि "अइउण् ऋलृक् एओङ् ऐऔच्" इत्येतानि चतुःसूत्राणि तेष्वनुबन्धानां णकारादीनां चतुर्णामित्संज्ञकानां वर्णानां ग्रहणं कथं नेत्येवं हि तदर्थः ॥ एतन्मूलिकैव च "एवं निघण्टवोऽपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एवेति" प्रस्थानभेदीया मधुसूदनसरस्वत्युक्तिरपि इति प्रतिभाति । एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वे ज्ञाते वैदिकमन्त्रपदानामर्थज्ञानाकाङ्क्षायां तदर्थं भगवता यास्केन "समाम्नायः समाम्नातः स व्याख्यातव्य इत्यादि त्रयोदशाध्यायात्मकं निरुक्तमारचित–"मित्यादि तदीयोपक्रमोक्तेः । तथा चैतन्मूलकमेव दुर्गाचार्यस्यापि निरुक्तप्रथमाध्यायान्ते "इति निरुक्तविवृतौ षष्ठोऽध्याय" इति प्राचीनपुस्तके लिखनं मुद्रितपुस्तकेषूपलब्धं द्रष्टव्यम् ॥ इत्थंच तस्याश्चतुर्दशसूत्र्या वेदप्रतिपादकवर्णसमुदायत्वेन वर्णसमाम्नायत्ववदस्या अपि पञ्चाध्याय्या वैदिकशब्द–(समुदायत्वेन) समाम्नायत्वं छन्दोधर्मित्वं च वक्ष्यते व्याख्यारम्भे । एवंचास्य निघण्टोर्न वेदाङ्गत्वमपि तु वेदत्वमेव । आम्नायसमाम्नायशब्दयोर्वेद एव प्रसिद्धेरिति चतुर्दशसूत्रीव्याख्यायां नागेशभट्टाः प्राहुः । तथाचास्यापिज्ञाने चतुर्वेदपारायणजन्यपुण्यफलावाप्तिर्भवतीत्यपि तत्रैव (श० शे०) द्रष्टव्यम् । अस्य (यास्कीयस्य) निरुक्तत्वं न केवलं निर्वचनलक्षणोपदेशमात्रेण । यथाच वक्ष्यति द्वितीयाध्यायारम्भे "अथ निर्वचनम्–" इत्यादि "नैकपदानि निर्ब्रूयादि–" त्यन्तेन ग्रन्थसारभूतेन संदर्भेण अपि तु भगवता कात्यायनेनाप्युक्तं भ्राजानामश्लोकग्रन्थे—"बाहुलकं प्रकृतेस्तनु-

---

दैवतत्वं विस्पष्टम् ॥ एवं पञ्चाध्यायरूपकाण्डत्रयात्मके एतस्मिन्ग्रन्थे परनिरपेक्षतया पदार्थस्योक्तत्वात् तस्य ग्रन्थस्य निरुक्तत्वम् ॥ इति ॥

1. अयंच निर्वचनप्रकारो योगार्थसंबन्धवशेन प्रत्याहारपदस्यात्र केवलयौगिकत्वमित्येतद्बोधनाय । यथा निरुक्तपदस्य निघण्टावपि सायणेन दर्शितो योगार्थसंबन्धः । निरूढिस्तु यथाप्रत्याहारपदस्य "आदिरन्त्येने–" (पा० १–३–७१) त्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्त" इति दीक्षितोक्तदिशाऽणादिष्वेव । एवं निरुक्तपदस्यापि शाकपूणियास्काधुक्ते निर्वचनलक्षणलक्षिते शास्त्रएव निरूढिरितीमौ (प्रत्याहारनिरुक्तशब्दौ) योगरूढीभवत इति तत्त्वम् ।

2. अज् गृह्यते एभिरिति करणे गृङातेः "करणाधिकरणयोश्चे" (पा० ३–३–११७) ति ल्युट् ॥

3. यास्केनापि निघण्टोर्वेदाङ्गात्पृथग्भाव एव दर्शितः (निरु० १–६–५) ॥

दृष्टेनैगमरूढिभवं हि सुसाधु ॥ नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ॥ १ ॥" इति ॥ एतद्व्याख्यानावसरे भगवान्पतञ्जलिरप्याह "नाम खल्वपि धातुजमेवमाहुर्नैरुक्ताः" (३ अ० २ पा० ३ अ०) इत्यादि । एतच्चात्रैव (नि० १-४-१) प्राधान्येन चिन्तितमस्तीत्यस्य निरुक्तत्वमाभ्यामप्यनूक्तमित्यलं पल्लवितेन । नच निर्वचनानां निर्मूलत्वं शङ्कनीयमेतद्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषांचिदुक्तत्वात् 'तदाहुतीनामाहुतित्वमिति, तमिदंनं सन्तमिन्द्रमित्याचक्षत' इति । 'यदप्रथयत्तत्पृथिव्याः पृथिवीत्वमि'ति चैवमादि । ग्रन्थकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणानि उदाहरिष्यति । केषांचिन्निर्वचनानां व्याकरणेन सिद्धावपि न सर्वेषां तेन सिद्धिरस्तीति ग्रन्थकारो (यास्को) वक्ष्यति "तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं चेति" (निरु० १-५-१) तस्माद्वेदार्थावबोधायोपयुक्तं निरुक्तम् ॥ ४ ॥ तथा छन्दोग्रन्थोऽप्युपयुज्यते छन्दोविशेषाणां तत्र तत्र विहितत्वात् । "तस्मात्सप्तचतुरुत्तराणि च्छन्दांसि प्रातरनुवाकेऽनूच्यन्त" इति ह्याष्टातं गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतानि सप्त छन्दांसि । चतुर्विंशत्यक्षरा गायत्री । ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक् ।' एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगन्तव्याः । तथा चान्यत्रापि श्रूयते "गायत्री-

उपोद्घातः । ५

दृष्टेनैगमरूढिभवं हि सुसाधु ॥ नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ॥ १ ॥" इति ॥ एतद्व्याख्यानावसरे भगवान्पतञ्जलिरप्याह "नाम खल्वपि धातुजमेवमाहुर्नैरुक्ताः" (३ अ० २ पा० ३ अ०) इत्यादि । एतच्चात्रैव (नि० १-४-१) प्राधान्येन चिन्तितमस्तीत्यस्य निरुक्तत्वमाभ्यामप्यनूक्तमित्यलं पल्लवितेन । नच निर्वचनानां निर्मूलत्वं शङ्कनीयमेतद्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषांचिदुक्तत्वात् 'तदाहुतीनामाहुतित्वमिति, तमिदंनं सन्तमिन्द्रमित्याचक्षत' इति । 'यदप्रथयत्तत्पृथिव्याः पृथिवीत्वमि'ति चैवमादि । ग्रन्थकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणानि उदाहरिष्यति । केषांचिन्निर्वचनानां व्याकरणेन सिद्धावपि न सर्वेषां तेन सिद्धिरस्तीति ग्रन्थकारो (यास्को) वक्ष्यति "तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं चेति" (निरु० १-५-१) तस्माद्वेदार्थावबोधायोपयुक्तं निरुक्तम् ॥ ४ ॥ तथा छन्दोग्रन्थोऽप्युपयुज्यते छन्दोविशेषाणां तत्र तत्र विहितत्वात् । "तस्मात्सप्तचतुरुत्तराणि च्छन्दांसि प्रातरनुवाकेऽनूच्यन्त" इति ह्याष्टातं गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतानि सप्त

स्तानि ॥ तत्र तावत्-यथावदध्ययनपरिज्ञानाय शिक्षाऽपेक्ष

ग्रन्थेऽभिहितम् "यज्ञकालार्थसिद्धय" इति । कालविशेषविधयश्च श्रूयन्ते "संवत्सरमेतद्व्रतं चरेत्[1]।" "सँव्वत्सरमुख्यं भृत्वे" त्येवंमादयः संवत्सरविधयः । "वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य" इत्याद्या ऋतुविधयः ॥ "मासिमासि सत्रपृष्ठान्युपयन्ति" मासिमास्यतिग्राह्या गृह्यन्त" इत्याद्या मासविधयः ॥ "यं कामयेत वशीयान्स्यादिति तं पूर्वपक्षे याजयेत्" इत्याद्याः पक्षविधयः ॥ "एकाष्टकायां दीक्षेरन्फल्गुनीपूर्णमासे दीक्षेरन्" इत्याद्यास्तिथिविधयः ॥ "कृत्तिकास्वग्निमादधीते-" त्याद्या नक्षत्रविधयः ॥ "प्रातर्जुहोति सायं जुहोती" त्याद्याश्च प्रातःकालादिविधयः ॥ अतः कालविशेषानवगमयितुं ज्यौतिषमुपयुज्यते ॥ एतेषांच वेदार्थोपकारिणां षण्णां ग्रन्थानां वेदाङ्गत्वं शिक्षायामप्युक्तम्—

"छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ १ ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ २ ॥"

इति । वेदाङ्गानां षट्त्वपरिसंख्यानं तु गोपथादिवचनबलादवगतम्—तथाच गोपथब्राह्मणम्—"षडङ्गविदस्तत्तथाधीमहे" (१-१-२७) इति । पातञ्जलमहाभाष्यादौ स्मर्यते च "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति[2]" (१- अ० १ पा० ३ आ०) । प्रस्थानभेदे मधुसूदनसरस्वतीभिरप्युक्तं "वेदाङ्गानि षडि"ति ॥ एवं (वेदाङ्गवत्) वेदोपाङ्गानामपि पुराणेतिहासशास्त्राणां लौकिकानां ग्रन्थविस्तररचनानां च वेदार्थज्ञानायाध्ययनोपयोगो याज्ञवल्क्येन स्मर्यते—

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ १ ॥" इति ॥

(१ अ० श्लो० ३) अन्यत्रापि स्मर्यते—

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति ॥ १ ॥" इत्यादि ॥

---

1. तै० आ० प्रथमप्रपाठके ॥

2. तै० स० ५-६-५ ॥

3. तै० ब्रा० १-१-२ ॥

4. अत्र—ज्ञेयश्चेत्युक्त्या—स्वाध्यायोऽध्येतव्य इत्यध्ययनस्याक्षरग्रहणान्तत्वेऽर्थज्ञानमविहितं स्यादिति केषांचिदुक्तिः पराहता । अत्रच निष्कारणशब्देनाध्ययनज्ञानयोः काम्यत्वं निवार्यते । तथा चार्थज्ञाने पुरुषप्रवृत्तिकरं वचनद्वयं शाखान्तरगतं निरुक्तकारो यास्क एवोदाजहार—अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च "स्थाणुरयं भारहारः किलाभूदधीत्यवेदं न विजानातियोऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति विधूतपाप्मा" ॥१ ॥

अध्ययनविधेस्तस्या अन्यतः प्राप्तत्वात् । ततश्च वेदस्याक्षर-

१ "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते"ति प्राप्तवेदाध्ययनाधिकारमुद्दिश्य "स्वाध्यायोऽध्येतव्यः । स्वाध्यायमधीयीते"त्यादि ब्राह्मणवचनैरध्ययनं गुरुमुखाद्यथावदुपदिश्यत इति ॥

'यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥२॥ इति । अस्मिन्मन्त्रद्वये योऽर्थश्च इत्यनेनैवार्थेन वेदार्थज्ञानं प्रशस्यते । इतरेणार्थत्रयेण ज्ञानराहित्यं निन्द्यते । यो वेदार्थं जानाति सोऽयमिह लोके सकलश्रेयः प्राप्नोति । तथा तेन ज्ञानेन पापक्षये सति मृतः स्वर्गं प्राप्नोति । तदेतदैहिकामुष्मिकं च ज्ञानफलं तैत्तिरीया मन्त्रोदाहरणेन तदीयतात्पर्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः—"तदेषाभ्युक्ता ये अर्वाङुत वा पुराणे वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति द्यावे अग्नि द्वितीयं तृतीयं च ह संमिति । यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे नमस्कुर्याद्बाश्लीलं कीर्तयेदेता एव देवताः प्रीणातीति" । (तै० आ० द्वि० अध्याये) वेदं विद्वान् अर्थाभिज्ञः पुरुषः सच द्विविधः । अर्वाचीनकाले समुत्पन्नश्चतुर्दशविद्यास्थानकुशलः कश्चिदुपाध्यायः । पुरातनकाले समुत्पन्नो व्यासादिश्च, तमेतमुभयविधं विद्वांसं विद्यामद—धनमद—कुलमदोपेताः पण्डितंमन्या ये पुरुषा अभितो विद्यादिषु दूषयन्ति ते सर्वेऽप्यादित्यमेव प्रथमं दूषयन्ति आदित्यापेक्षया द्वितीयमग्निं दूषयन्ति । तदुभयापेक्षया तृतीयं हंसं दूषयन्ति । हन्ति सदा गच्छतीति हंसो वायुः । अश्वादिरूपत्वं च वेदविद आम्नातम् तत्रैव । 'अग्नेर्वायोरादित्यस्य सायुज्यं गच्छती'ति ॥ न केवलमेतद्देवतात्रयं किंतु सर्वा एव देवता वेदविदि वसन्ति । ब्राह्मणान्वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्यात् । नतु तस्मिन्विद्यमानमपि दोषं कीर्तयेत् । एवंसति तत्र मन्त्रार्थभूताः सर्वा अपि देवता वेदार्थविदा स्मर्यमाणतया तदीयहृदयेऽवस्थिता अयं नमस्कर्ता तोषयति । नचैतदध्ययनस्यैव फलमिति शङ्कनीयं विद्वांसमित्याम्नातत्वात् । अन्यथा वेदमधीयानमित्याम्नायेत । तस्मात्सर्वदेवतावुद्ध्या प्राणिभिः पूज्यस्य वेदार्थविदो लोकद्वयेऽपि श्रेयःप्राप्तिरुपपद्यते । यस्तु वेदमधीयास्यार्थं न विजानाति सोऽयं पुमान्भारमेव हरति धारयति । स्थाणुरिति दृष्टान्तः । छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुशब्देनोच्यते ।

१ "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते"ति प्राप्तवेदाध्ययनाधिकारमुद्दिश्य "स्वाध्यायोऽध्येतव्यः । स्वाध्यायमधीयीते"त्यादि ब्राह्मणवचनैरध्ययनं गुरुमुखाद्यथावदुपदिश्यत इति ॥

'यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥२॥ इति । अस्मिन्मन्त्रद्वये योऽर्थश्च इत्यनेनैवार्थेन वेदार्थज्ञानं प्रशस्यते । इतरेणार्थत्रयेण ज्ञानराहित्यं निन्द्यते । यो वेदार्थं जानाति सोऽयमिह लोके सकलश्रेयः प्राप्नोति । तथा तेन ज्ञानेन पापक्षये सति मृतः स्वर्गं प्राप्नोति । तदेतदैहिकामुष्मिकं च ज्ञानफलं तैत्तिरीया मन्त्रोदाहरणेन तदीयतात्पर्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः—"तदेषाभ्युक्ता ये अर्वाङुत वा पुराणे वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति द्यावे अग्नि द्वितीयं तृतीयं च ह संमिति । यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे नमस्कुर्याद्बाश्लीलं कीर्तयेदेता एव देवताः प्रीणातीति" । (तै० आ० द्वि० अध्याये) वेदं विद्वान् अर्थाभिज्ञः पुरुषः सच द्विविधः ।

कोऽशंपादव्यवस्थालक्षणपरिज्ञाने छन्दोविचितिराद्रियते । सम्यगधीतस्य परिज्ञातच्छन्दसोऽमुष्मिन्कर्मणि विनियोग इति कल्प आद्रियते । श्रुतिचोदितकर्माङ्गभूतकालपरिज्ञानाय ज्यौतिषम् ॥ व्याकरणाद्विभक्त्यादिपरिज्ञानम् । एवं ह्याह "प्रयाजाः सविभक्तिकाः कर्तव्याः" तथाचेदं दर्शयति "संख्यादयो न विवर्धन्त"-इति । एवमादि । नच व्याकरणानभिज्ञो विभक्तीर्जानीयात् । ऊहितुं वा मन्त्रान् ॥ इतएव चानुषङ्गतो लोके लौकिकलक्षणपरिज्ञानमेवं छन्दस्येवं भाषायामिति प्रविभागो नान्तरीयकोऽनन्तरेण व्यवस्थितः । अत उक्ताध्ययनविधेरुक्तछन्दःप्रविभागस्योपलक्षितकर्माङ्गभूतकालस्योपलक्षितलक्षणस्यैतैरङ्गैर्वेदार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते । प्रधानं चेदमितरेभ्योऽङ्गेभ्यः सर्वशाखेष्वर्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानं । तदुणः शब्दः सचेतरेषु व्याकरणादिषु चिन्त्यते । कल्पे खल्वपि विनियोगश्चिन्त्यते । सच पुनरर्थोऽभिधानवशेन मन्त्राणाम् । योयमर्थमभिधानेन संस्कर्तुं समर्थो मन्त्रः स तत्र विनियुज्यते । तदुक्तम् "अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यादि"-(जै० ३-२-१) ति । तस्यैषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसंग्रहः । तन्निर्विवक्षया समारब्धमिदं समाम्नायः समाम्नात इत्यारभ्य य ऋतुः कालो जायानाम् २ इत्यन्तैर्द्वादशभिर-

८ निरुक्तविवृत्तयः ।

कोऽशंपादव्यवस्थालक्षणपरिज्ञाने छन्दोविचितिराद्रियते । सम्यगधीतस्य परिज्ञातच्छन्दसोऽमुष्मिन्कर्मणि विनियोग इति कल्प आद्रियते । श्रुतिचोदितकर्माङ्गभूतकालपरिज्ञानाय ज्यौतिषम् ॥ व्याकरणाद्विभक्त्यादिपरिज्ञानम् । एवं ह्याह "प्रयाजाः सविभक्तिकाः कर्तव्याः" तथाचेदं दर्शयति "संख्यादयो न विवर्धन्त"-इति । एवमादि । नच व्याकरणानभिज्ञो विभक्तीर्जानीयात् । ऊहितुं वा मन्त्रान् ॥ इतएव चानुषङ्गतो लोके लौकिकलक्षणपरिज्ञानमेवं छन्दस्येवं भाषायामिति प्रविभागो नान्तरीयकोऽनन्तरेण व्यवस्थितः । अत उक्ताध्ययनविधेरुक्तछन्दःप्रविभागस्योपलक्षितकर्माङ्गभूतकालस्योपलक्षितलक्षणस्यैतैरङ्गैर्वेदार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते । प्रधानं चेदमितरेभ्योऽङ्गेभ्यः सर्वशाखेष्वर्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानं । तदुणः शब्दः सचेतरेषु व्याकरणादिषु चिन्त्यते । कल्पे खल्वपि विनियोगश्चिन्त्यते । सच पुनरर्थो-

ख्यायैनैघण्टुक-नैगम-दैवतेति नामभिश्चं काण्डत्रयम् ॥ तत्र (नैघण्टुककाण्डे) आदितः सपादेन द्वितीयाध्यायेन सप्तपादात्म-

---

दशाध्याय-(पाद-)स्य निरुक्तत्वमेव (न तु परिशिष्टत्वम्) । ऊर्ध्वमार्गगतिनिरू-

उपोद्घातः । ९

ख्यायैनैघण्टुक-नैगम-दैवतेति नामभिश्चं काण्डत्रयम् ॥ तत्र (नैघण्टुककाण्डे) आदितः सपादेन द्वितीयाध्यायेन सप्तपादात्म-

---

दशाध्याय-(पाद-)स्य निरुक्तत्वमेव (न तु परिशिष्टत्वम्) । ऊर्ध्वमार्गगतिनिरू-

केन शिष्यलक्षणान्तग्रन्थसंदर्भेण विषयप्रयोजनसंबन्धाधिकारिभेदेन चतुर्विधमनुबन्धं निर्ब्रुवता तत्रभवता भगवता यास्केन मुनिनोपोद्घातोऽस्य निरुक्तशास्त्रस्य दर्शितः । सचातिगहनोऽनल्पमतिकैरपि दुर्विज्ञेयमर्मा नार्वाग्दृशां प्रतिपत्तिसौकर्याय स्यादिति कात्स्न्येन

१०　　निरुक्तविवृत्याः ।

केन शिष्यलक्षणान्तग्रन्थसंदर्भेण विषयप्रयोजनसंबन्धाधिकारिभेदेन चतुर्विधमनुबन्धं निर्ब्रुवता तत्रभवता भगवता यास्केन मुनिनोपोद्घातोऽस्य निरुक्तशास्त्रस्य दर्शितः । सचातिगहनोऽनल्पमतिकैरपि दुर्विज्ञेयमर्मा नार्वाग्दृशां प्रतिपत्तिसौकर्याय स्यादिति कात्स्न्येन

अनेन परिज्ञातनिरुक्तोपोद्घातस्य च ग्रन्थमर्मान्वाख्यानशैली सुखं परिशीलिता स्यात्तथाचोत्तरग्रन्थसंलापनं प्राचीनव्याख्याभिरपि ऋज्वर्थाख्यादिभिः सुखमेव संपत्स्यत इति न तत्र पिष्टपेषणावकाशोऽस्ति ॥ तदेतां सप्तपदिकां यास्कनिरुक्त-लघुविवृतिमधुनवत्यधि-

१ विशदव्याख्यानेन, निरुक्तसप्तपदीव्याख्या—लघुविवृति—नामकेन ॥

२ अस्यैतन्निरुक्तकर्तृत्वे ऐतिह्यम् (प्रवाद) एव गमकम् । यतो ह्येतस्य ग्रन्थस्यारम्भे मध्येऽन्ते वा न क्वचिदपि तथाप्रत्यायकं वाक्यादिकमस्ति । नास्ति च

उपोद्घातः । ११

अनेन परिज्ञातनिरुक्तोपोद्घातस्य च ग्रन्थमर्मान्वाख्यानशैली सुखं परिशीलिता स्यात्तथाचोत्तरग्रन्थसंलापनं प्राचीनव्याख्याभिरपि ऋज्वर्थाख्यादिभिः सुखमेव संपत्स्यत इति न तत्र पिष्टपेषणावकाशोऽस्ति ॥ तदेतां सप्तपदिकां यास्कनिरुक्त-लघुविवृतिमधुनवत्यधि-

१ विशदव्याख्यानेन, निरुक्तसप्तपदीव्याख्या—लघुविवृति—नामकेन ॥

२ अस्यैतन्निरुक्तकर्तृत्वे ऐतिह्यम् (प्रवाद) एव गमकम् । यतो ह्येतस्य ग्रन्थस्यारम्भे मध्येऽन्ते वा न क्वचिदपि तथाप्रत्यायकं वाक्यादिकमस्ति । नास्ति च

काष्टादशशततमे क्रीष्टशकेऽधिवारणावते वेदोद्धीविनीसमाख्यसंस्कृतपाठशालां प्रधानाध्यापकतयाधितिष्ठद्भिरस्माभिर्निर्मातुं कृतसंविदामप्यन्तरायतिरस्कृतैर्नापारि पूरयितुम् ।

सकाः प्राहुः । अतएव चैषामार्षत्वमिति प्रथमम् ॥ १ ॥ पूर्वं मन्त्रा विप्रकीर्णा एव स्थितास्ततो ग्रन्थीभूतानामतिमहद्रूपाणामेषामध्ययनाध्यापनतः शाखाः समुद्भूताः । ततः सर्वशाखागतानां नैघण्टुकादिपदानां सुखबोधार्थं निघण्टुनामको ग्रन्थः समाम्नातः । ततस्तन्मात्रेण मन्त्रार्थज्ञानेऽकृतकृत्यतां संलक्ष्य मन्त्रभागीयदुरवबोधपदादीनां तात्पर्यादिवेदनाय ब्राह्मणग्रन्थाः समाम्नाताः । ततउत्तरं ब्राह्मणग्रन्थैरपि मन्त्रार्थबोधो न पर्याप्त इति निरुक्तादीन्यङ्गानि समाम्नातानीति द्वितीयम् ॥ २ ॥ यथाचेह मन्त्राणां पृथक्श्रुतेर्वेदशब्देन मन्त्रातिरिक्तानां ब्राह्मणानां बोध उपलभ्यते तथैव

१२ निरुक्तविवृत्याः ।

काष्टादशशततमे क्रीष्टशकेऽधिवारणावते वेदोद्धीविनीसमाख्यसंस्कृतपाठशालां प्रधानाध्यापकतयाधितिष्ठद्भिरस्माभिर्निर्मातुं कृतसंविदामप्यन्तरायतिरस्कृतैर्नापारि पूरयितुम् ।

सकाः प्राहुः । अतएव चैषामार्षत्वमिति प्रथमम् ॥ १ ॥ पूर्वं मन्त्रा विप्रकीर्णा एव स्थितास्ततो ग्रन्थीभूतानामतिमहद्रूपाणामेषामध्ययनाध्यापनतः शाखाः समुद्भूताः । ततः सर्वशाखागतानां नैघण्टुकादिपदानां सुखबोधार्थं निघण्टुनामको ग्रन्थः समाम्नातः । ततस्तन्मात्रेण मन्त्रार्थज्ञानेऽकृतकृत्यतां संलक्ष्य मन्त्रभागीयदुरवबोधपदादीनां तात्पर्यादिवेदनाय ब्राह्मणग्रन्थाः समाम्नाताः । ततउत्तरं ब्राह्मणग्रन्थैरपि मन्त्रार्थबोधो न पर्याप्त इति निरुक्तादीन्यङ्गानि समाम्नातानीति द्वितीयम् ॥ २ ॥ यथाचेह मन्त्राणां पृथक्श्रुतेर्वेदशब्देन मन्त्रातिरिक्तानां ब्राह्मणानां बोध उपलभ्यते तथैव

देवदेवानां सदा समरविजयिनां (जी, सी, आइ, ई) पदविभूषितानां ज्येष्ठधर्मपत्न्या लक्ष्मीमूर्त्याः संतीसाविन्त्रीस्वभावाया महानुभावायाः

कलियुगम्" । अंश ४ अ० २४ श्लो० ३५–४०) इति विष्णुपुराणोक्त्या, "विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवंगतः । तदाविशत्कलिर्लोकं पापे यद्रमते जनः (स्कं० १२ अ० २ श्लो० २९)" इति श्रीमद्भागवतोक्त्या च भारतयुद्धादनन्तरं कलिप्रवृत्तिरिति । केचित्तु "आसन्मघासु मुनयः शासति राज्यं युधिष्ठिरे नृपतौ । षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्चे"तिवाराहीसंहितावचनेन कलेस्त्रिपञ्चाशदधिक-

१४ निरुक्तविवृत्याः ।

देवदेवानां सदा समरविजयिनां (जी, सी, आइ, ई) पदविभूषितानां ज्येष्ठधर्मपत्न्या लक्ष्मीमूर्त्याः संतीसाविन्त्रीस्वभावाया महानुभावायाः

कलियुगम्" । अंश ४ अ० २४ श्लो० ३५–४०) इति विष्णुपुराणोक्त्या, "विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवंगतः । तदाविशत्कलिर्लोकं पापे यद्रमते जनः (स्कं० १२ अ० २ श्लो० २९)" इति श्रीमद्भागवतोक्त्या च भारतयुद्धादनन्तरं कलिप्रवृत्तिरिति । केचित्तु "आसन्मघासु मुनयः शासति राज्यं युधिष्ठिरे नृपतौ । षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्चे"तिवाराहीसंहितावचनेन कलेस्त्रिपञ्चाशदधिक-

सद्धर्मबद्धादरायाः श्रीऽमल्लक्ष्मीवतीत्यन्वर्थाख्याविभूषिताया धर्मा-

वेदयुगाम्बरगुणै–(३०४४)र्मितः कलिसमयो भवतीति सुव्यक्तमुक्तं भवति । यथा-हुर्ज्योतिर्विदाभरणकृतः कालिदासमिश्राः । "वर्षे सिन्धुरदर्शनाम्बरगुणै (३०६८) र्यांते कलेः संमिते मासे माधवसंज्ञके च विहितो ग्रन्थक्रियोपक्रमः । (अ० २२ श्लो० २१) इति ॥" तैर्हि विक्रमराज्याच्चतुर्विंशतितमे वर्षे उक्तग्रन्थः प्राणायि ।

उपोद्घातः । १५

सद्धर्मबद्धादरायाः श्रीऽमल्लक्ष्मीवतीत्यन्वर्थाख्याविभूषिताया धर्मा-

वेदयुगाम्बरगुणै–(३०४४)र्मितः कलिसमयो भवतीति सुव्यक्तमुक्तं भवति । यथा-हुर्ज्योतिर्विदाभरणकृतः कालिदासमिश्राः । "वर्षे सिन्धुरदर्शनाम्बरगुणै (३०६८) र्यांते कलेः संमिते मासे माधवसंज्ञके च विहितो ग्रन्थक्रियोपक्रमः । (अ० २२ श्लो० २१) इति ॥" तैर्हि विक्रमराज्याच्चतुर्विंशतितमे वर्षे उक्तग्रन्थः प्राणायि ।

अ० २४ श्लो० ३२) इति ॥ एतच्चाश्विन्यां सप्तर्षिचारे कलिप्रवृत्त्यभ्युपगम एव संगच्छते । एतदुत्तरं हि सप्तर्षीणां चेत्यादि पूर्वोक्तवचनं मघासुसप्तर्षिचारे परीक्षितस्थितिबोधकं, "प्रयास्यन्ति यदा चैते पूर्वाषाढां महर्षयः । तदा नन्दा-त्प्रभृत्येष कलिर्वृद्धिं गमिष्यती"ति च नन्दस्थितिबोधकम् ॥ यत्तु दिग्भ्रमेणेति

१६ निवृत्तविवृत्तयः ।

अ० २४ श्लो० ३२) इति ॥ एतच्चाश्विन्यां सप्तर्षिचारे कलिप्रवृत्त्यभ्युपगम एव संगच्छते । एतदुत्तरं हि सप्तर्षीणां चेत्यादि पूर्वोक्तवचनं मघासुसप्तर्षिचारे परीक्षितस्थितिबोधकं, "प्रयास्यन्ति यदा चैते पूर्वाषाढां महर्षयः । तदा नन्दा-त्प्रभृत्येष कलिर्वृद्धिं गमिष्यती"ति च नन्दस्थितिबोधकम् ॥ यत्तु दिग्भ्रमेणेति

उपोद्घातः । १७

श्रीमान्गोकुलपालनार्चिततरश्रीः सत्यभामाहृतः
सद्वृन्दावनकौतुकी द्विजपतिप्रीतिं समुद्दीपयन्।

यत्पूर्वमेव प्रवृत्तोऽपि कलिर्भगवन्महिम्ना प्रतिरुद्धप्रसरस्तद्गमनप्रतीक्ष एवासीदिति

१८ निरुक्तविवृत्याः ।

श्रीमान्गोकुलपालनार्चिततरश्रीः सत्यभामाहृतः
सद्वृन्दावनकौतुकी द्विजपतिप्रीतिं समुद्दीपयन्।

यत्पूर्वमेव प्रवृत्तोऽपि कलिर्भगवन्महिम्ना प्रतिरुद्धप्रसरस्तद्गमनप्रतीक्ष एवासीदिति

धुन्वञ्जिह्मगचित्तमञ्जितबलो वंशं वहन्नुज्ज्वलम्
कुर्वन्नर्जुनकीर्तिमुद्धृतधरो लक्ष्मीश्वरोऽराजत ॥ १ ॥

उपोद्घातः । १९

धुन्वञ्जिह्मगचित्तमञ्जितबलो वंशं वहन्नुज्ज्वलम्
कुर्वन्नर्जुनकीर्तिमुद्धृतधरो लक्ष्मीश्वरोऽराजत ॥ १ ॥

नेन प्रदर्शयिष्यतेऽपि ॥ तदत्रास्मादृशालपज्ञजनसुलभेन मतिदोषेण
जनितानि स्खलितानि सुविमृश्य प्रबोधयन्तु विचक्षणवरा येन

२०　　निरुक्तविवृत्याः ।

नेन प्रदर्शयिष्यतेऽपि ॥ तदत्रास्मादृशालपज्ञजनसुलभेन मतिदोषेण
जनितानि स्खलितानि सुविमृश्य प्रबोधयन्तु विचक्षणवरा येन

निरुक्तम् ।

सप्तपादी ।

हरिः ॐ॥ समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति च्छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्नि-घण्टव उच्यन्त इत्यौपमन्यवोऽपि वाहननादेव स्युः समाहृता भवन्ति

निरुक्तम् ।

सप्तपादी ।

हरिः ॐ॥ समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति च्छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्नि-घण्टव उच्यन्त इत्यौपमन्यवोऽपि वाहननादेव स्युः समाहृता भवन्ति

टायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः प-
दार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थ-

२ निरुक्तम् । [अ० १ कं. ५

टायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः प-
दार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थ-

हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विद्याप्रकर्षे एवं किलेत्यथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवं मेति प्रतिषेधे माकार्षीर्माहार्षीरिति च खल्विति च खलुकृत्वा खलुकृतमथापि पदपूरण एवं खलु तद्बभूवेति शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयं पृष्टे नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार स इन्द्र एत्य परिदेवयांचक्रे (४) ॥ ५ ॥ * इति प्रथमाध्यायस्य द्वितीयः पादः ॥ * ॥ २ ॥

न नूनमस्तिनो श्वः कस्तद्वेद यदद्भुतम् । अन्यस्यचित्तमभिसंचरेण्यमुताधीतं विनश्यति ॥ न नूनमस्त्यद्यतनं नो एव श्वस्तनमद्यास्मि-

अ० १ कं. ७] सप्तपादी । ३

हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विद्याप्रकर्षे एवं किलेत्यथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवं मेति प्रतिषेधे माकार्षीर्माहार्षीरिति च खल्विति च खलुकृत्वा खलुकृतमथापि पदपूरण एवं खलु तद्बभूवेति शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयं पृष्टे नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार स इन्द्र एत्य परिदेवयांचक्रे (४) ॥ ५ ॥ * इति प्रथमाध्यायस्य द्वितीयः पादः ॥ * ॥ २ ॥

न नूनमस्तिनो श्वः कस्तद्वेद यदद्भुतम् । अन्यस्यचित्तमभिसंचरेण्यमुताधीतं विनश्यति ॥ न नूनमस्त्यद्यतनं नो एव श्वस्तनमद्यास्मि-

च व्यवृणोत्सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि वा सिमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणं सीम्नः सीमतः सीमान्तो मर्यादान्त· सीमा मर्यादा विसीव्यति क्षेत्रादिति न्न वृति

४ निरुक्तम् । [अ० १ कं. ९

च व्यवृणोत्सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि वा सिमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणं सीम्नः सीमतः सीमान्तो मर्यादान्त· सीमा मर्यादा विसीव्यति क्षेत्रादिति न्न वृति

निष्ट्वत्कासश्चिदिन्नरो भूरि तोका वृकादिव । बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनायकम् ॥ शिशिरं जीवनाय शिशिरं शृणातेः शम्नातेर्वा । एमेनं सृजता सुते । आसृजतैनं सुते । तमिद्वर्धन्तु नो गिरः ॥ तं वर्धयन्तु नो गिरः स्तुतयो गिरो गृणातेः । अयमु ते समतसि । अयं ते समतसीवोऽपि दृश्यते (५) सुविदुरिव सुविज्ञायेते इवाथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये ॥ १० ॥

हुविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् । शची-

अ० १ कं. १३] सप्तपादी । ५

निष्ट्वत्कासश्चिदिन्नरो भूरि तोका वृकादिव । बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनायकम् ॥ शिशिरं जीवनाय शिशिरं शृणातेः शम्नातेर्वा । एमेनं सृजता सुते । आसृजतैनं सुते । तमिद्वर्धन्तु नो गिरः ॥ तं वर्धयन्तु नो गिरः स्तुतयो गिरो गृणातेः । अयमु ते समतसि । अयं ते समतसीवोऽपि दृश्यते (५) सुविदुरिव सुविज्ञायेते इवाथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये ॥ १० ॥

हुविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् । शची-

त्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति तदे-
तन्नोपपद्यते (२) ॥ १३ ॥

६ निरुक्तम् । [अ० १ कं. १५

त्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति तदे-
तन्नोपपद्यते (२) ॥ १३ ॥

क्षमिति तदुपरिष्टाद्व्याख्यास्यामोऽथाप्यविस्पष्टार्थो भवन्त्यम्यग्याद्दृ-
श्मिन्जारयायि काणुकेति ॥ १५ ॥

अर्थवन्तः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म
क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणं (१) क्रीळन्तौ पुत्रैर्नप्तृभिरिति
यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्ये-
तद्यथेन्द्राग्नी पितापुत्राविति यथोएतद्ब्राह्मणेन रूपसंपन्ना विधीयन्त
इत्यदितानवादः स भवति यथो एतदनाम्नार्थं भवन्ती

अ० १ कं. १८] सप्तपादी । ७

क्षमिति तदुपरिष्टाद्व्याख्यास्यामोऽथाप्यविस्पष्टार्थो भवन्त्यम्यग्याद्दृ-
श्मिन्जारयायि काणुकेति ॥ १५ ॥

अर्थवन्तः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म
क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणं (१) क्रीळन्तौ पुत्रैर्नप्तृभिरिति
यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्ये-
तद्यथेन्द्राग्नी पितापुत्राविति यथोएतद्ब्राह्मणेन रूपसंपन्ना विधीयन्त
इत्यदितानवादः स भवति यथो एतदनाम्नार्थं भवन्ती

निगदेनैव शब्द्यते । अनग्निरिव शुष्कैधो न तज्ज्वलति कर्हिचित् । स्थाणुस्तिष्ठतेरर्थोऽर्तेररणस्थो वा (२) ॥ १८ ॥

निरुक्तम् । [अ० १ कं. २०

निगदेनैव शब्द्यते । अनग्निरिव शुष्कैधो न तज्ज्वलति कर्हिचित् । स्थाणुस्तिष्ठतेरर्थोऽर्तेररणस्थो वा (२) ॥ १८ ॥

अ० २ कं. २] सप्तपादी । ९

थापि नैगमेभ्यो भाषिका उष्णं घृतमित्यथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु (३) शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते कम्बोजाः कम्बलभोजाः कमनीयभोजा वा कम्बलः कमनीयो भवति विकारमस्यार्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येष्वेवमेकपदानि निर्ब्रूयादथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयाद्दण्ड्यः पुरुषो (दण्डपुरुषो) दण्डमर्हतीति वा दण्डेन संपद्यत इति वा दण्डो ददतेर्धारयतिकर्मणोऽक्रूरो ददते मणिमित्यभिभाषन्ते दमनादित्यौपमन्यवो दण्डमस्याकर्षतेति गर्हायां (४) कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः क्स इति नामकरणः ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन्ख्यानमिति कषतेर्वा तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामान्यादश्वस्य ॥ २ ॥

१०　　निरुक्तम्।　　[अ० २ कं. ४

थापि नैगमेभ्यो भाषिका उष्णं घृतमित्यथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु (३) शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते कम्बोजाः कम्बलभोजाः कमनीयभोजा वा कम्बलः कमनीयो भवति विकारमस्यार्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येष्वेवमेकपदानि निर्ब्रूयादथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयाद्दण्ड्यः पुरुषो (दण्डपुरुषो) दण्डमर्हतीति वा दण्डेन संपद्यत इति वा दण्डो ददतेर्धारयतिकर्मणोऽक्रूरो ददते मणिमित्यभिभाषन्ते दमनादित्यौपमन्यवो दण्डमस्याकर्षतेति गर्हायां (४) कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः क्स इति नामकरणः ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन्ख्यानमिति कषतेर्वा तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामा-

विप्रा वाचा मनसा कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्। यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्। यस्तेन प्रुष्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्म-(न्निधिपाय ब्रह्म)न्निति निधिः शेवधिरिति (७) ॥ ४ ॥ * ॥ इति द्वितीयाध्यायस्य प्रथमः पादः ॥ * ॥ १ ॥ शुभमस्तु ॥



निरुक्तविवृतिः ।



प्रथमोऽध्यायः ।

श्रीमदाद्यापदाम्भोजद्वन्द्वं वन्देऽर्थसिद्धये ।
निरुक्तविवृतिं लघ्वीं ब्रुवे दुर्गमतं यथा ॥ १ ॥
श्रीमदाचार्यदुर्गोक्तिर्दुर्गमा विदुषामपि ।
इति व्युत्पित्समानानां प्रवृत्त्यै यतवानहम् ॥ २ ॥
दृष्ट्वैनां दुर्गवक्रोक्तिः स्फुटं विज्ञास्यते यथा ।
इति क्वचिद्विस्तरं मे क्षंस्यन्ति गुणगृध्नवः ॥ ३ ॥

निरुक्तविवृतिः ।



प्रथमोऽध्यायः ।

श्रीमदाद्यापदाम्भोजद्वन्द्वं वन्देऽर्थसिद्धये ।
निरुक्तविवृतिं लघ्वीं ब्रुवे दुर्गमतं यथा ॥ १ ॥
श्रीमदाचार्यदुर्गोक्तिर्दुर्गमा विदुषामपि ।
इति व्युत्पित्समानानां प्रवृत्त्यै यतवानहम् ॥ २ ॥
दृष्ट्वैनां दुर्गवक्रोक्तिः स्फुटं विज्ञास्यते यथा ।
इति क्वचिद्विस्तरं मे क्षंस्यन्ति गुणगृध्नवः ॥ ३ ॥

प्रतिजानीते । **समाम्नायः समाम्नातः स व्याख्यातव्य इति । अथास्य** व्याख्यानम् ॥

णं शिष्टाचारानुमितश्रुतिसंमतं तदत्र यास्कमुनिः किमिति नानुष्ठितवानिति चेन्न ।

२ निरुक्तविवृतिः ।

प्रतिजानीते । **समाम्नायः समाम्नातः स व्याख्यातव्य इति । अथास्य** व्याख्यानम् ॥

णं शिष्टाचारानुमितश्रुतिसंमतं तदत्र यास्कमुनिः किमिति नानुष्ठितवानिति चेन्न ।

तत्र तावत्सप्तदशावान्तरखण्डवाक्यात्मके प्रथमखण्डसूत्रे—

प्रथमोऽध्यायः । ३

तत्र तावत्सप्तदशावान्तरखण्डवाक्यात्मके प्रथमखण्डसूत्रे—

४ निरुक्तविवृतिः ।

पायस्तस्मात्परोक्षवृत्तितामापाद्य प्रत्यक्षवृत्तिना शब्देन निर्वक्तव्याः–तद्यथा "निघण्टव" इत्यतिपरोक्षवृत्तिः, "निगन्तव" इति परोक्षवृत्तिः, "निगमयितार" इति प्रत्यक्षवृत्तिः । यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यन्ते । एवमन्यत्राप्यूह्यम् ॥ तमेव निघण्टुशब्दमन्यथा निर्वक्ति—

अपिवा हननादेव स्युः समाहता भवन्ति ॥ ८ ॥

प्रथमोऽध्यायः । ५

पायस्तस्मात्परोक्षवृत्तितामापाद्य प्रत्यक्षवृत्तिना शब्देन निर्वक्तव्याः–तद्यथा "निघण्टव" इत्यतिपरोक्षवृत्तिः, "निगन्तव" इति परोक्षवृत्तिः, "निगमयितार" इति प्रत्यक्षवृत्तिः । यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यन्ते । एवमन्यत्राप्यूह्यम् ॥ तमेव निघण्टुशब्दमन्यथा निर्वक्ति—

अपिवा हननादेव स्युः समाहता भवन्ति ॥ ८ ॥

चत्वारि पदजातानि या एताश्चतस्रः पदजातयः । पदसामान्यानि (पदगणाः) जातिर्जातं च सामान्यमित्यमरः । लोके वेदे चेति शेषः । तद्भेदान्याह **नामाख्यातेचोपसर्गनिपाताश्चेति, तानीमानि** निघण्टुसंज्ञकानि **भवन्ति** । इमानि चत्वार्येव पदजातानि सन्त्यस्मिञ्छास्त्रे इत्यर्थः ।

६ निरुक्तविवृतिः ।

चत्वारि पदजातानि या एताश्चतस्रः पदजातयः । पदसामान्यानि (पदगणाः) जातिर्जातं च सामान्यमित्यमरः । लोके वेदे चेति शेषः । तद्भेदान्याह **नामाख्यातेचोपसर्गनिपाताश्चेति, तानीमानि** निघण्टुसंज्ञकानि **भवन्ति** । इमानि चत्वार्येव पदजातानि सन्त्यस्मिञ्छास्त्रे इत्यर्थः ।

प्रथमोऽध्यायः । ७

नम् । किंपुनस्तत् **आख्यातम्** आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि अनेनेत्याख्यातम् (तिङन्तम्) आङ्पूर्वकाद्व्यक्तवागर्थकाच्चक्षिङो बाहुलकात्करणे क्तः । चक्षिङः ख्याञ् (२–४–५४) सामान्ये नपुंसकम् । तत्पुनरेतच्चतुर्विधं भवति । कर्तरि भावे कर्मणि कर्मकर्तरि चेति । तत्र पचतिदेवदत्त इति कर्तरि । भूयते देवदत्तेनेति भावे । पच्यते ओदनो देवदत्तेनेति कर्मणि । पच्यते ओदनः स्वयमेवेति कर्मकर्तरि । चतुर्ष्वप्यवयवार्थानि द्रव्याणि अप्रधानानि क्रियैव प्रधानम् ॥ इत्थं नाम्नामाख्यातजत्वात्प्रतिज्ञाक्रमं भित्वा पूर्वमाख्यातलक्षणमुक्तम् ।

इदानीं नाम्नां लक्षणमुच्यते **सत्वप्रधाना**नीति । सीदति गच्छति (अन्वेति) लिङ्गसंख्यादिकमस्मिन्निति सत्वं (द्रव्यम्) षदॢ विशरणगत्यवसादनेष्वित्यस्मादधिकरणे औणादिकस्त्वन्प्रत्ययः । तद्येषु प्रधानं गुणभूता च क्रिया तानीमानि सत्वप्रधानि । कानि पुनस्तानि नामानि । नमन्त्याख्यातशब्दे गुणभावेन नम-(य–)न्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि । णम् प्रह्वत्वे इत्यस्य शुद्धस्यान्तर्भावितण्यर्थस्य वा "नामन्सीमन्नि"–त्यादिनौणादिको निपातः । सामान्ये नपुंसकम् । यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि विद्यमानापि क्रिया अविवक्षिता, द्रव्यपरत्वात्सत्वशब्दस्य[1] तद्विक्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थोऽसौ व्यावर्तते । स्त्रीपुंनपुंसकभेदं–निपातोपसर्गाणामपि वा

---

१. कृत्यल्युटो बहुलम् (३–३–११३) इत्यत्र बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थं तेन कर्तर्यपि विहितः ण्वुल्तृचौ (३–१–१३३) इति ण्वुल् पादाभ्यां ह्रियत इति पादहारक इत्यत्र कर्मणि भवति, यथा वा भावकर्मणोर्विहितोऽपि तव्यत्तव्यानीयरः (३–१–९६) इत्यनीयर् स्नानीयं चूर्णं दानीयो विप्र इत्यत्र करणे संप्रदाने च क्रमेण भवति ।

२. यद्यपि पाको नाम विक्लित्तिरवयवशैथिल्यादि स च न ओदनस्य क्रियते किंतु तण्डुलस्यैव तथापि सूत्रशाटकवद्भाविसंज्ञया निर्देशः पाकेन निष्पाद्यत इत्यर्थः ॥

३. तथाचोक्तम्–शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते ।
तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥ १ ॥ इति ॥
अन्यच्च–अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः ॥
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥ १ ॥
निर्देशः कर्मकरणं प्रदानमपकर्षणम् ।
स्वाम्यर्थश्चाधिकरणं विभक्त्यर्थाः प्रकीर्तिताः ॥ २ ॥ इति ॥
अत्र चकारः संबन्धान्तरं कर्तृकर्मणी च समुच्चिनोति । सर्वेषामेषां षष्ठ्यर्थत्वात् ॥

४. अतएव–कृत्तद्धितसमासाश्चेति (१–२–४६) सूत्रे चेति सार्थकम् । अनर्थका अपि निपाता भवन्तीति ॥

1 यथास्य सूत्रस्य शाटकं वयेत्युक्ते यदा वातव्यस्तदा न शाटको यदा शाटकस्तदा न वातव्य इति मन्ये स वातव्यः यस्योतस्य शाटक इत्येषा संज्ञा भविष्यति । एवमिह स पक्तव्यो यस्य पक्वस्यौदन इत्येषा संज्ञा भविष्यति ॥

कंचिन्नामत्वमपेक्ष्य बहुवचननिर्देशो नामानीति । एकेत्वाहुः । भाव–काल–कारक–संख्याश्चत्वारोऽर्था आख्यातस्य । तेषां मध्ये भावस्य प्रधानता भवति । अतो भावप्रधानमाख्यातमित्युक्तम् । नाम्नोऽपि सत्त्व–द्रव्य–संख्या–लिङ्गमित्येते चत्वारोऽर्थास्तेषां मध्ये सत्त्वं प्रधानमित्यतः सत्वप्रधानानि नामानीत्युक्तमिति ।

एवंतावदनयोर्नामाख्यातयोः परस्परविनाभूतयोः स्वपदार्थोक्तावेकस्य भावप्राधान्यमपरस्य च सत्वप्राधान्यमिति स्थितम् ।

अथानयोर्गुणप्रधानभावविषये शङ्कासमाधी युगपदेकवाक्येनाचष्टे—

तद्यत्रोभे, भावप्रधाने, भवतः ॥ १३ ॥

तत्–अथ पुनः **यत्र**–यस्मिन्वाक्ये एते (नामाख्याते) **उभे भवत** (इत्युभयोः शेषः) तत्र कस्य प्रधानमर्थः कस्य च गुणभूत इत्याशङ्कायां समाधिमाह– **भावप्रधाने भवतः** । भावः प्रधानं ययोस्ते भावप्रधाने । अयमर्थः । वाक्ये ह्याख्यातं प्रधानं तस्य चिकीर्षितत्वात् । तदर्थत्वाच्च गुणभूतं नामेतीदमाख्यातमेव वाक्ये प्रधानमिति ॥

अथ पुनः कथमभिनिर्वर्त्यमानो भाव आख्यातेनोच्यते किंवा तदाख्यातमित्यपेक्षायां शब्दार्थसंबन्धस्य लोकप्रसिद्धत्वाल्लोकप्रसिद्धैवोदाहरति—

पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम् ॥ १४ ॥

अपूर्वमनपरं सन्तमेकत्वात्**पूर्वापरीभूतं** पूर्वापरमिव पौर्वापर्येणावस्थितम् । अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विरिति (५–४–५०) च्विः । अस्य च्वाविति (७–४–३२) ईत्वम् एकमनेकासु क्रियासु (उपानदधिनहन–पूर्वोत्तरपदविहरण–पथिभोजन–शयनाऽसनोदकपानाद्यासु) आश्रितं तदभिनिर्वृत्तिवशेनाभिनिर्वर्तमानं

---

१. सत्त्वं सत्तेत्यनर्थान्तरम् । तदिह स्वार्थ इत्यप्युच्यते । सच प्रवृत्तिनिमित्तम् । यदर्थज्ञानाच्छब्दत्प्रवृत्तिस्तत्प्रवृत्तिनिमित्तम् । यथा सास्नादिमत्वं गोः । तदेव च गवि गोत्वम् । वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वं प्रवृत्तिनिमित्तत्वमिति नव्याः । तदाश्रयो द्रव्यम् ॥

२. अवरोहणक्रमेणोत्तरस्य पूर्वमभिधानमत्र ॥

३. अव्ययानां नानार्थत्वात्तदित्यव्ययमथ पुनरित्येतस्मिन्नर्थे वर्तते ॥

४. यथा अष्टन आ विभक्तौ (७–२–८४) रायो हली–(७–२–८५) त्यत्र हलीत्युभयोः शेष इत्युक्तं महाभाष्यादौ ।

५. भावः साध्यावस्थापन्नो धात्वर्थः आख्यातवाच्यः । वाच्यवाचकयोश्चाभेदारोपादाख्यातशब्देनात्र सर्वत्र भाव एवोच्यते इति ध्येयम् । व्यक्तीभविष्यति चैतदुपरिष्टात् ।

६. तदर्थस्य भावनिष्पत्तावङ्गत्वात् ॥

७. किमिति प्रश्ने । भावसामान्यस्वरूपविषयकोऽयं प्रश्नः ॥

भावं किंकरोतीति पृच्छते कस्मैचिदन्य **आचष्टे व्रजतीत्याख्यातेन** । एवं **पचतीत्यत्रापि** बोध्यम् ॥

उपक्रमप्रभृतीति । उपक्रमः आरम्भस्तस्मादारभ्यापवर्गपर्यन्तमन्तिमक्रियावसानमित्यर्थः । एतच्च भावविशेषणमेतदर्थश्चोक्त[1] एव । एवमनेकक्रियाभिर्निर्वर्त्यमानो भाव आख्यातेनोच्यत इति सिद्धम् ॥ तथाचोक्तम्—

क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव ।
क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः ॥ १ ॥ इति ॥

इत्थं भावसामान्यस्वरूपमभिधाय भावविशेषस्वरूपं निर्विवक्षन्पूर्वोक्तभावलक्षणस्य पुंयोगमपेक्ष्य क्वचिदपवादमाह—

मूर्तं सत्वभूतं सत्वनामभिः ॥ १५ ॥

कदाचित्तु तमेव भावं तथैवोपक्रमप्रभृत्यपवर्गपर्यन्तमभिनिर्वर्तमानं **मूर्तं** किमपि रूपान्तरतामापन्नं **सत्वभूतं** सत्वरूपिणं[2] **सत्वनामभिर्लिङ्गसंख्यायुक्तैः** शब्दैराचष्टे इत्यनुवर्तमानमत्रापि द्रष्टव्यम् । कथमिति तदुदाहरणमाह—

व्रज्यापक्तिरिति ॥ १६ ॥

तथाचोक्तमभियुक्तैर्महाभाष्यकृदादिभिः "कृदभिहितो भावो द्रव्यवत्प्रकाशत" इति ।

अन्यत्रापि—

क्रियाभिनिर्वृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात् ।
संख्याविभक्तिव्ययलिङ्गयुक्तः[3] भावं तदा द्रव्यमिवोपलक्ष्ये ॥ १ ॥ इति ॥

व्ययो विकारः । तत्कृतो भेद इति यावत्तेन लिङ्गेन च युक्तमिति समुदितार्थः । एतच्च शब्दशक्तिस्वाभाव्यादित्यवगन्तव्यम् ॥

इत्थं (सत्वभूत) भावविशेषस्वरूपं सोदाहरणमभिधाय सत्वसामान्यस्वरूपमुदाहरणेनैवोपदिशति—

अद इति सत्वानामुपदेशः ॥ १७ ॥ इति ॥ १ ॥

सामान्यत इति शेषः । समान्यतः (सामान्येन रूपेण) सत्वानां द्रव्याणामुपदेशोऽद **इति** । उपलक्षणमेतदन्येषामपि लिङ्गसामान्यवचनानां**मिति** व्याख्यात**मादिमं खण्डसूत्रम् ॥**

---

१. अधिश्रयणाद्यधःश्रयणपर्यन्तः क्रियाकलापः पचतिना विक्लित्त्यनुकूलत्वेनैकरूपेणैवोच्यते । अविभक्तकर्तृकमिदं द्वितीयमुदाहरणमित्युदाहरणद्वयमत्र भावद्वयोपदर्शनायेति बोध्यम् ॥

२. उपानदधिहननेत्यादिना ॥

३. सत्त्वमिति भावप्रधाननिर्देशेन सत्त्व–(द्रव्य–) त्वं प्राप्तमित्यर्थः । अस्य साधनमुक्तं प्राक् (६-पृ०) ॥

४. युक्तो भाव इति मुद्रितपुस्तकेऽपपाठः ॥

तदेवं सत्वसामान्यस्वरूपमुपदिश्य तद्विशेषस्वरूपमुपदिशति—

गौरश्वः पुरुषो हस्तीति ॥ १ ॥

सत्वानामिति पूर्वस्मात्खण्डसूत्रान्तवाक्यादनुवर्तते । **विशेषोपदेश इति** शेषः । सोपाधिकनिरुपाधिकोपप्रदर्शनार्थमनेकोदाहरणम् । **इति**शब्द आद्यर्थः । ज्वलितिकसन्तेभ्यः (३–१–१४०) इत्यत्र यथा ॥

इत्थं सत्वसामान्यविशेषस्वरूपे उदाहरणमुखेनाभिधाय भावसामान्यमुपदिशति–

भवतीति भावस्य ॥ २ ॥

सामान्येनोपदेश इति शेषः । अनेन[3] हि सर्वक्रियाप्रसवबीजभूतमस्तित्वमात्रमेव अनुपसृष्टेनोच्यत इति उपपन्नं भवति सामान्यवाचित्वमस्य भवतिशब्दस्य ॥ भावविशेषस्वरूपमुपदिशति—

आस्ते शेते व्रजति तिष्ठतीति ॥ ३ ॥

सकर्मकाकर्मकोपप्रदर्शनार्थमुभयेषामुदाहरणम् । **इति**शब्दोऽत्राप्याद्यार्थ एव ॥ एवं तावन्नामाख्यातोपसर्गनिपातभेदेन पदचतुष्टयं भाववचनता द्रव्यवचनता गुणभावः प्रधानभावः पूर्वापरीभावः सामान्यवाचित्वं विशेषवाचित्वमित्युक्तं तदेव स्थूणानिखननन्यायेन दृढीकर्तुमाक्षिपति—

इन्द्रियनित्यं वचनमौदुम्बरायणस्तत्र चतुष्टुं नोपपद्यते ॥ ४ ॥

उच्च्यतेऽनेनेति[3] **वचनं** वाक्यं नामाख्यातोपसर्गनिपातात्मकं **तदिन्द्रिये** इन्द्रस्यात्मनो लिङ्गे (अनुमापके) वाग्रूपे **नित्यं** नियतं, **तत्र** चतुष्टुं **नोपपद्यते**; सहभावाभावादित्यौदुम्बरायण आचार्यो **मन्यते** इति शेषः । उदुम्बरस्य गोत्रापत्यमौदुम्बरिः । अतइञ् (४–१–९५) इत्यपत्ये गोत्ररूपे इञ् । आदिवृद्धिः । ओदुम्बरेरनन्तरापत्यमुदुम्बरस्य युवापत्यमौदुम्बरायणः यञिञोश्चेति (४–१–१०१) यूनि-(युवापत्ये) फक् । अयमर्थः । यावदेव वक्तुर्वागिन्द्रिये वचनं तावदेव तदस्तीति शक्यते वक्तुं प्रच्युतं च नास्त्येवोच्चरितप्रध्वंसित्वाद्वर्णानामिति नास्ति पदभावोऽपि । प्रागेव वाक्यभावः । नहि विनष्टाविनष्टयोर्वर्णयोः पदयोर्वा सह परिसंख्यानं संभवति, तस्माद्वचनानित्यत्वात्पदचतुष्टानुपपत्तिरिति ॥ किंच—

अयुगपदुत्पन्नानां वाशब्दानामितरेतरोपदेशः ॥ ५ ॥

नोपपद्यत इत्यनुवर्तते । वाशब्दः समुच्चयार्थे वक्ष्यते (१–२–३) एवं

---

१. सामान्यवृत्त्या विशेषवृत्त्या चोभयथाशब्दः प्रवर्तत इत्युभयमुपदर्शितम् ॥

२. अत्रहि सर्वेषां सत्तावाचिनामध्ययने प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः । विद्यमानत्वमेवानुभवन्तः सर्वे भवतिशब्दवाच्या अन्याभिर्विशेषक्रियाभिरभिसंबध्यन्त इति ॥

३. उच्चार्यप्रवृत्तिनिवृत्ती बोध्येते अनेनेति करणे ल्युट् ।

४. तथाच पाणिनिसूत्रम् । इन्द्रियमिन्द्रलिङ्गम् (५–२–९३) इति । अचेतनं चेतनाधिष्ठितं सत् कार्यं करोतीति वास्यादौ गृहीतव्याप्तेः "रूपादिज्ञानं सकरणकं क्रियात्वाच्छिदावत्" इत्यनुमित्या देहेन्द्रियादिव्यतिरिक्तस्यात्मनोऽस्तित्वावगमो भवति ॥

चैतेषामयुगपदुत्पन्नानां[1] शब्दानां योऽयमितरेतरोपदेशः परस्परगुणप्रधानभावेन (नाम्न आख्यातं प्रति गुणभावेन आख्यातस्य च नामप्रति प्रधानभावेन) उपदेशः । अयं च नोपपद्यते । किं कारणं नहि विनष्टं नाम गुणभावमियादाख्याते, नाऽपि च विनष्टमाख्यातं प्रधानभावमियान्नाम्नि नहि विनष्टाविनष्टयोः परस्परं गुणप्रधानभावोऽस्ति । किंच—

शास्त्रकृतो योगश्च ॥ ६ ॥ अत्रापि **नोपपद्यत** इत्यनुवर्तते । यश्चायं **शास्त्रकृतः** शास्त्रदृष्टः **योगः** शब्दस्य शब्दान्तरेण संबन्धः । तद्यथोपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य च लोपागमवर्णविकारैः । सोऽपि वचनानित्यत्वान्नोपपद्यते । नहि विनष्टाविनष्टयोर्योगोऽस्ति । तस्माद्यएव नामाख्यातयोरितरेतरगुणप्रधानभावः उपसर्गनिपातानां नामाख्याताभ्यां योगे । यच्च पदचतुष्टयमुक्तं सर्वमेतदसम्यगिति ॥

प्रतिक्षिपति—

व्याप्तिमत्त्वात्तु शब्दस्य ॥ ७ ॥

सर्वमेतदुपपद्यत इति शेषः । तुभेंदार्थं उत्तरपक्षतां ध्वनयति । व्यापनं व्याप्तिः । स्त्रियां क्तिन्निति (३–३–९४) भावे क्तिन् । सा यस्मिन्नस्ति सोऽयं व्याप्तिमान् शब्दः । तद्भावो व्याप्तिमत्त्वं तस्य भावस्त्वतलाविति (५–१–११९) भावे त्वः । तस्माद्व्याप्तिमत्त्वाच्छब्दस्य सर्वमेतदुपपद्यते ।

१. वाक्यावयवभूतानाम् ॥ अत्रेदं बोध्यम् । उपपद्यते—युगपदुत्पन्नानामित्येवं पठितयोर्वाक्ययोः सति पूर्वरूपेऽभ्युपगते अयुगपदिति शक्यते भेत्तुम् । अनभ्युपगते तु तस्मिन्यथास्थितमेव युगपदित्यादि वाक्यम् । तत्राद्यपक्षमपेक्ष्य व्याख्यामार्गोऽयं सुज्ञेयत्वादुपदर्शितः । एतच्च नैयायिकमतोत्थानबीजम् । वैयाकरणास्त्वपरं पक्षं कक्षीकृत्येदं व्याचक्षते—यथाह भगवान्दुर्गः । अथ मतम् "अविचालिन एवैते कूटस्था अविनाशिनः शब्दास्ते तु कल्पान्ते" तस्माद्व्याप्तिरूपाद्विशीर्णेष्वभिधेयेष्वभिधातृषु कारणभावमापद्यमानेषु आश्रयाभावादेवावस्थातुमशक्नुवन्तः अभिधेयाभिधातृसहिता एव कारणात्मभावमधिकमनुभूयाभिसंस्तवकाले कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्यकारणसर्वभूतसाधारणात्मभूते हिरण्यगर्भे विवर्तमाने तद्बुद्धिमाश्रयं प्राप्य तेनैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति । अत्र ब्रूमः । एवमप्येतेषां युगपदुत्पन्नानां युगपदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टयं प्राप्नोत्येव सहावस्थितानां, तथापि इतरेतरोपदेश इतरेतरगुणप्रधानभावश्च न प्राप्नोति । नहि युगपदुत्पन्नयोर्गोविषाणयोरितरेतरगुणप्रधानभावोऽस्ति । किंचान्यत् । कूटस्थेषु चाविचालिषु नित्येषु शब्देषु य एष शास्त्रकृतो योगः स एष नोपपद्यते । किं कारणम् ? अयुक्तो हि युज्यते । नित्यं युक्ता हि धातव उपसर्गैः प्रत्ययैश्च, प्रत्ययाश्च लोपागमवर्णविकारैरिति । तस्मान्नित्यपक्षेऽपि वचनस्य तदेतदुपवर्णितं गुणप्रधानभावादि पदचतुष्टयमधिकृत्य, सर्वमेतदसम्यगिति ॥

२. समाधत्ते ॥

३. एतत्पदचतुष्कादि । तद्यथा । विनाशपक्षे पुरुषप्रयत्नोपजनिताद्धक्कोद्घातात्परस्परार्थप्रत्ययमाधाय शब्दव्यक्तय एव ध्वंसन्ते नतु शब्दाकृतयः । तास्तु तयाऽभिधानशक्त्या बुद्धि-

अयमभिसंधिः । शरीरे हृदयान्तर्गताकाशप्रतिष्ठिता बुद्धिरेवाभिधानाभिधेयोभयस्वरूपा, तयो-(रभिधानाभिधेयरूपयोर्बुद्ध्यो-) र्मध्येऽभिधानरूपया बुद्ध्याऽभिमतप्रयोजनविजिज्ञापयिषया पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतप्रयत्नेनोदीर्यमाणः शब्द उरःकण्ठादिवर्णस्थानेषु निष्पद्यमानस्तया पुरुषार्थाभिधानसमर्थवर्णादिभावमापद्यमानः पुरुषप्रयत्नेन बहिर्निःक्षिप्तोऽविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रत्याय्यास्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमाञ्छब्दः । नह्यसंव्याप्य पुरुषस्य बुद्ध्यवस्थमर्थप्रत्ययमादधीत न चानवस्थितो व्याप्नुयात्ततश्च स शब्दः स्वमर्थमभिदधत्स्वक्रियाप्रवेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वात्मानमभिसंबध्य तिरोभवितुमुपक्रमते विनाशं चोपैति । तस्य स्वदेशोपजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यानमुपपद्यत एवेति ॥ तथाच व्याप्तिमत्त्वाच्छब्दस्य लोकवेदव्यवहारार्थं पदचतुष्टयमुपादीयते । ऐवमन्यत् ॥

द्वारेणावस्थिताः स्वानर्थान्प्रत्याययन्त्यः (प्रकाशयन्त्यः) स्थिता एव भवन्ति तासु साक्षात्पदपरिसंख्यानं वर्तमानमितरासु विनाशिनीषु व्यक्तिषु लक्षणयोपचर्यते इति । व्याप्तिमत्त्वादित्यनेनैव इतरेतरोपदेशः प्रत्युक्तः । शास्त्रकृतो योगश्च नामाख्यातरूपबुद्धित्वे सत्त्वक्रियाविषये गुणप्रधानभावेनातिष्ठेत् । तयोर्गुणप्रधानभावे सति तच्छब्दे लक्षणयोपचर्यते । तथाच धातुरूपा बुद्धिस्तदर्थरूपया बुद्ध्या संयुज्यते । बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण संस्क्रियते । तस्यां च संस्क्रियमाणायां शब्दे संस्कारोपचारः क्रियते । तदभिधायकत्वाच्छब्दस्य ॥ नित्यत्वपक्षेऽपि—युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणन्नास्तीति यदुक्तपूर्वं तदप्यनैकान्तिकं दृष्टान्तभूतम् । दृष्टो हि एकस्मिन्नेव काले गुणप्रधानभावो युगपदुत्पन्नयो राजपुत्रामात्यपुत्रयोरिति ॥ एतत्तत्त्वमनुपदं स्फुटयति—अयमित्यादिना ॥

१. अभिसन्धिर्गूढोऽभिप्रायः ॥ २. तथाच पाणिनिशिक्षायाम्—

आत्मा बुध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ १ ॥ इति ।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते-इति च ॥

आत्मा अन्तःकरणम् संस्काररूपेण स्वगतानर्थान्बुद्ध्या समेत्य एकबुद्धिविषयान्कृत्वा तद्बोधनेच्छया मनः युङ्क्ते युक्तं करोति । तदिच्छावन्मनः कायाग्निं जाठरमग्निमभिहन्ति[1] । स कायाग्निः । सोदीर्णः स मारुत उदीर्णं ऊर्ध्वं प्रेरित इत्यादिस्तदर्थः ॥

३. अर्थः प्रयोजनम् । "अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिषु" इत्यमरः ॥

४. एतत्तत्वमनुपदोक्तं द्रष्टव्यम् । केचित्तु इन्द्रियनित्यत्वात्पदचतुष्टयानुपपत्तिस्तदाश्रयस्य सर्वस्येत्येवमाक्षिप्ते परिहारपक्षेणेदमुभयपक्षसाधारण्येनेत्थं व्याचक्षते—युगपदुत्पन्नानां वेत्यादि । अत्र पक्षे समञ्जसएव वाशब्दः । युगपदुत्पन्नानां वा अयुगपदुत्पन्नानां वाऽनित्यानां वा नित्यानां वा इतरेतरोपदेशः । इतरस्येत्याख्यातस्य क्रियावचने शब्देऽभिधान-

---

1. इच्छाऽप्यन्तःकरणवृत्तिविशेष एव । अन्तःकरणपरिणामविशेषो मनःकर्मात्र ॥

अथैवमपि व्यवहारार्थं पदचतुष्टं नोपादेयम् । अभिनवैरेव पाणिविहारादिनिकोचादिभिर्व्याप्तिमद्भिर्व्यवहारसिद्धेस्तथाचायमतिमहान्वेदसमुद्रः क्लेशेन पठितव्योऽपि न भविष्यति । नापि चाध्ययनदोषैः संभक्ष्यामहे इत्यपरमनुकूलमित्याशङ्कां प्रतिसमादधाति—

त्वेनोपदेशः, इतरस्य च नामशब्दस्य सत्त्ववचने शब्देऽभिधानत्वेनोपदेशः । शाकटायनस्तु योगश्च । लक्षणशास्त्रेण चैते क्रियासत्त्वे आख्यातनामशब्दार्थाः युज्येते । तस्मादुपपद्यते यदचतुष्टमिति । अत्र हेतुमप्याह व्याप्तिमत्त्वात्तुशब्देयेति । उक्तएवार्थः ॥

१. तथाच पाणिनिशिक्षा—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ १ ॥ इति ॥

स्वरेण स्वरतः वर्णेन वर्णतः । आद्यादिभ्यस्तसेरुपसंख्यानमिति सार्वविभक्तिकस्तसिः । मिथ्याप्रयुक्तः यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन् अभिमतमर्थं नाहेत्यर्थः । वागेव वज्रो हिंसकत्वात् यथेन्द्रशत्रुशब्दः स्वरदोषाद्यजमानं हिंसितवानित्यर्थः । अयं भावः । इन्द्रस्याभिचारो विश्वकर्मणाऽऽरब्धः । एवं हि तैत्तिरीये श्रूयते—विश्वरूपवधात्कुपितेन त्वष्ट्राऽऽरब्धे वीन्द्रे सोमेऽनुपहूतेनेन्द्रेण पीतस्य सोमस्यावशेषं क्रुद्धस्त्वष्टाऽऽहवनीयमुपप्रावर्त्तयत् । "स्वाहेन्द्रशत्रुर्वर्धस्वे"ति । ततो वृत्र उदभूदिति । तत्रो-

१४ निरुक्तविकृतिः ।

अथैवमपि व्यवहारार्थं पदचतुष्टं नोपादेयम् । अभिनवैरेव पाणिविहारादिनिकोचादिभिर्व्याप्तिमद्भिर्व्यवहारसिद्धेस्तथाचायमतिमहान्वेदसमुद्रः क्लेशेन पठितव्योऽपि न भविष्यति । नापि चाध्ययनदोषैः संभक्ष्यामहे इत्यपरमनुकूलमित्याशङ्कां प्रतिसमादधाति—

त्वेनोपदेशः, इतरस्य च नामशब्दस्य सत्त्ववचने शब्देऽभिधानत्वेनोपदेशः । शाकटायनस्तु योगश्च । लक्षणशास्त्रेण चैते क्रियासत्त्वे आख्यातनामशब्दार्थाः युज्येते । तस्मादुपपद्यते यदचतुष्टमिति । अत्र हेतुमप्याह व्याप्तिमत्त्वात्तुशब्देयेति । उक्तएवार्थः ॥

१. तथाच पाणिनिशिक्षा—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ १ ॥ इति ॥

स्वरेण स्वरतः वर्णेन वर्णतः । आद्यादिभ्यस्तसेरुपसंख्यानमिति सार्वविभक्तिकस्तसिः । मिथ्याप्रयुक्तः यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन् अभिमतमर्थं नाहेत्यर्थः । वागेव वज्रो हिंसकत्वात् यथेन्द्रशत्रुशब्दः स्वरदोषाद्यजमानं हिंसितवानित्यर्थः । अयं भावः । इन्द्रस्याभिचारो विश्वकर्मणाऽऽरब्धः । एवं हि तैत्तिरीये श्रूयते—विश्वरूपवधात्कुपितेन त्वष्ट्राऽऽरब्धे वीन्द्रे सोमेऽनुपहूतेनेन्द्रेण पीतस्य सोमस्यावशेषं क्रुद्धस्त्वष्टाऽऽहवनीयमुपप्रावर्त्तयत् । "स्वाहेन्द्रशत्रुर्वर्धस्वे"ति । ततो वृत्र उदभूदिति । तत्रो-

अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके ॥ ८ ॥

संज्ञाकरणमवबोधनं तच्च शब्देन सुखं भवति नियतं चेति शेषः । कुतः अणी-

प्रथमोऽध्यायः । १५

अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके ॥ ८ ॥

संज्ञाकरणमवबोधनं तच्च शब्देन सुखं भवति नियतं चेति शेषः । कुतः अणी-

दध्युः । ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्ययथावदभिधानममर्षयन्तः कर्मणि । न समीयुः । ततश्च देवताविहीनं कर्मफलं संपद्येत । न केवलं फलासंपत्तिरेवाऽपि तु दुरिष्टहेतुको दोषोऽपि स्यात् । तथाचोक्तम् ।

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ १ ॥ इति ॥

तस्मादेतएव नामाख्यातोपसर्गनिपाताः प्रयोगानुगतपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः । नहि नामाख्यातोपसर्गनिपातान्परित्यज्य मन्त्राः सन्ति । तदेव हि चतुर्विधं पदजातं प्रयोगानुगतपरिपाठ्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्त इति ॥ तदित्थं भावविशेषस्वरूपनिर्देशोपक्रमे पदचतुष्टयौडुम्बरायणमतेनाक्षिप्य पक्षप्रतिपक्षशो विचार्यावधारितम् । विषयौश्चाक्षेपप्रसङ्गेनैवास्य परिकृप्ताः देवमनुष्यव्यवहारार्थमेतदिति । तदेतच्चोदकवशेन प्रसक्तानुप्रसक्तमुक्तम् । भावविकारविचार एव प्रकृत इति तच्छेषोऽधुनोच्यते । सच पुनरुभयात्माभावः । कार्यात्मा कारणात्मा च । तयोर्यः कार्यात्मा तमधिकृत्योक्तम् "क्रियानिर्वर्त्यो योऽर्थः (फललक्षणः) स भावः क्रियैव वा भाव" इति ॥ २ ॥

इदानीं कारणात्मा भावो निरूप्यते । तद्विकार एव हि द्रव्यगुणकर्मभावेनावस्थिताः सन्तो नामाख्यातोपसर्गनिपातैरभिधीयत इति । तत्र विस्तरेणायं विधीयते तृतीयेन खण्डसूत्रेण—:

षड्भावविकारा भवन्तीति वार्ष्यायणिः ॥ १ ॥

अपिच लक्षणविदो विगृह्णन्ति भावशब्दं भवतेः स्वपदार्थे भवनं भाव इति ।

पठन्ति च सन्मात्रं भावलिङ्गं स्यात् । इति ।

तस्य विकारा **भावविकाराः षड् भवन्तीति** । सामान्यादात्मनः प्रस्कन्दा इव सन्ततत्वेन वैशेषिकेण भावविकारात्मलाभाय भवन्ति । इति परः प्रयुज्यमानः शब्दपदार्थकः । प्रसिद्धं हीतिशब्दस्य पदार्थविपर्यासकत्वं गवित्ययमाहेत्यादौ । इति ह वार्ष्यायणिराचार्य आहस्मेति वक्ष्यमाणेन (च. खं. सूत्रे) अभिसंबन्धः । वृषस्य गोत्रापत्यमित्यर्थे तिकादिभ्यः फिञ् (४–१–१५४) इति गोत्रे फिञ् । आदिवृद्धिः । अत्र कौशल्यकार्मार्याभ्यांचे–(४–१–१५५)ति सूत्रे पठितेन छागवृषयोरपीति वार्तिकेन प्रत्ययसंनियोगेन प्रकृतिरूपं निपात्यते ॥ निर्देशत उपलब्धानां

१. परिपाटी अनुक्रमः । आनुपूर्वीं चोच्यते ॥

२. विषिण्वन्ति विषयिणमनुबध्नतीति विषया अनुबन्धाः । यमुद्दिश्य हि प्रवर्तते स विषयः । व्यवहारार्थमेव हि पदचतुष्टयप्रयोगे प्रवृत्तिरिति ॥

३. क्रियते हि या सा क्रिया स्त्रियामित्यधिकृत्य कृञः श चे–(३–३–१००)ति कर्मणि शः । रिङ्शयग्लिङ्क्षि–(७–४–२८)ति रिङ् । भावकर्मणोरि–(२–३–१३)ति यक् । टाप् ॥ यदि तु क्रियतेऽनयेतिकरण साधनः क्रियाशब्दस्तदावतारयतीदानीमित्यादि ॥

षड्डिति वचनं स्ववधारणार्थम् । अतोन्ये भावविकारा एतेषामेव विकारा भवन्ति नतु ते पृथगेभ्यः सन्तीति । तदेतदनुपदं स्वयमेव स्फुटीकरिष्यति ॥ तद्भेदानाह—

जायते,ऽस्ति, विपरिणमते,ऽपक्षीयते, वर्धते विनश्यतीति ॥ २ ॥

इतिपरः प्रयुज्यमानः शब्दपदार्थकः ॥ तदेतेषां जन्मादीनां भावविकारशब्दानां मध्ये कः कस्यां विकारावस्थायामवस्थितं भावमाचष्टे कं वा विद्यमानमपि नाचष्टे कं वा न प्रतिषेधतीत्युच्यते—

जायत इति पूर्वभावस्यादिमाचष्टे, नापरभावमाचष्टे, न प्रतिषेधति ३

जायत इत्ययंशब्दः (तदन्तर्वर्ती जन्धातुः पूर्वोक्तानां जन्यादिभावानां मध्ये) **पूर्वभावस्य** प्रादुर्भावस्यादिमुपक्रमप्रभृत्यपवर्गपर्यन्तमाचष्टे ब्रवीति । सएव हि पूर्वापरीभूतो भावशब्दवाच्यस्तावदेव हि जायत इत्युच्यते यावन्निष्ठान्तशब्दवाच्यो भवति जात इति । तस्यां चावस्थायां नासज्जायत इति न्यायेन विद्यमानमपि **अपरं भावम**–(स्तिशब्दवाच्यम-) स्तित्वं **नाचष्टे** तस्यापरिपूर्णत्वात् । अनवधृतरूपं हि तस्यामवस्थायांतद्भवत्यनुमानगम्यं किमपि जायत इति । **नापि प्रतिषेधति** अस्तित्वस्य प्रतिषेधं न करोतीत्यर्थः । यतो ह्यस्तित्वं प्रतिषेधन्ननात्मक एव स्यात् कमालम्ब्यजायेत । तदवधारणकालस्योपस्थितत्वाच्च । एवमेवोत्तरत्रापि प्रपञ्चो द्रष्टव्यः । समासतस्तु वक्ष्यते ॥

अस्तीत्युत्पन्नस्यसत्वस्यावधारणम् ॥ ४ ॥

अस्तीत्येषशब्द उत्पन्नस्य **सत्वस्यावधारणं** तन्मात्रं ब्रवीति न विपरिणाममाचष्टे अपूर्णत्वात् न तं प्रतिषेधति । उपस्थितत्वात् ॥

विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम् ॥ ५ ॥

विपरिणमत इत्येष शब्दोऽप्रच्यवमानस्य तत्त्वादप्रभ्रश्यमानस्य तत्त्वात्तद्भावादस्तित्वात्पुरुषत्वाद्वा विकारं विक्रियामात्रं ब्रवीति न वृद्धिमाचष्टे अपूर्णत्वात्र च तां प्रतिषेधति उपस्थितत्वात् ॥

वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानाम् ॥ ६ ॥

वर्धत इत्येषशब्दः **स्वेषामङ्गानां** शिरोग्रीवाबाहूदरादीनामभ्युच्चयमभ्युच्चितां (संचयं) ब्रवीति । **सांयौगिकानां** संयोगजनितानां वा **अर्थानां** हिरण्यधान्यादीनामभ्युच्चयं ब्रवीतीति पूर्वेणाभिसंबध्यतेऽर्थवशात् । तत्प्रयोगमाह—

वर्धते विजयेनेति वा वर्धते शरीरेणेति वा ॥ ७ ॥

---

१. पौर्वापर्यं हि देशकृतं कालकृतं च भवति । प्रकृते च कालकृतं, जनिशब्दवाच्यो भावविकारः पूर्वः । तस्मात्परकालोऽस्तिशब्दवाच्यः ॥

२. आदिमित्येतदुपलक्षणविधयाऽत्र व्याख्यायते ॥

३. आचष्ट इत्यनुवर्तते तदर्थनिर्देशश्चायमेवमुत्तरत्रापि बोध्यम् ॥

४. उपचयप्रयोगमाहेत्यर्थः ॥

अत्राद्यमवरोहणक्रमेण संयौगिकेषूदाहरणं द्वितीयं स्वाङ्गाभ्युच्चये । अत्र वर्धत इति ब्रुवाणो नापक्षयमाचष्टेऽपूर्णत्वात् । नापि तं प्रतिषेधति उपस्थितत्वात् ॥

अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोमम् ॥ ८ ॥ ३ ॥

यथैव हि स्वाङ्गैः सांयौगिकैर्वा द्रव्यैरुपचीयते तथैवापक्षीयते । इत्येवमुपचयप्रयोगः पूर्वनिर्दिष्टः प्रतिलोमं विपरीतं व्याख्यातः । भवति हि वृद्धेः प्रतिलोममपक्षयः । प्रतिगतं लोम प्रतिलोमम् । अच्प्रत्यन्ववपूर्वात्सामलोम्न (५-४-७५) इति समासान्तोऽच्प्रत्ययो नस्तद्धित (६-४-१४४) इति टिलोपः ॥ तत्रापि नाचष्टे अपरभावं, न वा प्रतिषेधति ॥

विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ९

विनाश एवात्रापरभावस्तस्यादिमुपक्रमप्रभृत्यपवर्गपर्यन्तमाचष्टे । तस्यां चावस्थायां विद्यमानमपि पूर्वभावमपक्षीयतेरर्थं नाचष्टे न प्रतिषेधतीति सर्वं निरवद्यम् ॥ ३ ॥

अथ इम एव भावविकाराः सन्ति किं वान्येऽपीत्यपेक्षायां चतुर्थं खण्डमारचयति—

अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीतिह स्माह ॥१॥

अतः भावविकारषड्भ्योऽन्येऽन्यत्वेनाभिमता भावविकारा लक्ष्यन्त इति शेषः । ते (पृथक्पृथगत्यन्तभिन्ना अपि सन्तः) एतेषामेव विकारा भवन्ति । तद्यथा जनिशब्दवाच्यो भावविकारोऽनेकप्रभेदभिन्नोऽनेकपर्यायशब्दवचनो निष्पद्यतेऽभिव्यज्यते उत्तिष्ठतीत्येवमादि १ तथा अस्तिशब्दवाच्योऽनेकप्रभेदभिन्नोऽनेकपर्यायवचनश्च अस्ति विद्यते भवतीत्येवमादि २ तथा विपरिणमतिशब्दवाच्यो विपरिणमते जीर्यति भावान्तरमापद्यते इत्येवमादि ३ तथावर्धतेशब्दवाच्यो वर्धते पुष्यति उपचीयते इत्येवमादि ४ तथाऽपक्षीयतिशब्दवाच्यो ध्वस्यति भ्रस्यतीत्येवमादि ५ तथा विनश्यतिशब्दवाच्यो विनश्यति म्रियते विलीयत इत्येवमादि ६ इतिह आहस्म आचर्यो वार्ष्यायणिरिति पूर्वोक्तमभिसंबध्यते, "इतिह" इत्ययं निपातसमुदायः पुरातीतवृत्ताख्याने । हशश्वतोर्लङ्चे-(३-२-११६) ति चाङ्लिट् ॥

ते यथावचनमभ्यूहितव्याः ॥ २ ॥

त एते जन्यादिशब्दवाच्या विकारा वचनमनतिक्रम्य यथावचनं, ये यस्मिन्वचनेऽवस्थिताः सन्ति ते प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणंप्रति अभ्यूहितव्या अभितो वितर्क्याः प्रयुज्यमाना इति वाक्यशेषः । तदेते सर्व एव धातवो भाववचनास्तेषां सर्वेषामिहाध्ययने प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टम् ॥

---

१. स एव हि पूर्वापरीभूतो विनाशशब्दवाच्यः । तावदेव हि विनश्यतीत्युच्यते-यावन्निष्ठान्तशब्दवाच्यो भवति विनष्ट इति ॥

२. नन्वनपक्षीयमाणो विनश्येदिति ॥

३. इयमत्र शास्त्रे व्याख्याशैली द्रष्टव्या उद्देशो-निर्देशः-प्रतिनिर्देश इति । तत्रोद्देशः

तदेवं सानुषङ्गं नामाख्यातयोर्लक्षणमुक्तं संप्रति प्रतिज्ञाप्रसक्तमुपसर्गलक्षणमुच्यते । अत्र तावत्कश्चिच्छङ्कते–वक्ष्यति भवानुपसर्गलक्षणमिदमेव तावदुच्यतां किमिम उपसर्गा नामाख्यातवत्पदचतुष्टान्निकृष्य (पृथक्कृत्य) बद्धाः सन्तोऽर्थानाहुरुतान्यथेति । तत्रोत्तरमाह—

न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः ॥ ३ ॥

उप–उपगृह्य (आख्यातं तस्यैवार्थविशेषं) सृजन्तीत्युपसर्गाः प्रादयः । **निर्**–निष्कृष्य (नामाख्यातमध्यात्) बद्धाः पदवाक्यरूपेण रचिताः सन्तोऽर्थान्–निर्–निश्चयेन न आहुरिति शाकटायन आचार्यो मन्यते इति वाक्यशेषः । शकटस्य गोत्रापत्यमित्यर्थे नडादिभ्यः फक् (४–१–९९) इति फक् फस्यायन् । कथं तर्हि तेषामर्थवत्तेत्युच्यते—

नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति ॥ ४ ॥

तुशब्दोऽवधारणार्थः । नामाख्यातयोरेव योऽर्थः कर्मक्रिया तत्रैव विशेषं कंचिदुपसंयुज्य तेनोपसंयोगेन तद्बलेनेतियावत् द्योतय–(न्ति व्यञ्जय-) न्तीत्युपसंयोग-

---

सूत्रस्थानीयः । तद्यथा षड्भावविकारा इति । निर्देशो वृत्तिस्थानीयः । तद्यथा जायते अस्ति विपरिणमत इति । प्रतिनिर्देशो वार्तिकस्थानीयः । तद्यथा जायत इति पूर्वभावस्यादिमाचष्टे । इति । एवं सर्वत्र यथासंभवं योजनीयम् ॥

१. नान्यस्तु—किंचिदवशिष्यते तदवसरप्राप्तमपि पदचतुष्टलक्षणप्रतिज्ञाव्याघातभयादत्र नोक्तम् । पदचतुष्टलक्षणानन्तरं चतुर्थेन पादेन "तत्र नामान्याख्यातजानीति शाकटायन" इत्यादिना तद्वक्ष्यते ॥

२. तथाचाहुर्नव्याः । जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वेसति प्राच्यन्यतमत्वमुपसर्गत्वमिति । अत्र जन्येत्यादिपरिष्कृतौ मूलं तु-उपसर्गाः क्रियये–(१–४–५९) तिवक्तव्ये योगग्रहणम् । इत्थं च "यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञेति" नियमः सनिरूपकोपसर्गलक्षणफलभूत एव नान्यः ॥ अत्रोपोपसृष्टात्सृजतेः पुंसि संज्ञायां घः प्रायेणेति (३–३–११८) कर्तरि घः । चजो–(७–३–५२) रिति कुत्वम् ॥

३. पदादपगतानां वर्णानामिव पृथग्विरचितानामेषां साक्षादर्थाभिधाने शक्तिर्नास्त्येव किंतु तद्युक्तानामेव । कथं तर्ह्येषां प्रातिपदिकत्वात्पदत्वादिकमिति चेत् । कृत्तद्धितसमासाश्चे–(१–२–४६) ति चकारेणेति संगृह्याण ॥

४. अत्र नामेति संपातायातमविवक्षितं नहि नाम्नोऽर्थः क्रिया । नापि च तद्युक्ताः (नामयुक्ताः) प्रादय उपसर्गा इत्युच्यन्ते उपसर्गाः क्रियायोग इति पाणिनिस्मरणात् । उपसर्गा हि क्रियाङ्गत्वेन नामान्यास्कन्दन्तीति केचिदाहुस्तदपरे न क्षमन्ते । सन्त्येव हि क्रिया धातुजनामसु सिद्धावस्थापन्ना इति ॥

५. तदाश्रयमेव । यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति न प्रदीपाश्रयः । एवमिहापि बोध्यम् ॥

६. अत्रोपसंपूर्वाद्युज्यतेर्भावे घञ् । चजोरिति कुत्वम् ॥

द्योतका भवन्ति न तु स्वातन्त्र्येण कमप्यर्थं वाच्यवृत्त्याऽभिदधति, तस्मादनर्थकाः पृथगवस्थिताउपसर्गा इति सिद्धम् ॥

अथ प्रकारान्तरेणानेकार्थत्वमेषामुपपादयति—

उच्चावचाः पदार्था भवन्तीति गार्ग्यः ॥ ५ ॥

उच्चाश्चावचाश्चोच्चावचा नैकभेदा बहुप्रकारा इतियावत् । पदानामुपसर्गपदानामर्था भवन्ति वियुक्तानामपि नामाख्याताभ्यामिति गार्ग्य आचार्यो मन्यते इति वाक्यशेषः । गर्गस्य गोत्रापत्यमित्यर्थे गर्गादिभ्यो यञ् (४–१–१०५) इति गोत्रे यञ् आदिवृद्धिः ॥ यदुक्तमनर्थकाः पृथगवस्थिता उपसर्गा इति तत्खण्डयति—

तद्य एष पदार्थः प्राहुरिमे तम् ॥ ६ ॥

तदिति प्रसिद्धार्थकमव्ययं य एषु उपसर्गेषु (वाचकतासंबन्धेन) विद्यमानः पदार्थः । (स्वकीयोऽनेकप्रकारकोऽर्थः) तमिमे उपसर्गाः पृथगपि सन्तः प्राहुरभिदधत्येवेत्येतत्प्रसिद्धम् ॥

तं–कम्—

नामाख्यातयोरर्थविकरणम् ॥ ७ ॥ ४ ॥

अर्थविकरणमर्थविक्रियामर्थभेदमिति यावत् । तस्मादर्थवन्त एव ते पृथगवस्थिता अपीति सिद्धम् ॥ ४ ॥

---

१. यद्यपि उदक् च अवाक् चोच्चावचमिति मयूरव्यंसकादित्वान्निपात्य नपुंसकनिर्देशेन व्याख्यातं सिद्धान्तकौमुद्यादौ । तथाप्यर्थतस्तौल्याद्गार्ग्याचार्येणेत्थमेव विगृहीतत्वादस्याश्च (लघुविवृतेः) तदनुसारित्वात्तथैवात्र व्याख्यातम् । पुंस्त्वंतु विशेष्यनिघ्नत्वात् तथाच "उच्चावचं नैकभेद" मिति विशेष्यनिघ्नवर्गे अमरः ॥

२. अयमर्थः । एषां (प्रादीनां) मध्ये एकैकोऽप्यनेकार्थः । यथा प्रश्नशक्तिवृत्तिशुद्ध-

२० निरुक्तविवृतिः ।

द्योतका भवन्ति न तु स्वातन्त्र्येण कमप्यर्थं वाच्यवृत्त्याऽभिदधति, तस्मादनर्थकाः पृथगवस्थिताउपसर्गा इति सिद्धम् ॥

अथ प्रकारान्तरेणानेकार्थत्वमेषामुपपादयति—

उच्चावचाः पदार्था भवन्तीति गार्ग्यः ॥ ५ ॥

उच्चाश्चावचाश्चोच्चावचा नैकभेदा बहुप्रकारा इतियावत् । पदानामुपसर्गपदानामर्था भवन्ति वियुक्तानामपि नामाख्याताभ्यामिति गार्ग्य आचार्यो मन्यते इति वाक्यशेषः । गर्गस्य गोत्रापत्यमित्यर्थे गर्गादिभ्यो यञ् (४–१–१०५) इति गोत्रे यञ् आदिवृद्धिः ॥ यदुक्तमनर्थकाः पृथगवस्थिता उपसर्गा इति तत्खण्डयति—

तद्य एष पदार्थः प्राहुरिमे तम् ॥ ६ ॥

तदिति प्रसिद्धार्थकमव्ययं य एषु उपसर्गेषु (वाचकतासंबन्धेन) विद्यमानः पदार्थः । (स्वकीयोऽनेकप्रकारकोऽर्थः) तमिमे उपसर्गाः पृथगपि सन्तः प्राहुरभिदधत्येवेत्येतत्प्रसिद्धम् ॥

तं–कम्—

ननूच्यतां तर्हि क एषां मध्ये कस्मिन्नर्थविशेषे वर्तत इति तत्राह—

आ इत्यर्वागर्थे ॥ १ ॥

तद्यथा आपर्वतादिति । अर्वा-(क्प्रा-) गितिर्मर्यादेह गम्यते । अत्रेदमवधेयम् । अनेकार्थत्वेऽपि सति उपसर्गाणामेकैकोऽर्थ उदाहरणत्वेनोच्यतेऽर्थवत्त्वप्रकाशनायेति ॥

प्रपरेत्येतस्य प्रातिलोम्यम् ॥ २ ॥

प्रपरेत्येतौ उपसर्गौ एतस्यैवाङोऽर्थस्यार्वागित्यस्य प्रातिलोम्यं विपरीतमर्थमाहतुः ॥ तद्यथा प्रगतः । परागतः । इति । उल्लङ्घ्य गत इत्यर्थः ॥

अभीत्याभिमुख्यम् ॥ ३ ॥

आह । तद्यथा अभिगत इति । आभिमुख्येन गत इत्यर्थः ॥

प्रतीत्येतस्य प्रातिलोम्यम् ॥ ४ ॥

प्रति इत्ययं एतस्यैवाभेः प्रातिलोम्यं विपरीतमर्थमाह । तद्यथा प्रतिगत इति परावृत्य गत इत्यर्थः ॥

अति सु इत्यभिपूजितार्थे ॥ ५ ॥

वर्तेते ॥ तद्यथा अतिधनः सुब्राह्मण इति । अभिपूजितः प्रशस्तः ॥

निर्दुरित्येतयोः प्रातिलोम्यम् ॥ ६ ॥

तद्यथा निर्धनो दुर्ब्राह्मणः । इति ॥

न्यवेति विनिग्रहार्थीयौ ॥ ७ ॥

विनीति द्वन्द्वो विश्व निश्वेति, ततो ग्रहशब्देन षष्ठीतत्पुरुषे विनिग्रहौ तावर्थौ य-

प्रथमोऽध्यायः । २१

ननूच्यतां तर्हि क एषां मध्ये कस्मिन्नर्थविशेषे वर्तत इति तत्राह—

आ इत्यर्वागर्थे ॥ १ ॥

तद्यथा आपर्वतादिति । अर्वा-(क्प्रा-) गितिर्मर्यादेह गम्यते । अत्रेदमवधेयम् । अनेकार्थत्वेऽपि सति उपसर्गाणामेकैकोऽर्थ उदाहरणत्वेनोच्यतेऽर्थवत्त्वप्रकाशनायेति ॥

प्रपरेत्येतस्य प्रातिलोम्यम् ॥ २ ॥

प्रपरेत्येतौ उपसर्गौ एतस्यैवाङोऽर्थस्यार्वागित्यस्य प्रातिलोम्यं विपरीतमर्थमाहतुः ॥ तद्यथा प्रगतः । परागतः । इति । उल्लङ्घ्य गत इत्यर्थः ॥

अभीत्याभिमुख्यम् ॥ ३ ॥

आह । तद्यथा अभिगत इति । आभिमुख्येन गत इत्यर्थः ॥

प्रतीत्येतस्य प्रातिलोम्यम् ॥ ४ ॥

प्रति इत्ययं एतस्यैवाभेः प्रातिलोम्यं विपरीतमर्थमाह । तद्यथा प्रतिगत इति परावृत्य गत इत्यर्थः ॥

अति सु इत्यभिपूजितार्थे ॥ ५ ॥

उत्–इति अयमेक एव शब्द एतयोः समीपतरवर्तिनोर्न्यवयोः प्रातिलोम्यमाह । तद्यथा उद्गृह्णातीति ॥

समित्येकीभावम् ॥ ९ ॥

अनेकस्यैकभवनमेकीभावः । "अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्वि–(५–४–५०) रिति च्विः । अस्य च्वा-(७–४–३२) वितीत्वम् । तमाह । तद्यथा संगृह्णाति । इति ॥

व्यपेत्येतस्य प्रातिलोम्यम् ॥ १० ॥

वि–अप–इत्येतौ एतस्य समित्यस्य प्रातिलोम्यं विग्रह–(मर्थ-) माहतुः । तद्यथा–विगृह्णाति । अपगृह्णातीति ॥

अन्विति सादृश्यापरभावम् ॥ ११ ॥

अनु–इत्ययं सादृश्यमपरभावं पश्चाद्भवनं चाह । क्रमेण यथा अनुरूपमरयेदम् । अनुगच्छति । इति ॥

अपीति संसर्गम् ॥ १२ ॥

आह । संसर्गः संबन्धः । सच संबन्धिभेदाद्भिन्नो यथायोग्यमूह्यः तद्यथा सर्पिषोऽपि स्यान्मधुनोऽपि स्यादिति । अत्र बिन्दुरित्यध्याहार्योऽपिशब्दबलात् । सर्पिषोऽपीत्युक्ते सर्पिषोऽवयवो बिन्दुरपि स्यादिति गम्यते । अतएव षष्ठी तैद्योगे सर्पिष इति । अत्र संभावनायां लिङ् । तस्या एव विषयभूतेऽस्त्यर्थे भवने बिन्दोः स्वकर्तृकदौर्लभ्यप्रयुक्तदौर्लभ्यवत्त्वं संबन्धोऽपिशब्दार्थः । तद्बोधकत्वादेवापेः अपिः पदार्थे–(१–४–५६) त्यादिना कर्मप्रवचनीयसंज्ञा । अतएव चोपसर्गप्रादुर्भ्यामस्तिर्यच्पर (८–३–८७) इति सस्य षो नेति बोध्यम् ॥

उपेत्युपजनम् ॥ १३ ॥

आह । तद्यथा–उपजायत इति । समुत्पद्यत इति तदर्थः ॥

परीति सर्वतोभावम् ॥ १४ ॥

आह । तद्यथा–परिधावति । सर्वतो धावतीत्यर्थः ॥

---

१. तथाचोक्तम् । इदमस्तु सन्निकृष्टे समीपतरवर्त्ति चैतदो रूपम् ॥
अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ॥ इति ॥

२. अतएवाविद्यमानपदार्थद्योतकस्यापेरपिः पदार्थे–(१–४–९६) त्यादिना कर्मप्रवचनीयत्वम् ॥

३. अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावे संबन्धे ॥

४. कर्मप्रवचनीयानां हि क्रियानुयोगिकसंबन्धाभिधायित्वेनैव तत्त्वम् । कर्मक्रियां (तदनुयोगिकसंबन्धं) प्रोक्तवन्त इति कर्मप्रवचनीया बाहुलकात्कर्तरिभूतेऽनीयर् ॥

५. कर्मप्रवचनीयत्वादेव । "आकडारादेका संज्ञे–" (१–४–१) ति नियमेहि "या पराऽनवकाशा चे"–त्युक्तेरत्र परया कर्मप्रवचनीयसंज्ञयोपसर्गसंज्ञाया बाधात् ॥

अधीत्युपरिभावमैश्वर्यं वा ॥ १५ ॥

आह । तद्यथा–अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः । लोकस्योपरि तिष्ठतीत्यर्थः । अत्राधिशीङ्स्थासां कर्मे–(१–४–४६) ति लोकस्य कर्मत्वम् ॥ ऐश्वर्यं स्वस्वामिभावसंबन्धः । तत्रयथा । अधिभुवि रामः । अधिरामे भूः । इति । अत्रा"धिरीश्वर–" (१–४–५७) इत्यधेः कर्मप्रवचनीयत्वे तद्योगे "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी–" (२–३–९) इति स्वस्वामिभ्यां पर्यायेण सप्तमी । भुव ईश्वरो राम इत्यर्थः ॥

उपसंहरति—

एवमुच्चावचानर्थानाहुस्त उपेक्षितव्याः ॥ १६ ॥

एवममुना प्रकारेणोच्चावचाननेकविधानर्थानाहुस्त **उपेक्षितव्याः** उपेत्योपगम्यानुप्रवेश्य वा बुद्धिमीक्षितव्याः कः कस्मिन्नर्थे वर्तत इत्येवं द्रष्टव्याः परीक्ष्या इत्यर्थः ॥

इति श्रीमद्यास्कमुनिप्रणीतनिरुक्तलघुविवृतौ नैघण्टुककाण्डे प्रथमाध्यायस्य प्रथमः पादः ॥

प्रथमाध्यायस्य द्वितीयः पादः।

पूर्वं "नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ती–त्युपसर्गा इत्युपसर्गलक्षणं सामान्यतो विशेषतश्च "आ इत्यर्वागर्थे" इत्यादिनोक्त्वाऽधुना सामान्यलक्षणानुषक्तं प्रतिज्ञाप्रसक्तमेव निपातलक्षणं वर्णयितुमुपक्रमते—

अथ निपाताः ॥ १ ॥

निपातसामान्यलक्षणानुक्तमेऽयमथशब्दः ॥ मङ्गलप्रयोजनकक्षायमुपेक्षितोऽत्र द्वितीयपादादौ ॥ निपातशब्दं निर्ब्रवीति—

---

१. "कृत्तद्धितसमासैः संबन्धाभिधानं भावप्रत्ययेन–"तिव्याकृतिविदांनियमात् स्वेशभासे–(३–२–१७५) तिवरजन्तादीश्वरशब्दाद्भावार्थकेन ष्यञेश्वरस्य स्वामिनः स्वेनसह संबन्धोऽर्थः प्रतीयते । सच प्रतियोगिवृत्तिधर्म एवेति प्राञ्चो न्यायविद आहुरनुयोगिवृत्तिधर्म एवेति नव्याः । वैयाकरणास्तु उभयमप्युररीकृत्य ब्रुवते स्वस्वामिभाव इति । स्व स्वामिनोर्भाव इति द्वन्द्वान्ते श्रूयमाणस्य भावपदस्य प्रत्येकमभिसंबन्धात्स्वभावः (स्वत्वं) स्वामिभावः (स्वामित्वं) चेति तदर्थः ॥

२. सूत्रे यस्येति षष्ठया विनिगमनाविरहेण निरूपितत्वमाधेयत्वं वार्थः । यन्निरूपितं यन्निष्ठं वा ईश्वरवचनमैश्वर्यवचनम् । ईश्वरशब्दोऽत्र भावप्रधानः । संज्ञासूत्रेऽपि तथैव । तथाच वृत्तिकृत् स्वस्वामिभावसंबन्धेऽधिः कर्मप्रवचनीयसंज्ञः स्यादिति ॥

३. "ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्मा-

---

1. अन्यतरपक्षस्थापिका युक्तिर्विनिगमना । तस्या विरहोऽभावस्तेन ॥

उच्चावचेष्वर्थेषु निपतन्ति ॥ २ ॥

उच्चावचेष्वनेकप्रकारकेष्वर्थेषु निपतन्तीति निपाताः । ज्वलादित्वाज्ज्वलितिकसन्तेभ्योण (३-१-१४-) इति कर्तरि णः । कतमे पुनस्त इत्याह—

अप्युपमार्थेऽपि कर्मोपसङ्ग्रहार्थेऽपि पदपूरणाः ॥ ३ ॥

उपमैवार्थ उपमार्थस्तस्मिन्नेवमुत्तरत्रापि तत्स्वरूपमग्रे वक्ष्यति (तृ. खं. सूत्रे) कर्मशब्दो हि प्रायेणार्थपर्यायवचन एतस्मिञ्छास्त्रे गतिकर्माण उत्तरे धातवः (३-२-३) गत्यर्था इति गम्यते, तथा चार्थोपसंग्रहार्थः । पदमेव पूरयितव्यमर्थो येषां ते पदपूरणाः । इति त्रिधा ते अर्थभेदाद्भवन्ति अपिरेकोवाक्यालङ्कारे—

तषामेते चत्वार उपमार्थे भवन्ति ॥ ४ ॥

तेषां सर्वेषां मध्ये एतएव चत्वारः "इव, न, चित्, नू" प्रायेणोपमार्थे भवन्ति तत्र तावत्—

इवेति भाषायां चान्वध्यायं च ॥ ५ ॥

उपमार्थे भवतीति विपरिणतवचनमनुवर्तते अर्थवशात् । भाषायां लोके अन्वध्यायं छन्दसि च । उपगम्यातथागुणैर्मीयत इत्युपमा । आतश्चोपसर्ग-(३-३-१०६) इति कर्मण्यङ् । अत्रोदाहरणमाह—

अग्निरिवेन्द्र इवेति ॥ ६ ॥

अत्राद्या अग्निरिवेति त्रिष्टुप् तपसः पुत्रेण मन्युना दृष्टा श्येनादिषु निष्कैवल्ये

ङ्गलिकावुभा"-वित्यभियुक्तोक्तेः माङ्गलिकौ मङ्गलप्रयोजनकावित्यर्थः । मृदङ्गादिध्वनिवदस्योच्चारणमात्रेण मङ्गलं नत्वयं मङ्गलार्थक एव । कोशेऽपि "मङ्गलानन्तरारम्भप्रश्नकात्स्न्यें-ष्वथोअथे"त्युक्तौ मङ्गलार्थो विषयविधयैव निर्दिष्टः । अर्थतस्तु आरम्भानन्तरादिकमेव विधिणोत्थयमिति भावः ।

१. कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणस्तदन्यस्मिन्नप्रसिद्धस्तद्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा ॥

२. कश्चिच्छन्दस्येव भवति, कश्चिद्भाषायामेव, कश्चिच्चोभयत्रेति विभागेन प्रदर्श्यते । अधीयन्तेऽस्मिन्नित्यध्यायो वेदः । "अध्यायन्यायेत्यादिना (४-३-११२) घञन्तो निपात्यते ॥ मन्त्राः खल्वस्मिन्नधीयन्ते तस्मिन्नितीत्यन्वध्यायं, विभक्तयर्थेऽव्ययीभावः चकार एकोवाक्यालङ्कारे ॥

३. तथाच मन्युरेवास्या ऋषिरितीयंमान्यवी । ऋषयो मन्त्रद्रष्टारो भवन्तीति वक्ष्यति (नै० २-३-२) । यद्वा मन्युरिन्द्रो देवता अस्या इति मान्यवी । अथ ऋक् । अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सुहरे हूत एधि । हत्वाय शत्रून् विभजस्व वेद ओजो विमानो विमृधो नुदस्व ॥ इति ॥ १ ॥ अस्या अर्थः हेमन्यो इन्द्र ! । अन्यो वा कश्चन । हे सुहरे लहनशील ! (एतस्मिन्प्रत्युपस्थिते शत्रूणामभिभवनकाले अस्माभिः) हूतः आहूतः सन् नः अस्माकं सेनानीः सेनाप्रणेताएधि भव । (ततश्च) अग्निरिव त्विषितः दीप्तः (तेजसा ज्वलितः) सहस्व अभिभव तानस्मच्छत्रून् । किंच शत्रून् हत्वाय

शस्यते (ऋ० सं० ८-३-१९-२) द्वितीया इन्द्र इवेति अनुष्टुप् । अनया च ध्रुव आङ्गिरसो राजानमभिषिषेचेति तेनेयं दृष्टा (ऋ० सं० ८-८-३१-२) उदाहरणान्तरं (लौकिकं) लोके विदितमेवेति नाभिहितम् ॥ अग्निरिव तीक्ष्णः । इन्द्रइव विक्रान्तः । इत्यादि ॥

नेति प्रतिषेधार्थीयो भाषायाम् ॥ ७ ॥

प्रसिद्धः । यथा घटो नास्ति पटो नास्तीति । नशब्दोऽत्रास्तित्वं (सत्तां+विद्यमानतां) प्रतिषेधति ।

उभयमन्वध्यायम् ॥ ८ ॥

प्रतिषेधार्थीय उपमार्थीयश्चेत्युभयमन्वध्यायं छन्दसि प्रसिद्धम् । आद्योदाहरणम्—

नेन्द्रं देवममंसतेति ॥ ९ ॥ (ऋ० सं० ८-४-१-१)

इन्द्रं देवमात्मनो दीपयितारं नामंसत नामन्यन्त आदित्यरश्मयैः ॥

अथ किंलक्षणः प्रतिषेधार्थीयः किंलक्षणश्चोपमार्थीय इत्यावेदयितुमाद्यस्य लक्षणमाह—

प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेधति ॥ १० ॥

हत्वा क्त्वोयगि (७-१-४७) ति यगागमः । (यत्तेषामस्मच्छत्रूणां) वेदः धनम् (तत् त्वमादाय) विभजस्व प्रयच्छ । किंच ओजोमिमानोऽस्माकं बलं कुर्वन् मृधः संग्रामकारिणः शत्रून् विनुदस्व घातयेति ॥

१. अथ ऋक् । इहैवैधि मापच्योष्ठाः पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥ इति ॥ २ ॥ अस्या अर्थः । हे राजन्; इहास्मिन्नेव राज्ये एधि स्वामित्वेन सर्वदा वर्तमानो भव माचातस्त्वमपच्योष्ठा अपच्युतोभूर्मापगमः । पर्वतइव यथा पर्वतो नैश्चल्येनावतिष्ठते एवम् अविचाचलिः चलनरहितो भव । इन्द्रइव यथा स्वर्गे इन्द्र एवमिह लोके त्वं ध्रुवः शाश्वतस्तिष्ठ स्थितो भव । राष्ट्रमु राष्ट्रं चेह लोके धारय स्वेस्वे कर्मण्यवस्थापयेति ॥

२. अयमर्थो दुर्गोक्तिमनुसृत्य व्याख्यातः । सायणभाष्ये त्वन्यथा व्याख्यानमस्य । तत्र तावदियमृक् ॥ वि हि सोतोरसृक्षत नेन्द्रं देवममंसत । यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ १ ॥ इति ॥ इयमिन्द्रवागितीन्द्रोऽस्या ऋषिः ॥ इन्द्रो वदति । सोतोः सोमाभिषवं कर्तुं व्यसृक्षत यागंप्रति मया विसृष्टा अनुज्ञाताः स्तोतारो वृषाकपेर्यष्टारः हीति पूरणः । तत्र देवं द्योतमानमिन्द्रं मां नामंसत । मया प्रेरिताः सन्तोऽपि ते स्तोतारो न स्तुतवन्तः किंतु मम पुत्रं वृषाकपिमेव स्तुतवन्तः । तत्र येषु पुष्टेषु सोमेन प्रवृद्धेषु यागेषु अर्यः स्वामी वृषाकपिर्मम पुत्रो मत्सखा मम सखिभूतः सन् अमदत् सोमपानेन हृष्टोऽभूत् । यद्यप्येवं तथापीन्द्रोऽहं विश्वस्मात्सर्वस्माज्जगत उत्तर उत्कृष्टतर इति ॥

यो हि प्रतिषेधार्थीयो भवति तस्य पुरस्तात्प्रथममुपचारः प्रयोगो भवति कस्मात यत्प्रतिषेधति तस्मादित्यर्थः ॥ द्वितीयोदाहरणमाह—

दुर्मदासोनसुरायामिति ॥ ११ ॥ (ऋ० सं० ५-७-१९-१)

"हत्सु पीतासो युध्यन्ते" इत्यादिरस्य । "ऊधर्न नग्ना जरन्ते" इत्यन्तः ॥ काण्वोमेधातिथिरात्रिरसश्च प्रियमेध ऐन्द्रं सूक्तं ददृशाते । तत्रैषा गायत्री । अनुक्तविनियोगत्वाद्वाचःस्तोमे विनियुज्यते[1] । अस्यार्थः । सोमा इत्यर्थवशात्कर्तृपदमाक्षिप्यते ।

ते पीतासः पीताः सन्तः आज्जसेरसुक् (७-१-५०) इत्यसुगागमः । हृत्सु हृदयेषु (अवस्थिताः सन्तो) युध्यन्ते संप्रहारमिव कुर्वन्ति । युध संप्रहारे (दि० आ०) तङ् । तत्पानवशेन सोमपायिनोऽहमहमिकया (अहं विशिष्ट २ इत्येवं) स्पर्धमाना भवन्ति । क इव सुरायां (पीतायां) दुर्मदासोन कुत्सितमदा इव । अत्रापि पूर्ववदसुगागमः । किंच । (आत्मलाभपरितुष्टाः सन्तस्तमेव यजमानं) जरन्ते स्तुवन्ति । कथम् । नग्नाः (भूत्वा स्त्रियं संप्रयोक्ष्यामह इत्येवमभिप्रायाः) ऊधर्न ऊध इव रात्रिं यथा ॥ सायणस्तु हे इन्द्र, त्वया पीताः सोमास्त्वां मादयितुं हृत्सु त्वदीयेषु युध्यन्ते परस्परं संप्रहारं कुर्वते । अत्र दृष्टान्तः "दुर्म० याम्" सुरायां पीतायां जायमाना दुष्टमदा यथा पातारं मादयन्ति तद्वत् । अपि च नग्ना स्तोतारस्ते च ऊधर्न पयसा पूर्णे गवादेरूध इव सोमपूर्णे त्वां जरन्ते स्तुवन्तीत्येवं व्याख्यत् ॥

द्वितीयस्य लक्षणमाह—

उपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते ॥ १२ ॥ १ ॥

येनार्थेन उपमेयमर्थमुपमिमीते स उपमार्थीयस्तस्य । उपरिष्टादुपरि । शेषं पूर्ववद्ग्राह्यम् ॥ १ ॥

चिदित्येषोऽनेककर्मा ॥ १ ॥

कर्मशब्दोऽर्थपर्यायवचनः । अनेकार्थोऽपि सन्नुपमार्थीयसंयोगादत्रोदाहृतः । कथमनेकार्थ ? इति तमेवार्थविशेषमुदाहरणद्वारा दर्शयति—

आचार्यश्चिदिदं ब्रूयादिति पूजायाम् ॥ २ ॥

आचार्य एवं ब्रूयात्कोऽन्य एवं वक्ष्यति । उदाहरणप्रसक्तमाचार्यपदं निर्वक्ति—

आचार्य आचारं ग्राहयति-आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा ॥ ३ ॥

---

१. तथाचाह भगवान्दुर्गः । येषामपि विनियोगः क्वचिदन्यत्र नास्ति तेऽपि वाचःस्तोमे विनियुज्यन्ते ॥ इति ।

२. तथाच मनुः । उपनीय तु यः शिष्यं वेदमध्यापयेद्गुरुः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति । अन्यत्रापि । आम्नायतत्त्वविज्ञानाच्चराचरसमानतः । यमादियोगसिद्धत्वादाचार्य इति कथ्यते, इत्येवं लक्षणलक्षितो मतप्रस्थापकोऽप्याचार्यः । सहि जनानां बुद्धिमाचिनोत्यनुकूल्यैकत्र लगयतीति आचार्य इत्युच्यते ॥

आङ्पूर्वाद्धरतेरन्तर्भावितण्यर्थाद्वाहुलकात्कर्तरि "ऋहलोर्ण्यदि-(३-१-१२४)"ति ण्यत् । उपधावृद्धिराद्यकल्पे । कल्पान्तरे त्वौणादिको ण्यद्वृद्धिर्धातोरन्त्यस्यात्वमुगागमश्चेति साधनप्रक्रियोह्या ॥

दधिचिदित्युपमार्थे ॥ ४ ॥

अत्रौदन इति वाक्यशेषः । दधितुल्यस्तद्रूप इत्यर्थः ॥

कुल्माषाँश्चिदाहरेत्यवकुत्सिते ॥ ५ ॥

अवकुत्सिते भृशं कुत्सिते । कुल्माषानपि तावदाहरेति किं वाऽन्यदाहरिष्यसि ॥ कुल्माषपदं निर्ब्रवीति—

कुल्माषाः कुलेषु[1] सीदन्ति ॥ ६ ॥

कुलेषु सजातीयान्नसङ्घेषु सीदन्ति भ्रष्टा भवन्ति । पृषोदरादित्वा-(६-३-१९१) त्साधुरयम् ॥

नु इत्येषोऽनेककर्मा ॥ ७ ॥

अनेककर्मा अनेकार्थः । तद्यथा—

इदं नु करिष्यतीति हेत्वपदेशे ॥ ८ ॥

हेत्वपदेशे हेतुव्यवहारे ॥ हेतुर्द्विविधः कारको ज्ञापकश्च तत्रान्योऽत्र, यत इदं करिष्यतीत्यर्थः ।

कथं नु करिष्यतीत्यनुपृष्टे ॥ ९ ॥

अनुपृष्टे-कथं करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत्पुनरनुपृच्छति[2] तत्र, अत्रैवोदाहरणान्तरमाह—

न न्वेतदकार्षीदिति च ॥ १० ॥

अयं[3] नु एतन्नाकार्षीत् ? (त्वमुक्तवानसि अयमेतत्कृतवान्न्यादिति ?)

अथाप्युपमार्थे भवति ॥ ११ ॥ २ ॥

तद्यथा-(उत्तरेण) ॥ २ ॥

वृक्षस्य नु ते पुरुहूत वयाः ॥ १ ॥ (ऋ० सं० ४-६-१७-३)—

---

१. कोलन्ति इति कुलानि कुल संस्त्याने बन्धुपुचेति भौवादिकात्कुल्धातोर्मूलविभुजादित्वात्कः । तेषु सजातीयान्नसंघेषु मध्यन्ते हता भवन्ती (तिज्वलादित्वाण्णः)—त्यर्थतो निर्वक्ति सीदन्तीति । अर्धस्विन्ना हि यवचणकादयः कुल्माषाः । तथाचोक्तम् अर्धस्विन्नाश्च गोधूमा अन्ये च चणकादयः । कुल्माषा इति कथ्यन्त इति । "सहि कुल्माषान्खादन्तं भिक्षन" इति निन्दार्थवादश्रुतिरपि । अतःकुल्माषा निकृष्टतमा अन्नेषु प्रोच्यन्ते ॥

२. तथाचामरः "नु पृच्छायां विकल्पे चे"—ति । पृच्छा—पृष्टं प्रश्न इत्यनर्थान्तरम् ॥

३. नन्वोर्विभाषे—(३-२-१२१)ति वा लुङ् । नायं ननुशब्दस्तथा सति ननौ पृष्टप्रतिवचन (३-२-२०) इति लडेव स्यात् ।

व्यू ३ तयो रुरुहुरिन्द्रपूर्वीः । इत्यर्धर्चे त्रिष्टुभः । अनेन हि भारद्वाजो बार्हस्पत्य इन्द्रं तुष्टाव । तेनेयं दृष्टा । हे पुरुहूत[1] बहुभिराहूत इन्द्र ते त्वदीयाः पूर्वीः पूर्वकालेभवाः[2] पूर्वैः कृता वा ऊतयोऽवनानि रक्षाः (अव् रक्षणे भ्वा० प०) अवतेः क्तिनि "ज्वरत्वरे"–(६–४–२०)त्युपधावकारयोरूठ् । विरुरुहुः । विशेषेण रोहन्तिस्म । तत्र दृष्टान्तः "वृक्ष० याः" अस्यार्थमाह—

वृक्षस्येव ते पुरुहूत शाखाः ॥ २ ॥

यथा वृक्षस्य शाखा विरोहन्ति तद्वत् ॥

वयाः शाखाः ॥ ३ ॥

इति पर्यायवचनः । निगमप्रसक्तवयाशब्दं निर्वक्ति—

वेतेर्वातायना भवन्ति ॥ ४ ॥

वेतेः वीगतावित्यादादिकाद्वीधातोः कर्तरि "नन्दिग्रहिपचादिभ्य" (३–१–१३४) इत्यच्प्रत्ययः । वियन्ति चलन्तीति वयाः । वातेन हि ताः समन्ततोऽयन्त इति वातायनाः । अयतेर्नन्द्यादित्वाल्ल्युः ॥ पर्यायप्रसक्तं शाखाशब्दं निर्वक्ति—

शाखाः खशयाः ॥ ५ ॥

खे आकाशे शेरत इति खशयाः । पृषोदरादित्वा–(६–३–१९१)त्साधुः । प्रकारान्तरेण निर्वक्ति—

शक्नोतेर्वा ॥ ६ ॥

औणादिको णः कर्तरि । कस्य खः ॥ इति व्याख्याता उपमार्थीयाः ॥

अथ प्रतिज्ञाप्रसक्तानर्थोपसंग्रहार्थानाह—

यस्यागमादर्थपृथक्त्वमहविज्ञायते नत्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहः ॥ ७ ॥

यस्याश्रूयमाणस्यैव निपातस्यागमादध्याहारा–(त् सरूपविरूपैकशेषा–) दर्थतो वा पृथक्त्वमह पृथक्त्वमेव विज्ञायते । तद्यथा देवदत्तयज्ञदत्तौ देवदत्तश्च यज्ञ-

---

१. पुरुशब्दोऽयं बहुनामसु निघण्टौ (३ अ० १ खण्ड०) पठितः । लोकेऽपि "पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरिचे" त्यमरः ॥

२. पूर्वसिन्काले भवाः पूर्वीः "भवे छन्दसी"–(४–४–११०) ति यत् । यद्वा "पूर्वैः कृतमिनयौ चे"–(४–४–१३३) ति यः । पिप्पल्यादेराकृतिगणत्वान्ङीष् "यस्येति चे"–(६–४–१४८) त्यलोपे "हलस्तद्धितस्ये"–(६–४–१५०) ति यलोपः । दीर्घाज्जसि च वाच्छन्दसी–(६–१–१०६) पूर्वसवर्णदीर्घः ॥

३. अर्थेन पृथक्त्वमिति "कर्तृकरणे कृता बहुलमि"–(२–१–३२) ति बाहुलकात्समासः । आद्यादित्वात्सार्वविभक्तिकस्तसिः ॥ अस्योदाहरणं व्याख्यान्तेऽथवेत्यादिनात्रैव द्रष्टव्यम् ॥

दत्तश्चेति गम्यते । द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते नतु तयोरौद्देशिकमुद्देशकृतमिव (पृथक्त्वं) यथा गां अश्वं पुरुषं पशुमिति प्रत्येकमुद्दिश्यमानानां, कुतः विग्रहेण पृथक्त्वात् द्वयोर्बहूनां वाऽर्थानां विविच्य (विभिद्य नानाकृत्वा वा) ग्रहणं ज्ञानं विग्रहस्तेन पृथक्त्वात्पृथग्भावात् । इत्थं च यस्मात्स द्वावर्थौ बहून्वा गृहीत्वा एकस्मिन्समसनकर्मणि उपसंगृह्णात्युपसमावेष्टयति तस्मादयं कर्मोपसंग्रह इत्युच्यते । गृह्णतेरत्र पचाद्यजन्तस्य कर्मशब्देन सप्तमीति योगविभागाच्छौण्डादेराकृतिगणत्वाद्वा समासः । अथवा बृहस्पतिश्चेत्युक्ते प्रजापतिरनुक्तोऽपि द्वितीयो गम्यते प्रजापतिरपीति ॥

कतमः पुनरसावित्यपेक्षायामाह—

चेति समुच्चयार्थ उभाभ्यां संप्रयुज्यते ॥ ८ ॥

च इत्ययमेव कदाचित्समुच्चयार्थः सन् उभाभ्यामर्थाभ्यां विगृहीताभ्यामेव संसंयुक्तः प्रयुज्यते । तद्यथा—

अहं च त्वं च वृत्रहन् इति ॥ ९ ॥ (ऋ० सं० ६-४-४१-५)

एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य एत्याकारः ॥ १० ॥

अथाकार एतस्मिन्नेव समुच्चयार्थे वर्तते । तद्यथा—देवेभ्यश्च पितृभ्यश्चेति । (ऋ० सं० ७-६-२२-१)

प्रथमोऽध्यायः । २९

दत्तश्चेति गम्यते । द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते नतु तयोरौद्देशिकमुद्देशकृतमिव (पृथक्त्वं) यथा गां अश्वं पुरुषं पशुमिति प्रत्येकमुद्दिश्यमानानां, कुतः विग्रहेण पृथक्त्वात् द्वयोर्बहूनां वाऽर्थानां विविच्य (विभिद्य नानाकृत्वा वा) ग्रहणं ज्ञानं विग्रहस्तेन पृथक्त्वात्पृथग्भावात् । इत्थं च यस्मात्स द्वावर्थौ बहून्वा गृहीत्वा एकस्मिन्समसनकर्मणि उपसंगृह्णात्युपसमावेष्टयति तस्मादयं कर्मोपसंग्रह इत्युच्यते । गृह्णतेरत्र पचाद्यजन्तस्य कर्मशब्देन सप्तमीति योगविभागाच्छौण्डादेराकृतिगणत्वाद्वा समासः । अथवा बृहस्पतिश्चेत्युक्ते प्रजापतिरनुक्तोऽपि द्वितीयो गम्यते प्रजापतिरपीति ॥

कतमः पुनरसावित्यपेक्षायामाह—

चेति समुच्चयार्थ उभाभ्यां संप्रयुज्यते ॥ ८ ॥

च इत्ययमेव कदाचित्समुच्चयार्थः सन् उभाभ्यामर्थाभ्यां विगृहीताभ्यामेव संसंयुक्तः प्रयुज्यते । तद्यथा—

अहं च त्वं च वृत्रहन् इति ॥ ९ ॥ (ऋ० सं० ६-४-४१-५)

वेति विचारणार्थे ॥ ११ ॥

वेत्ययं विचारणेऽर्थे वर्तते । तद्यथा—

हन्ताहं पृथिवीमिमां निदधानी ह्वे ह्वा-इति ॥ १२ ॥ (ऋ० सं० ८-६-२७-३)

ऐन्द्रो लबस्तस्येयमार्षम् गायत्री । "कुवित्सोमस्यापामिती"त्यस्यास्तृतीयः पादः । अर्थश्च । हन्तेति हर्षे । हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः । इदानीमेवाहमिमां पृथिवीमिह वा अन्तरिक्षलोके इह वा द्युलोके । अथवा इह दक्षिणे स्कन्धे इह वा सव्ये स्कन्धे निदधानि अवस्थापयानि इति हस्तेन निर्दिशति । दधातेर्लोटि उत्तमपुरुषैकवचने मेर्निः । अत्र हेतुं वदति कुविदित्यादि । इतिशब्दो हेतौ । यस्मात् कुविद्बहुवारं सोमस्य सोममपां पीतवानस्मि । अस्य मे सोमपानस्यानुरूपमेव वीर्यमस्तीत्यभिप्रायः । अत्र "क्रियया यमभिप्रैति स संप्रदानमि-(वा०)"ति सोमस्य संप्रदानसंज्ञायां "चतुर्थ्यर्थे बहुलं छन्दसी-(२-३-६२)"ति षष्ठी । अपामिति पा पाने लुङि "गातिस्थे(२-४-७७)"ति सिचो लुक् ॥

अथापि समुच्चयार्थे भवति ॥ १३ ॥

वेतीत्यनुवर्तते । उदाहरणम्—

वायुर्वा त्वामनुर्वा त्वा-इति ॥ १४ ॥ (य० सं० ९-७) ॥ ३ ॥

अनुष्टुबेषा वाजपेये अश्वयोजने विनियुक्ता । गन्धर्वाः सप्तविंशतिः । ते अग्ने, अश्वमयुञ्जँस्तेऽस्मिञ्जवमादधुः ॥ इत्यस्याः शेषः । हे अश्व, वायुश्च त्वा त्वां मनुश्च त्वा- त्वां गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन्रथे । ते हि विदुर्यथा त्वं योक्तव्यः । एवं च पूर्वमप्यश्वं युक्तवन्तो देवानामृषीणां च । त एव च तस्मिञ्जवमादधुः आहितवन्तो यस्मादतो ब्रवीमि ममापि चाग्ने । तमिममश्वं त एव युञ्जन्तु जवं चास्मिन्नादधत्विति भगवान्दुर्गो व्याख्यातवानिमाम् ॥ ३ ॥

अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते ॥ १ ॥

अह इति ह इति च द्वावप्येतौ विनिग्रहार्थीयौ । विनिग्रहो नाम विभागेनावस्थित-

---

बोढा प्रापकः । यस्यायमधिकारः कव्यानि बोढव्यानीति स (इहास्माकं पितृयज्ञे होतृत्वेन स्थितः) ऋतावृधः । ऋतस्य सत्यस्य यज्ञस्य वा वृधः । वर्धयितॄन् पितॄन्यक्षत् पूजयतु । यजेर्लेटि सिपि अडागमः । लेटोऽडाटा-(३-४-९४) विति । किंच हव्यानि प्रवोचति प्रब्रवीतु (एतान्यस्मत्प्रदत्तानि) इदू पादपूरणौ ॥ केभ्यः देवेभ्यश्च पितृभ्यश्चेति मन्त्रार्थः ।

१. सायणस्तु हन्तेति संभावनायामनुज्ञायां वा संभावयाम्येतदनुजानामि वा । किंतत् अहमिमामित्येवं व्याचख्यौ ॥

२. माध्यन्दिनीये तु । वातो वा मनो वा गन्धर्वाः सप्तविंशतिः । ते अग्ने अश्वमयुञ्जँस्ते अस्मिञ्जवमादधुः ॥ ७ ॥ इत्युष्णिक्पठ्यतेऽश्वदैवत्या ॥ तदर्थश्च वातो वायुश्च मन इन्द्रियं च सप्तविंशतिर्नक्षत्राणि गन्धर्वा गोर्भूमेर्धर्तारः । ते वातादयोग्ने पूर्वमश्वमयुञ्जन्रथे योजितवन्तः तेच वातादयोऽस्मिन्रथे जवं वेगमादधुः स्थापितवन्तः । इति ॥

योर्देवदत्तयज्ञदत्तयोरेकस्मिन्देवदत्तेऽभिमतरसगोपायनस्य नियमेन ग्रहणं तदर्थो विनिग्रहार्थः । विनिग्रहार्थ एव विनिग्रहार्थीयः । स्वार्थे छ इति दुर्गः । तयोः पुनरेतत्प्रयोगस्वाभाव्यं यद्वयोरर्थयोर्युगपत्प्रकृतयोर्मध्ये पूर्वेण पूर्ववाक्यगतेनार्थेन सं-संयुक्तौ प्रयुज्येते ।

तद्यथा—

अयमहेदं करोत्वयमिदम् ॥ २ ॥

अयमह देवदत्तो गाः पाययतु । अयं यज्ञदत्तो भुङ्क्तामिति ॥ हकारस्योदाहरणम्—

इदं ह करिष्यति इदं न करिष्यतीति ॥ ३ ॥

यज्ञदत्त इदं ह इदमेव करिष्यति सामग्रीसंवननम् । इदं नकरिष्यति ओदनं न पक्ष्यतीति ॥

अथाप्युकार एतस्मिन्नेवार्थ उत्तरेण ॥ ४ ॥

एतस्मिन् विनिग्रहार्थ एव भवति । स पुनरुत्तरेण द्वितीयवाक्यगतेनार्थेन संप्रयुज्यत इति पूर्वतनवाक्यात्परिणतवचनमनुवर्तते । अर्थः प्राग्वत् । तद्यथा—

मृषेमे वदन्ति सत्यमु ते वदन्ति । इति ॥ ५ ॥

इमे वृषलाः मृषा मिथ्या वदन्ति । ते ब्राह्मणाः सत्यमु सत्यमेव वदन्ति ॥ इति ॥

अथापि पदपूरणः ॥ ६ ॥

अथाप्युकारः पदपूरणः । पदं चरणमेव पूरयितव्यमस्येति पदपूरणः । पूरी आप्यायने (चु० प०) नन्द्यादित्वात् (३–१–१३४) ल्युः ।

इदमु+तदु ॥ ७ ॥

१. स अर्थोयस्येति बहुव्रीहिरत्र ॥

२. युगपदित्येककालेऽव्ययम् ॥

३. अयं देवदत्त एव गाः पाययत्वित्यर्थः ॥

४. इदमुत्यपुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् । नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥ १ ॥ अस्या अर्थः । इदमु पुरतो दृश्यमानमिदम् । (उकारः पदपूरणः) त्यत्तत् अस्माभिः स्तुत्यं सर्वप्रसिद्धं ज्योतिस्तेजः पुरुतममत्यन्तप्रभूतम् । कुतो यतो वयुनावत् ज्ञानवत् । वयुनशब्दः प्रज्ञानामसु निघण्टौ (३–९) निर्दिष्टः । ततो मतुपि मंतौ बह्वचोऽनजिरादीनामि–(६–३–११९) ति दीर्घः । तमसस्तमोऽभिभूत्यब्लोपे कर्मणीति (वा०) पञ्चमी । पुरस्तात्प्राच्यां दिशि अस्थात् उदतिष्ठत् । एवं सति नूनं निश्चयेनैता उषसो दिवोऽन्तरिक्षदेवताया आदित्यस्य दुहितरो विभातीर्विशेषेण भानं कुर्वतीः "दीर्घाज्जसिच–वाच्छन्दसी"–(६–१–१०६) ति पूर्वसवर्णदीर्घः । जनाय जनानां" चतुर्थ्यर्थे बहुलं छन्दसी"–(२–३–६२) ति बहुलग्रहणात्षष्ठ्यर्थे चतुर्थी ।

द्वे अपीमे ऋचौ क्रमेण (ऋ० सं० ३–८–२–१) । (१–५–२–१) पञ्चपदे । त्रिष्टुभौ । अनयोराद्यया वामदेवो गौतम उषसं तुष्टाव । अन्त्यया तु गौतमो नोधाश्चेन्द्रमस्तौत् ॥

हीत्येषोऽनेककर्मा ॥ ८ ॥

अनेककर्मा अनेकार्थः । तद्यथा—

इदं हि करिष्यतीति हेत्वपदेशे ॥ ९ ॥

हेतोः कारकस्य ज्ञापकस्य वा अपदेशो व्यवहारस्तस्मिन् । हि यत इदं करिष्यति अत इति वाक्यार्थः । तथा चामरोऽपि हि हेतावववधारणे इति ।

कथं हि करिष्यतीत्यनुपृष्टे ॥ १० ॥

अनुपृष्टं व्याख्यातपूर्वम् (पृ० २७ पं० १८) ॥

कथं हि व्याकरिष्यतीत्यसूयायाम् ॥ ११ ॥

अमर्षादसाक्षाच्छब्दपूर्वकोऽभिप्रायः परिवादो वाऽत्रासूया ॥ कथमयमकृतप्रयत्नः व्याकरिष्यति नास्य सामर्थ्यमित्यभिप्रायः ॥

गातुं गमनम् । गाङ् गतौ (भ्वा० अ०) कमि मनि जनि गा भा याहिभ्यश्च (उ० १–७०) इति भावे तुन् । (गमनादिव्यापारसामर्थ्यं) कृणवन्नकुर्वन् । इत्येकस्या एवादरार्थे बहुवचनम् ॥

५. तदु प्रयक्षतममस्य कर्मदृश्मस्य चारुतममस्ति दंसः । उपह्वरे यदु परा अपिन्वन्मध्वर्णसो नद्यश्चतस्रः ॥ १ ॥ अस्या अर्थः । दृश्मस्य दर्शनीयस्येन्द्रस्य तत्कर्म (उः पादपूरणः) प्रयक्षतमं प्रकर्षेणपूज्यतमम् । यक्ष पूजायां (भ्वा० प०) कर्मणि घञ् हलश्चे– (३–३–१२१) ति । यक्ष्यते पूज्यते इति यक्षः पूज्योऽतिशयेन यक्षो यक्षतमस्ततः प्रादिसमासः । दसि दंसनदर्शनयोः (चु० आ०) दंस्यते कर्तव्यतया दृश्यत इति दंसः कर्तव्यं कर्म (निघ० २–१) चारुतममतिशयेन शोभनमस्ति । किंतत् । यदयमिन्द्र उपह्वरे उपह्वर्तव्ये (गन्तव्ये) पृथिव्याः संबन्धिनि समीपदेशे । रहोऽन्तिकमुपह्वरे इत्यमरः । उपरा दिशः (नि० १–६) अपिन्वत् । पिवि सेचने (भ्वा० प०) लङ् । यद्वा उपरा उत्ता मेघपूरिता वेति दुर्गः । मधु मधुरम् अर्णः जलं यासु ता मध्वर्णसो मधुरोदकाश्चतस्रो नद्यः प्रधानभूता गङ्गादिनदीः अपिन्वत् अपातपत् अक्षारयत् वर्षद्वारेण च यशादि प्रावर्तयदिति दुर्गः । तदेतत्कर्मान्येन कर्तुमशक्यत्वात्पूज्यतममिति ॥

१. अन्यत्र तु गुणेष्वपि दोषारोपोऽसूया । तथाचामरः ॥ असूया तु दोषारोपो गुणेष्व-

---

1. गुणगतं बहुत्वं तस्यामारोप्य बहुवचनम् । अतएव एकस्मिन्नपि गुरवः समागता ब्रह्मादयः प्रयोगाः सङ्गच्छन्ते ॥

2. यद्वा उपह्वरन्ति गच्छन्त्यस्मिन्नच इत्युपह्वरो भूप्रदेशः पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः गुणः । दुर्गस्तु–उपह्वानमर्हन्ति यस्मिन्देशेऽवस्थिताः सहायाः स उपह्वरो देशः । जमैरनाकीर्णो वा यस्मिन्नेकाकीति व्याचख्यौ ॥

किलेति विद्याप्रकर्षे ॥ १२ ॥

विद्याया विज्ञानस्य प्रकर्षे अतिशये । अन्यतो विद्यामुपश्रुत्यातिशयेनावधार्य अन्यस्मै कस्मैचिदाचष्टे एवं किलैतदासीद्युद्धमित्येवम् । अत्र प्रवक्तुर्विज्ञानातिशयो गम्यते ॥

अथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे ॥ १३ ॥

किलेतीति संबध्यते । संयुक्तः प्रयुज्यते संप्रयुज्यते । अन्यस्मात्कंचिदर्थं नायमेवमित्येवमुपश्रुत्य तमेवार्थमन्यमनुपृच्छति अथेतरमश्रद्धत्पूर्वस्य—

नकिलैवं ननु किलैवम् ॥ १३ ॥ इति ॥

मेति प्रतिषेधे ॥ १४ ॥

मेत्ययं प्रतिषेधेऽर्थे वर्तते । तद्यथा—

माकार्षीर्माहार्षीरिति च ॥ १५ ॥

अत्र न माङ्योग (६–४–७४) इत्यडभावः । विध्यर्थे (आज्ञायां) लुङ् । माङि लुङ् (३–३–१७५) इति हि सर्वलकारापवादः ॥

खल्विति च ॥ १६ ॥

प्रतिषेधार्थीय एव । तद्यथा—

खलुकृत्वा खलुकृतम् ॥ १७ ॥

खलुकृत्वा–अकृत्वा–न कर्तव्यमिति वार्थः । खलुकृतं–नकृतमित्यर्थः ।

अथापि पदपूरणः ॥ १८ ॥

अथापि—खल्वित्ययं पदपूरणः पादपूरणेऽर्थे वर्तते । तद्यथा—

एवं खलु तद्बभूव इति ॥ १९ ॥

वेदे, लोकेऽपि 'निर्धारितेऽर्थे लेख्येन खलूक्त्वा खलु वाचिकमि' ति । लेख्येन लेखितव्येन पत्रेणार्थे निर्धारिते निर्धार्य बोधिते वाचिकं संदेशवाचमुक्त्वा खलु न वक्तव्यमित्यर्थः । अत्रैकः खलुशब्दः प्रतिषेधार्थीयोऽपरः पादपूरणः ॥

शश्वदिति विचिकित्सार्थीयो भाषायाम् ॥ २० ॥

विचिकित्सानाम विवेकपूर्वकः प्रश्नस्तत्पूर्वकमवधारणं वाऽऽत्मप्रश्नः इति केचित् । विपूर्वकात्कित निवासे (भ्वा० प०) गुप्तिच्किद्भ्यः सन्नि–(३–१–५)ति सन् सच "कितेर्व्याधिप्रतीकारे निग्रहेऽपनयने नाशने संशये चे"ति (वा०) संशयेऽर्थे

पीति ॥ परिवादो विद्यमानदोषकथनम् । अविद्यमानदोषकथनं तु निन्देति निन्दापरीवादयोर्भेदो "गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत" इति वदता मनुना दर्शितः । परीवाद इति उपसर्गस्य घञीति (६–३–१२३) वा दीर्घः ॥

१ यथाहुर्नाथ प्रदीपकाराः–"श्लोकपादः परं केचित्सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यैकस्वरूपं पदम् चिर" इति ॥

२. तथाच मेदिनी–शश्वत्स्यादात्मप्रश्ने च मङ्गले । पुराकल्पे सदार्थे च पुनरर्थे च दृश्यत इति ॥

भवति । सप्तन्तात् अप्रत्ययादि–(३–३–१०२)तिङियामप्रत्ययश्चाप् ॥ तथा-चामरोऽपि विचिकित्सा तु संशय इति । विचिकित्साऽर्थो यस्य स विचिकित्सार्थः स एव विचिकित्सार्थीयः । स्वार्थे छः । स भाषायां लोके भवति । छन्दसि पुनर-न्येष्वप्यर्थेषु भवतीत्याह–(इयमत्रास्यार्थवशात्स्थितिशैली द्रष्टव्या यदस्य (शश्व-च्छब्दस्य) एवंशब्दस्य पुरस्तात्प्रयोगो भवत्युपरिष्टाद्वा तद्यथा—)

शश्वदेवमित्यनुपृष्टे । एवं शश्वदित्यस्वयं पृष्टे ॥ २१ ॥

अर्थे वर्तत इति वाक्यशेषः । अस्वयं पृष्टे स्वयमात्मनाऽपृष्टे ॥

नूनमिति विचिकित्सार्थीयो भाषायाम् ॥ २२ ॥

स्पष्टम्—

उभयमन्वध्यायम् ॥ २३ ॥

अन्वध्यायं छन्दसि पुनरयमुभयमाह । उभयार्थ इति यावत् । तमेवार्थद्वय-माह—

विचिकित्सार्थीयश्च पादपूरणश्च ॥ २४ ॥ इति ।

अत्रोदाहरणमुत्तरखण्डसूत्रेण तृतीयपादादिगतेन निर्विवक्षुर्निदानं[1] तस्य तावदाह—

अगस्त्य इन्द्राय हविर्निरूप्य मरुद्भ्यः संप्रदित्सांचकार
स इन्द्र एत्य परिदेवयांचक्रे ॥ २५ ॥ ४ ॥

इति० या० मु० प्र० नि० शा० प्र० ध्या० द्वि० पादः ॥ * ॥

अगः कुम्भस्तत्र स्थानः संहत इत्यगस्त्यः कुम्भसंभवोमुनिः । अगस्त्यः कुम्भसंभव इत्यमरः । स इन्द्रायेन्द्रदेवतायै हविर्हवनीयं घृतादि निरूप्य समुद्यम्य मरुद्भ्यस्तन्नामिकाभ्यो देवताभ्यः संप्रदित्सां संप्रदातुमिच्छां चकार कृतवान् स इन्द्र एत्यागत्य परिदेवयांचक्रे मन्युपूर्वकं विलापं[2] कृतवान् ॥ ४ ॥ * ॥ इति श्रीमद्या-स्कमुनिप्रणीतनि०लघुविवृतौ नै० काण्डे प्र० द्वि० पादः ॥ * ॥

ननूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम् ।
अन्यस्य चित्तमभिसंचरेण्यमुताधीतं विनश्यति ॥ १ ॥ (ऋ० सं० २–४–१०–१)

परिदेवनप्रकारं प्रतिपादयन्नृक्श्रुतिमर्थतो व्याचष्टे—

न नूनमस्त्यद्यतनम् । नो एव श्वस्तनम् ॥ २ ॥

इन्द्रो वदति विचार्यमेतन्ममैतत्तावत् यदद्यतनं हविर्मम नास्तीति । प्रतिषेधेसति

---

१. निदानं त्वादिकारणम् । तस्य उदाहरिष्यमाणमन्त्रस्य । तावदादौ ॥ अयमर्थः । निदानवतां मन्त्राणां निदानमेव पूर्वं वक्तव्यम् । तेनोच्यमानोऽर्थोऽतितरां प्रकाशते ततः पदानि । ततोऽर्थः । ततः प्रत्येकं विग्रहेण निर्वचनमेष हि व्याख्याक्रमोऽत्र शास्त्र इति ॥

२. परिदेवनं नाम मन्युपूर्वको विलापः । तथाचामरः विलापः परिदेवनमिति ॥

प्रतिषेध्येनावश्यंभाव्यमित्यद्यतनशब्दोऽध्याहृतं आचार्येण । उत्तरवाक्ये श्व इति दर्शनात् । अथापि स्यात् श्वस्तनं भविष्यतीति ? नो श्वः उशब्दोऽवधारणार्थः (न उ श्वः) श्वःशब्दो वृत्तिविषये श्वोभवं श्वस्तनमाह । "अमानोनाः प्रतिषेध" इति स्मृतेर्नेशब्दोऽत्र नोशब्देन व्याख्यातः पर्यायवचनत्वात्तथाचायमर्थो नोएव श्वस्तनं श्वस्तनमपि नैवास्तीति । अत्रहेतुं चतुर्थपादेनाह—उतेति । उत, अपि, अथे,तिशब्दा वेदे समानार्थाः । (मया ममेदमिति) आधीतमाध्यातमभिप्रेतं यद्वाऽधीतमस्मदर्थं निरूपितं भृशमुद्भुष्टं वा विनश्यति अन्यसात्करणेनादर्शनमुपैति । तर्हि श्वस्तनमस्माकं भविष्यतीति कुत एतदिति समस्तार्थः । (पादद्वयार्थं मूल एव वक्ष्यति) ॥

अथैकपदनिरुक्तम् ।—

अद्यास्मिन्द्यवि ॥ द्युरित्यहोनामधेयम् । द्योतत इति सतः ॥ ३ ॥

द्योतते रविकिरणसंबन्धादित्यर्थे द्युत् दीप्तौ (भ्वा० आ०) अस्माद्गमेर्डोः (उ० २–६४) इति बाहुलकात्कर्तरि डोप्रत्ययः । डित्वाट्टिलोपः । सचायं कर्तरि विहित इत्याह सत इति कर्तृकारकस्येत्यर्थः । अत्रास्तेः शतरि षष्ठ्येकवचने श्नसो—(६–४–१११)रित्यलोपे सत्शब्दः सिध्यति । इत्थं च द्योशब्दो दिनपर्यायवचनो यस्य सप्तम्येकवचने द्यवीत्युक्तमधस्तात् । अस्मिन्द्यवि (अह्नि) इत्यर्थे सद्यःपरुत्परारी—(५–३–२२)त्यादिना अद्यशब्दो निपातितः । द्युरित्यहो नामधेयमिति तु द्योशब्दपर्यायविवक्षयाभिहितम् । द्यु अभिगमने (अ० प०) द्युगमिभ्यां डोरिति भोजोक्ते डोप्रत्यये द्योशब्दः । अस्मादेव (द्यु धातोः) डिच्चेत्यधिकारे द्युद्भ्यां चेति भोजसूत्रेण उप्रत्यये द्युशब्दः । अभिगच्छन्त्यस्मिन्सं खमभिमतप्रदेशं प्राणिन इति द्यौर्द्युर्वा । द्युतेरेव वा अभ्रादयश्च (उ० ५–३०) इति डुन्प्रत्ययान्तो निपातितो द्रष्टव्यः । अस्मिन्पक्षे द्योतत इति सत इति द्यशब्दस्यैव व्युत्पादनम् । सच उक्तविधया द्योशब्दसमानार्थतया निर्दिष्टः । अतएवाहर्नामसु (नि० १–९) द्यौःशब्दसाधने केचिद्द्युरिति पठन्तीति देवराजयज्वनिर्वचनं संगच्छते ॥ निगमश्च "द्युभिरक्तुभिः परिपातमस्मान् (ऋ० सं० १–७–३७–५) इत्यादिः ॥

श्व उपाशंसनीयः कालः ॥ ४ ॥

उपगम्य अभिप्रायविषयीकृत्य सचेतसा (प्राणिना) आशंसनीय आशस्तव्यो भवत्यनागतत्वादित्युपाशंसनीयः कालः श्व इत्युच्यते ॥

---

१. एते च मन्त्रैकदेशा एव सन्तोऽध्याहार्या भवन्ति । पदातिरेकादध्ययनकाले नाधीयन्ते । ते त्वर्थनिर्वचनकाले प्रकाशयितव्याः ॥

२. अन्यसै प्रदानेन । विभाषा सातिः कात्स्न्र्येत्यनुवृत्तौ तदधीनवचने (५–४–५४) इति सातिप्रत्ययः ।

३. भाववचनानामिति (२–३–५४) वत्प्रकृत्यर्थोऽत्र सच्छब्देऽविवक्षितः । तथाच दुर्गः । द्योतत इति कर्तृकारकं सदिति यत्र ब्रूयात्तत्रोच्चारित एव कारकनियमो द्रष्टव्योऽन्यत्र यथेष्टं योज्यमिति ॥

ह्यो हीनः कालः ॥ ५ ॥

अतिक्रान्तो हि स भवति । अयं च श्वःसंबन्धादनुक्तोऽप्यत्र निरुक्तोऽर्थवत्त्वात् ॥

इदानीमुपक्रान्तमन्त्रस्य द्वितीयपादमनूद्य व्याचष्टे—

कस्तद्वेद यदद्भुतं–कस्तद्वेद यदभूतम् ॥ ६ ॥

को हि नाम तद्वेद जानाति यदभूतमद्भुतमुत्पन्नं कस्य भविष्यति मम वाऽन्यस्य वेति । भूधातुरत्रोत्पत्तावभिहितो यागात्स्वर्गो भवतीत्यत्र यथा । शब्दसारूप्यप्रसङ्गेन निर्वक्ति—

इदमपीतरदद्भुतमभूतमिव ॥ ७ ॥

लोके इदमपि इतरद्यत्किंचिच्छोणितवर्षादि तदभूतमिव कादाचित्कत्वात् ॥

उक्तस्यैव तृतीयपादमनूद्य व्याचष्टे—

अन्यस्य चित्तमभिसंचरेण्यम् अभिसंचारि ॥ ८ ॥

कस्मात्पुनर्न ज्ञायते मम नैव भविष्यतीत्याह अन्यस्येति । अवरोहणक्रमेणोपस्थितमभिसंचरेण्यपदं निर्ब्रवीति अभिसंचारि अभितः संचरणशीलम् । अभिसंपूर्वाच्चरतेर्गत्यर्थात्तच्छील्ये कर्त्तरि एण्य प्रत्ययः । अन्यशब्दं निर्वक्ति—

अन्यो नानेयः ॥ ९ ॥

नाना(नानात्वेन व्यवस्थितस्यासत्कुलजस्या)पत्यं नानेयः । अव्ययस्यान्तप्रतिरूपकत्वा–(दाबन्तसमानानुपूर्वीकत्वा–)दाबन्तत्वनिबन्धनं स्त्रीभ्योढगि–(४–१–१२०)ति ढक् भवति । क्त्वायामित्यत्र याध्यथा । यद्वा न सतामानेयो नानेयः ॥ चित्तपदं निर्ब्रूते—

चित्तं चेततेः ॥ १० ॥

चेतत्यनेनार्थानिति चित्तम् । चिती संज्ञाने (भ्वा० प०) अजिघृसिभ्यः (उ० ३–८६) इति बाहुलकात् क्तः । अधीतशब्दनिर्विवक्षया तुरीयं पाद-

उताधीतं विनश्यतीति । आध्यातमभिप्रेतम् ॥ ११ ॥

आध्यातमित्याधीतशब्दार्थः । ध्यायतेः संप्रसारणं च (वा०) इति क्विपि विहितं संप्रसारणमिह क्तेऽपि भवति बाहुलकाद्बहुलं छन्दसीति । अत्र संयोगादेरातो–(८–२–४३)रिति विहितं नत्वं नध्याख्ये(८–२–५७)ति निषेधान्न भवति ॥ अभिप्रेतमिति पर्यायवचनम् । आङ्पूर्वको ध्यायतिरुत्कण्ठापूर्वकस्मृतौ वर्तते । स्मृतिश्चिन्तनम् । चिति स्मृत्याम् (चु० प०) ॥

अथापि पदपूरणः ॥ १२ ॥ १ ॥

अथाप्येवमस्मिन्मन्त्रे पदपूरणः । पदं पादएव पूरयितव्योऽस्य भवतीत्ययं पदपूरणः ॥ १ ॥

---

१ अयं नूनमित्येष शब्दः

तद्यथा—

नूनं सा ते प्रतिवरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ॥
शिक्षा स्तोतृभ्यो मातिधग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ १॥

(ऋ. सं. २. ६. ६. ६) गृत्समदस्येदमार्षं त्रिष्टुप्। अत्र नूनमिति पादपूरणएवेति सेत्यारभ्य व्याचष्टेऽर्थतः—

सा ते प्रतिदुग्धां वरं जरित्रे ॥ २ ॥

हेइन्द्र, सा ते तव दक्षिणा (या पुत्रभावके कर्मणि ऋत्विग्भ्यो देया) मघोनी मघवती हिरण्यधान्यादिधनेन संयुक्ता (तद्वती) सती जरित्रे स्तुवते यजमानाय वरं श्रेष्ठमभिमतमर्थं प्रतिदुहीयत् प्रतिदुग्धाम् "छन्दसि परेऽपि" "व्यवहिताश्चे"ति (१–४–८२) प्रतेर्व्यवहितस्यापि प्रयोगः। किंच स्तोतृभ्योऽस्मभ्यं "कमान्" इति शेषः शिक्षा प्रयच्छ । "शिक्षतिर्दानकर्मा पठित"इति स्कन्दस्वामिभाष्यम्। आइत्ययं प्र इत्यस्यार्थे । निपातानां नानार्थत्वात्[1] । प्रदेहि । किंच मातिधक् मास्मानतिहाया-(तीत्या–) न्येभ्यो देहि (अस्मानतिक्रम्यान्येभ्यो मा दाः) प्रथममस्मभ्यं दत्वा ततोऽन्येभ्योऽपि दीयताम्। दहेर्दानार्थस्य[2] लुङि "मन्त्रे घसे–" (२–४–८०) तिच्लेर्लुक्। किंच भगो धनं नोऽस्माकमस्तु इति शेषः। येन विदथे यज्ञे (खेगृहे) बृहन्महद्भूर्जितंवदेम ब्रवाम दीयतां भुज्यतामिति । किंच (तवानुग्रहात्) सुवीराः वीरवन्तः (पुत्रवन्तः)यद्यपुत्राः । मत्वर्थीयः सुः पुरस्तात्प्रयुक्तश्छान्दसः । अथ पुत्रवन्तस्तदा शोभनवीराः सुपुत्रा भवेम ॥ वीरशब्दश्छन्दसि पुत्रपर्यायवचन इह निरुक्तः ॥ १ ॥ अथैकपदनिरुक्तम्—

वरो वरयितव्यो भवति ॥ ३ ॥

व्रियते ह्यसाविति वरः। वृ वरणे (ऋ. उ.) ऋदोरप् (३–३–५७) इत्यप् प्रत्ययःकर्मणि । जरितृशब्दं निर्वक्ति—

---

१ प्रतिपूरयतु ददात्विति यावत् दक्षिणागुणकाद्धि कर्मणः फलप्राप्तिरिति दक्षिणायामेव फलदातृत्वमुपचर्यते । सायणस्तु प्रतिदुहीयत्संपादयति तादृशीं दक्षिणां स्तोतृभ्योऽस्मभ्यं शिक्षाप्रयच्छ । किंच भगो भजनीयस्त्वं मातिधक् । यद्वा नोऽस्माकं कामान्मा धाक्षीः । अपेक्षितफलदानेन पूरयेत्यर्थः । सुवीराः शोभनपुत्रपौत्राः सन्तो वयं विदथेऽस्मिन्यज्ञे बृहत्स्तूतं स्तोत्रं वदेम त्वामुद्दिश्य ब्रवाम इत्येवं व्याख्यत् । शेषं समानम् ॥

२. ते प्राग्धातोः (१–४–८०) इति हि लौकिको नियमः । ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्या इति हि तदर्थः ॥

३. भसीकरणार्थस्यापि धातूनामर्थनिर्देशस्योपलक्षणत्वादत्र दाने वृत्तिरेवमुत्तरत्रापि बोध्यम् ॥

४. विदथशब्दो यज्ञवचनश्छन्दसि । विद ज्ञाने (अ० प० विद् विचारणे (रु० आ०) विद्लृलाभे (तु० उ०) विद् सत्तायाम् (दि० आ०) रुदिविदिभ्यां किप् (उ० ३–१११) इति अथप्रत्ययः सच किप् कित्त्वाद्गुणाभावः । ज्ञायते हि यज्ञः । लभ्यते हि दक्षिणादिरत्र विचार्यते हि विद्वद्भिः । भावयत्यनेन फलम् ॥

५. यदा स्वे गृहे यज्ञः करिष्यते तदा तत्र ।

जरिता गरिता ॥ ४ ॥

स्तुत्यर्थस्य गृणातेः (भ्वा. प.) तृचि रूपम् । गरितेति पर्यायवचनः । गृणातिरर्चतिकर्मा (निघ. ३-१४) अर्चापि स्तुत्यादिरूपैव ।

मघोनी शब्दं निर्वृते—

दक्षिणा मघोनी मघवती ॥ ५ ॥

अत्र दक्षिणा मघोनीति प्रतीकम् । मघवतीति मघोनीशब्दस्यपर्यायः ।

तदर्थं व्युत्पादयति—

मघ इति धननामधेयम् ॥ ६ ॥

तदस्यास्तीति विग्रहे "तदस्यास्त्यस्मिन्नि-" (५-२-९४) विमतुप् "मादुपधायाः" (८-२-९) इति मस्य वः ।

मघशब्दं निर्वक्ति—

मंहतेर्दानकर्मणः ॥ ७ ॥

मंहतिर्दानकर्मा (प० ३-२०-१०) घञर्थे कविधानम् (३-३-५८ वा.) इत्यत्र परिगणनस्य प्रायिकत्वात्कर्मणि कप्रत्यये पृषोदरादित्वान्नलोपो ह्रस्व घश्च भवति ॥ मंह्यते दीयते इति मघम् धनम् ॥ अथ सिंहावलोकितकेन प्रतीकोपात्तं दक्षिणाशब्दं निर्ब्रवीति—

दक्षिणा दक्षतेः समर्धयति कर्मणः व्यृद्धं समर्धयतीति ॥ ८ ॥

समर्धयत्यर्थकस्य दक्षतेर्दक्षवृद्धौ शीघ्रार्थे चेति (भ्वा. प.) धातोरौणादिक इनच् । एतदेव विवृणोति—व्यृद्धं समर्धयतीति । यज्ञे हि यत्किंचिद्विगतर्द्धिकं

३६ निरुक्तनिर्वृतिः ।

जरिता गरिता ॥ ४ ॥

स्तुत्यर्थस्य गृणातेः (भ्वा. प.) तृचि रूपम् । गरितेति पर्यायवचनः । गृणातिरर्चतिकर्मा (निघ. ३-१४) अर्चापि स्तुत्यादिरूपैव ।

मघोनी शब्दं निर्वृते—

दक्षिणा मघोनी मघवती ॥ ५ ॥

अत्र दक्षिणा मघोनीति प्रतीकम् । मघवतीति मघोनीशब्दस्यपर्यायः ।

तदर्थं व्युत्पादयति—

मघ इति धननामधेयम् ॥ ६ ॥

तदस्यास्तीति विग्रहे "तदस्यास्त्यस्मिन्नि-" (५-२-९४) विमतुप् "मादुपधायाः" (८-२-९) इति मस्य वः ।

मघशब्दं निर्वक्ति—

मंहतेर्दानकर्मणः ॥ ७ ॥

मंहतिर्दानकर्मा (प० ३-२०-१०) घञर्थे कविधानम् (३-३-५८ वा.)

साहि दक्षिणस्यां वेदिश्रोणौ—अग्रेण गार्हपत्यम्, जघनेन सदः, दक्षिणेनाग्नीध्रीयं गत्वा अन्तर्वेदि स्थित्वा अन्तरेण चात्वालोत्करौ, तमाग्नीध्रं चोत्सृज्यमाना—गच्छतीति—दिक् ॥ ११ ॥

पुनर्दक्षिणा । अत्र निदानमाह—

हस्तप्रकृतिः ॥ १२

हस्तः प्रकृतिः कारणं नामनिदानं यस्याः सा । तथाच "प्राजापत्यस्य प्रजापतेर्दक्षिणो हस्तो बभूव । सा दक्षिणादिगभवदि"त्याम्नायते । अथ—

दक्षिणो हस्तः ॥ १३ ॥

कस्मात्पुनर्दक्षिणः? इत्यनुयुक्तः[2] प्राह—

दक्षतेरुत्साहकर्मणः ॥ १४ ॥

उत्साहार्थस्य[3] दक्षधातोरुक्तदिशासिद्धिः । स यथोत्साहवान्भवति कर्मसु न तथा सव्यः ॥

---

१. सेत्येतस्या गतिक्रियायाः कर्तृपदम् । ऋत्विग्द्वारकमेव हि तस्यागमनमुपपद्यत इति गच्छन्तीति पाठो मुद्रितपुस्तकेषु दुर्गभाष्ये । सच प्रामादिकस्तत्कर्तुर्ऋत्विजोऽनुपादानादुपात्तस्य सेति कर्तृपदस्य क्रियाकाङ्क्षानिवृत्तेश्च, अयं च दुर्गभाष्यानुवादः । अस्यायमर्थः । हि यतः सा दक्षिणोत्सृज्यमाना यजमानेनोत्सृष्टा सती दक्षिणस्यां दिशि वेद्याः श्रोणौ गच्छतीति दक्षिणेत्युच्यते । कथं (केन प्रदेशेन) गच्छतीत्याह—**अग्रेणेत्यादि** । गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योऽग्निः "गृहपतिना संयुक्ते ञ्यः" (४–४–९०) इति ञ्यः प्रत्ययः । तमग्रेण गत्वा (पूज्यपूजकयोर्मध्ये प्राचीति व्यपदेशात्प्रत्यङ्मुखस्याग्नेः संमुखीनस्य प्राङ्मुखस्य यजमानस्य च मध्येनोत्तरपूर्वक्रमेणर्त्विग्गच्छतीति) सदः सदस्यस्थानं तद् जघनेन मध्यप्रदेशेन, अवच्छेदकत्वं तृतीयार्थः । प्रकृत्यादिगणाज्जाता तृतीया तु तदात्मताम् । अवच्छेदकतानुद्धिप्रकारत्वादिशंसतीति" हर्युक्तेः । अग्निमिन्धे दीपयतीत्यग्नीत् ब्रह्माग्निन्धी दीप्तौ (रु० आ०) क्विप् । तस्य स्थानमाग्नीध्रम् । "आग्नीधः शरणे रण्भं च (वा०) इति रण्णित्त्वादादिवृद्धिः । भत्वाज्जश्त्वाभावः । आग्नीध्रमेवाग्नीध्रीयम् स्वार्थेछः । तद्दक्षिणेनादूरे तस्य दक्षिणस्यां दिशि "एनबन्यतरस्यामदूरेऽपञ्चम्या" (५–३–३५) इति एनप् । "एनपा द्वितीये" (२–३–३१) ति द्वितीया अन्तर्वेदि वेद्यामध्ये स्थित्वा । अन्तरेणेत्येतद्विनाऽर्थकम् । चत्वालो गर्तविशेषः । उत्करः रक्षादिकूटः । "उत्करः कूटमस्त्रिया-" मित्यमरः । तावन्तरेण तौ विना (तौ परिहृत्य) "अन्तरान्तरेण युक्ते" (२–३–४) इतिद्वितीया । "पृथग्विनान्तरेणते" त्यमरः । तमाग्नीध्रं चेति, पृथग्वाक्यम् तमाग्नीध्रं ब्रह्माणं (तात्थ्यात्ताच्छब्द्यमिति न्यायात्) च गच्छतीति दक्षिणेत्यपि द्रष्टव्यम् ॥

२. पृष्टः । प्रश्नोनुयोगः पृच्छा चेत्यमरः ॥

३. शीघ्रार्थे ह्ययं पठितः । यो ह्युत्सहते स एव शीघ्रं कर्म कर्तुं प्रभवति । इति शीघ्रार्थस्याप्यत्रोत्साहार्थे वृत्तिः ॥

---

1 तथाच तस्याग्रेण सदसो मध्येनेति फलितोऽर्थः । अग्रावच्छेदेन गार्हपत्यं, मध्यावच्छेदेन सद इत्यक्षरार्थः । उपपदविभक्तीनां सम्बन्धोऽर्थः षष्ठ्यपवादत्वात् । उत्सर्गसमानदेशा ह्यपदा भवन्तीति महाभाष्यकृतः प्राहुः ॥

दाशतेर्वा स्याद्दानकर्मणः ॥ १५ ॥

दानकर्मणः दानार्थस्य । दाशृ दाने (भ्वा. उ.) दाश्यतेऽनेनेति दक्षिणः । पृषोदरादिः ॥ तेनैव हि प्रायेण दीयते ॥ हस्तशब्दं निर्वचनप्रसक्तं निर्ब्रवीति—

हस्तो हन्तेः ॥ १६ ॥

हन्त्यनेनेति हस्तः । पृषोदरादिः । तेन हि हन्यते । यद्यप्यन्येनापि हन्यते पादादिना, तथापि यो हन्तव्यो भवति तस्य—

प्राशुर्हनने ॥ १७ ॥

हननेऽयमेव प्राशुः शीघ्रः । झटिति समुद्यच्छमानो भवति ॥

तदेतन्निगमस्थं दक्षिणामघोनीति प्रतीकमुपादाय व्याख्यातमिदानीं शिक्षास्तोतृभ्य इति तदुत्तरं वाक्यं व्याचष्टे—

देहि स्तोतृभ्यः कामान् ॥ १८ ॥

इति । एवमुत्तरोत्तरम् । मातिधगिति व्याचष्टे—

मास्मानतिहाय दंहीः ॥ १९ ॥

अस्मानतिहायातिक्रम्य (अन्येभ्यो) मा दंहीर्मा देहि । दहिरत्र दानार्थ इति विवरीतुमाह—

मास्मानतिहाय दाः ॥ २० ॥

अस्मानतिहायातिक्रम्य मा दाः मा देहि । "माङि लुङ्" (३-३-१०५) सर्वलकारापवाद इति लोडर्थेऽत्र । "न माड्योग-" (६-४-९७) इत्यडभावः ॥

भगो नो अस्तु बृहद्वदेम ॥ २१ ॥

इत्येतन्निगदव्याख्यातम् (३७ पृ०) । विदथे इति निगमस्थपदमर्थतोनुवदति—

स्वे वेदने ॥ २२ ॥

स्वे-स्वीये (आत्मीये) वेदने विन्दते लभते सुखमस्मिन्निति वेदनं गृहम् । विदॢ लाभे (तु. उ.) "करणाधिकरणयोश्च" (३-३-११७) इति ल्युट् ॥

सिंहावलोकितकेन निगमप्रसक्तं भगपदं निर्ब्रवीति—

भगो भजतेः ॥ २३ ॥

भगशब्दः पुल्लिङ्गो धनवचनः । भज्यते सेव्यते भोगार्थिभिः । यद्वा भज्यते सेव्यतेऽनेन हेतुना तद्वान् (धनवान्) भज सेवायाम् (भ्वा. उ.) "पुंसि संज्ञाया-" (३-३- ११८) मिति घः । "चजो" (७-३-५२) रिति जस्य गः ।

बृहत्पदं व्याचष्टे—

बृहदिति महतो नामधेयम् ॥ २४ ॥

नामधेयं नामैव भवति । "वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्चे-"(उ. २. ७७) ति निपातावेतौ ॥ "भागरूपनामभ्यो धेय-"(वा०) इति स्वार्थे धेयप्रत्ययः ॥

---

१. बृहन्महच्छब्दौ ॥

कुत एतत्? इति महतो नामधेयत्वे निदानप्रश्ने आह—

परिवृढं भवति ॥ २५ ॥

परितः सर्वतो वृढं व्याप्तम्। यद्वा परिवृढं व्याप्तं यद्धि महद्भवति तत्सर्वं व्याप्नोति। तथाच वक्ष्यति "ब्रह्मपरिवृढं सर्वत"इति (निरु. १–३–३) इदानीं निगमान्तस्थं सुवीरा इत्येतद्वाक्यमर्थतो द्विधा व्याचष्टे—

वीरवन्तः । कल्याणवीरा वा ॥ २६ ॥

पुरस्तात्स्थितेन मत्वर्थलुना योऽर्थो लभ्यते सहि वीरवन्त इत्यनेनोच्यते । तत्रान्तिप्रसिद्धत्वमाशङ्क्य प्रसिद्धेन शोभनार्थेन बहुव्रीहिणा योऽर्थो लभ्यते तमर्थमाह कल्याणवीरा वेति । कल्याणशब्दार्थो वक्ष्यते मूले (नि. २–१–६) ।

इदानीं निगमान्तस्थं वीरपदमनेकधा निर्वक्ति—

वीरो वीरयत्यमित्रान् ॥ २७ ॥

अमित्रान् शत्रून्वीरयति विविधप्रकारमीरयति । क्षिपति । कम्पयति । मारयति वेति वीरः । ईर क्षेपे (चु. प.) स्वार्थणिजन्तात्पचाद्यच् । यद्वा ईर गतौ कम्पने च (अ. आ.) अन्तर्भावितण्यर्थात्पचाद्यच् । अमित्रशब्दः पुंसि । तथाच (पा.लि.) सूत्रम् "भृत्रा-ऽमित्र-छात्र-पुत्र-मन्त्र-वृत्र-मेढ्रो-ष्टाः पुंसी"ति ॥

प्रकारान्तरेण वीरशब्दं साधयति—

वेतेर्वा स्याद्गतिकर्मणः ॥ २८ ॥

गतिकर्मणो गत्यर्थेवर्त्तमानस्य वीधातोः (अ. प.) औणादिको रंक् ॥ गच्छत्येवासावभिमुखं शत्रून् ॥

वीरयतेर्वा ॥ २९ ॥

विक्रान्त्यर्थकस्य वीरधातोः (चु. आ.) विक्रान्तो विक्रम–(पराक्रम–) वानसौ भवति ॥

सीमिति परिग्रहार्थीयो वा पदपूरणो वा ॥ ३० ॥

परि सर्वतो ग्रहणं ज्ञानं परिग्रहः स अर्थो यस्य स परिग्रहार्थः स एव परिग्रहार्थीयः स्वार्थे छः । सर्वत इत्यर्थकः । तद्यथा—

प्रसीमादित्योऽअसृजत्॥ ३१ ॥ (ऋ. सं. २–७–९–४)

---

१. विषयत्वं सप्तम्यर्थः ॥

२. परिवृळहम् इति मूलपुस्तके पाठः ॥ यद्यपि पाणिनिना प्रभावेव परिवृढ इति (७–२–२१) निपातितस्तथापि अर्थसाम्यादिह महतो नामधेयनिदाने निरुक्तः । प्रभुरपि महत्तया सर्वं पोष्यवर्गं व्याप्नोत्येतावतैव परिवृढ इत्युच्यते ॥

३. मत्वर्थसोः पुरस्तात्प्रयोगस्य लोके सर्वथाऽभावो वेदेऽपि क्वाचित्कत्वमेवेति ।

४. प्रसीमादित्योऽअसृजद्विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति । न श्राम्यन्ति न विमुञ्चन्त्येते वयो नपप्तू रघुया परिज्मन् ॥ ४ ॥ विधर्ता विविधप्रकारेण रसानां रश्मीनां वा

गृत्समदस्येदमार्षत्रिष्टुप्सौरी । अस्यामेव ऋचि तावेदुभयमपि प्रदर्शयति—

प्रासृजदिति वा प्रासृजत्सर्वत इति वा ॥ ३२ ॥ इति ॥

तत्राद्यस्य प्रासृजत्सूर्यो रश्मीनित्यर्थः । सीमिति पदपूरण एव ॥ कुतोऽपीत्यविचक्षितमेवैतत्पक्षे । द्वितीयोदाहरणे सीमित्यस्यार्थः सर्वत इति ॥

परिग्रहार्थीये उदाहरणान्तरमप्याह—

विसीमतः सुरुचो वेन आवः ॥ इतिच ॥ ३३ ॥ (य. वा सं. १३-३)

स्वरश्मिजालान्तर्गतस्य सर्वस्य जगतो वा, धर्ता धारयिता । "अणोऽप्रगृह्यस्ये" (८–४–५७) त्यनुनासिकः । आदित्य अदितेरपत्यं पुमान् विवस्वान् । प्रासृजत्प्रकर्षेण सृष्टवान्सर्वतोरश्मीन् इति शेषः । (ते च सूर्यरश्मयः) सिन्धवः स्यन्दमाना (आदित्यमण्डलात्प्राञ्चो वर्तमाना) ऋतमुदकम् (आदाय पृथिवीलोकादन्तरिक्षलोकाच्च) वरुणस्य सूर्यस्य (मण्डलं) यन्ति गच्छन्ति । (तदेवमुत्सर्गादानलक्षणं स्वस्वकर्म कुर्वाणा अपि) न श्राम्यन्ति न (वा श्रान्ता अपि सन्तो विरागादप्येतत्कर्म) विमुञ्चन्ति एते (कथंपुनः पतन्तो न श्राम्यन्ति? किं शनकैः? न) वयो न वयः पक्षिण इव (शीघ्रं) पप्तुः पतन्तः रघुया लघुर्यां (लघ्व्या) श्रीघ्रिकया गत्या परिज्मन् परिजमन्तः परिगच्छन्तः सर्वमप्येतज्जगत् ॥ इत्यर्थः ॥

१. सूर्यो ह्यस्यां वरुणनाम्ना स्तूयते सोऽप्यदितेः पुत्र इत्यादित्य एव ॥

२. प्रथमम् । ततः परिग्रहार्थीयत्वे द्वितीयमुदाहरणमनुपदं वक्ष्यति ॥

३. ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः । स बुध्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ३ ॥ ब्रह्म बृहत् रुक्मारूपमादित्याख्यं प्रथममादौ पुरस्तात् (प्राच्यांदिशि[1]) जज्ञानं जायमानं दृश्यमानमिति यावत् । जनेः ज्ञानचि शपः श्लौ द्वित्वम् । गमहने–(६–४–९८) त्युपधालोपः । किंच वेनः कमनीयो मेधावी वा स आदित्यः । सुरुचः प्रशस्तरोचनात् रश्मीन् सीमतः सर्वतः वि आवः व्यवृणोत् विवृतानकरोत् । छन्दसि परेऽपि व्यवहिताश्चेति (१–४–८२) विशब्दस्य पुरस्तात् प्रयोगो व्यवहितस्य । सचार्थकाले आवरितिक्रियापदेन संबध्यते उपसर्गत्वात् । उपसर्गाः क्रियायोग (१–४–

---

1. सायणस्तु विधर्त्ता सेतुरिव जलस्य धारयिता आदित्यः । अदितेः पुत्रो वरुण ऋतं विधारणहेतुभूतं सत्यं यद्वा नदीनामुपादानभूतमुदकं सीं सर्वतः प्रासृजत्प्रकर्षेण सृष्टवान् । तेन वरुणस्यर्तेन सिन्धवः स्यन्दनशीला नद्यो यन्ति गच्छन्ति प्रवहन्ति । एते सिन्धवः न श्राम्यन्ति न प्राप्नुवन्ति न विमुञ्चन्ति नोपरता भवन्ति । अनलसाः सर्वदैकरूपेण प्रवहन्तीत्यर्थः । एतदेवोच्यते । वयो न वयः पक्षिण इव रघुयाः लघुवर्गाः शीघ्रगामिनः परिज्मन्परिज्मनि भूम्यां पप्तुः पतन्ति गच्छन्ति ॥ इत्येवं व्याख्यत् ॥ अत्र सुपां सुलुगिति ङेर्लुक् ॥

2. ते हि वर्षाकाले मेघद्वारा स्यन्दन्ते । तप्तश्च सूर्येण प्रसृष्टः सार्वलौकिकमुदकमादाय पुनः सूर्यमण्डलं प्रविशन्ति ॥

3. लडर्थे लिट्विधिः तत्रिपप्योश्छन्दसी (६–४–९९) त्युपधालोपः ॥

4. सुपां सुलुगि–(७–१–३९) ति ङेरालुगादेशे ग्राः । सायणमते जसः लुगादेशे ॥

5. तद्गुणयोगलक्षितमेव प्राच्याः प्राचीत्वम् ॥

वामदेवपुत्रो नकुलोऽनया त्रिष्टुभाऽऽदित्यं तुष्टाव ॥ तदेतत्प्रदर्शयत्यर्थतः—

व्यवृणोत्सर्वत आदित्यः ॥ ३४ ॥

व्यवृणोदिति-वि आवरित्यस्यार्थः । सीमत इत्यस्य सर्वत इति ॥

किं व्यवृणोदित्यपेक्षितमर्थतो निर्दिशति—

सुरुचश्च आदित्यरश्मयः ॥ ३५ ॥

आदित्याख्यस्य ब्रह्मणो रश्मयः किरणाः । किरणप्रग्रहौ रश्मी इत्यमरः । त एव सुरुचस्तानित्यर्थः । कुतस्ते सुरुचः इति सुरुच्शब्दं निर्ब्रवीति—

सुरोचनात् ॥ ३६ ॥

तथाच सुरुचः प्रशस्तरोचनाव्रश्मीनित्यर्थतो गम्यते । रुच दीप्तौ (भ्वा. आ.) क्विप् वेनो मेधावी ॥

अथ परिग्रहार्थीयस्य सीमिति मान्तस्य कथं सीमत इत्यकारान्तमुपादाय तसिना सीमत इति साधितमित्यनुयुक्त उत्तरमाह—

अपिवा सीमेत्येतदनर्थकमुपबन्धमाद्दीत
पञ्चमीकर्माणं सीम्नः सीमतः सीमातो मर्यातः ॥ ३७ ॥

अत्र अपिवेति भिन्नक्रमः सीम्न इत्यतः प्राग्दृष्टव्यः । सीम् अ इत्येतदनर्थकमुपबन्धं संज्ञाकरणम् (अकारम्) आददीतार्थकाले । पञ्चम्याः कर्म कार्यं "पञ्चम्यास्तसिल्" (५–३–७) इति तसिल्प्रत्ययरूपं यस्मात्पुरस्तथाभूतम् । तथाच सीमित्यर्थं सर्वशब्दसमानार्थं एव पर्यवसन्नो भवतीति व्याख्यातं सीमतः सर्वत इति ॥

---

५९) इति पाणिनिस्मरणात् किंच उपमा उप समीपे मान्ति भूतानि यासु ताः सावकाशा अतएवास्य जगतो विष्ठाः विविधं तिष्ठन्ति यासु ता विविधस्थानभूता "अम्बाम्बगोभूमी (८–३–९७) त्यादिना षत्वम् । एवंभूता नुद्यो नुन्नमन्तरिक्षं तत्र भवा दिशः विवः

वामदेवपुत्रो नकुलोऽनया त्रिष्टुभाऽऽदित्यं तुष्टाव ॥ तदेतत्प्रदर्शयत्यर्थतः—

व्यवृणोत्सर्वत आदित्यः ॥ ३४ ॥

व्यवृणोदिति-वि आवरित्यस्यार्थः । सीमत इत्यस्य सर्वत इति ॥

किं व्यवृणोदित्यपेक्षितमर्थतो निर्दिशति—

सुरुचश्च आदित्यरश्मयः ॥ ३५ ॥

आदित्याख्यस्य ब्रह्मणो रश्मयः किरणाः । किरणप्रग्रहौ रश्मी इत्यमरः । त एव सुरुचस्तानित्यर्थः । कुतस्ते सुरुचः इति सुरुच्शब्दं निर्ब्रवीति—

सुरोचनात् ॥ ३६ ॥

तथाच सुरुचः प्रशस्तरोचनाव्रश्मीनित्यर्थतो गम्यते । रुच दीप्तौ (भ्वा. आ.) क्विप् वेनो मेधावी ॥

अथ परिग्रहार्थीयस्य सीमिति मान्तस्य कथं सीमत इत्यकारान्तमुपादाय तसिना सीमत इति साधितमित्यनुयुक्त उत्तरमाह—

इदानीं शब्दसारूप्यप्रसक्तं निर्ब्रवीति-सीम्नस्सीमत इति । अपिवा-अथवा ग्रामादेर्मर्यादार्थस्य नान्तस्य सीमन्शब्दस्यापि पूर्ववत्तसिलन्तस्य "स्वादिष्विति (१-४-१७)" पदत्वान्नलोपे सीमत इति संभवतीत्याह—**सीमातो मर्यादात इति** । अत्र द्वितीयान्तात्सार्वविभक्तिकस्तसिरिति महीधरः स्वरसः ।

इदानीं निर्वचनप्रसक्तं सीमाशब्दार्थं निर्ब्रवीति—

सीमा मर्यादा विषीव्यतिदेशाविति ॥ ३८ ॥

सीमन्शब्दो मर्यादार्थः । कुतः ? देशौ पूर्वापरौ विषीव्यति विगतसन्तानाववच्छिन्नौ (विभक्तौ) करोतीति हेतोर्मर्यादा सीमेत्युच्यते । तथाच 'सीमसीमे स्त्रियामुभे' इत्यमरव्याख्यायां महेश्वरः द्वेग्रामादेर्मर्यादायामित्याह "सीमा घाटस्थिति क्षेत्रेष्वण्डकोशेषु च स्त्रिया"मिति मेदिनीच । स्थितिरत्र मर्यादा "मर्यादा धारणा स्थितिरि" त्यमरः । अयं चार्थतो निर्वचनक्रमः । सीमेति तु षिञ् बन्धने (स्वा. उ.) इत्यस्य "नामन्सीमन्नि"त्यादिना (उ० ४-१४०) मनिनन्तो निपातः । सिनोति बध्नाति देशावेतावानेवायमित्येवं सा सीमा ॥

त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम् ॥ ३९ ॥

४४ निरुक्तविवृतिः ।

इदानीं शब्दसारूप्यप्रसक्तं निर्ब्रवीति-सीम्नस्सीमत इति । अपिवा-अथवा ग्रामादेर्मर्यादार्थस्य नान्तस्य सीमन्शब्दस्यापि पूर्ववत्तसिलन्तस्य "स्वादिष्विति (१-४-१७)" पदत्वान्नलोपे सीमत इति संभवतीत्याह—**सीमातो मर्यादात इति** । अत्र द्वितीयान्तात्सार्वविभक्तिकस्तसिरिति महीधरः स्वरसः ।

इदानीं निर्वचनप्रसक्तं सीमाशब्दार्थं निर्ब्रवीति—

सीमा मर्यादा विषीव्यतिदेशाविति ॥ ३८ ॥

सीमन्शब्दो मर्यादार्थः । कुतः ? देशौ पूर्वापरौ विषीव्यति विगतसन्तानाववच्छिन्नौ (विभक्तौ) करोतीति हेतोर्मर्यादा सीमेत्युच्यते । तथाच 'सीमसीमे स्त्रियामुभे' इत्यमरव्याख्यायां महेश्वरः द्वेग्रामादेर्मर्यादायामित्याह "सीमा घाटस्थिति क्षेत्रेष्वण्डकोशेषु च स्त्रिया"मिति मेदिनीच । स्थितिरत्र मर्यादा "मर्यादा धारणा स्थितिरि" त्यमरः । अयं चार्थतो निर्वचनक्रमः । सीमेति तु षिञ् बन्धने (स्वा. उ.) इत्यस्य "नामन्सीमन्नि"त्यादिना (उ० ४-१४०) मनिनन्तो निपातः । सिनोति बध्नाति देशावेतावानेवायमित्येवं सा सीमा ॥

ऋचामेकः पोषमास्ते पुपुष्वान्होतर्गर्चनी ॥ ३ ॥

य एते चत्वारो महर्त्विजस्तेषां मध्ये एको होता यज्ञकाले स्वकीयवेदगतानाम् ऋचां पोषं यथाविधिकर्मणि प्रयोगं पुपुष्वान् (एको धातुरनुवादार्थः) बह्वीर्ऋचः पुष्यन् शंसन् आस्ते । इतीयमृक् अर्चनी । अर्च्यते स्तूयतेऽनयेति करणे ल्युट् (३-३-११७) टित्वान्ङीप् ऋच् स्तुतौ (भ्वा. प.) तदेतदृक्शंसनैकर्म होतरि विनियुक्तम् । उक्तंच "यदृचैव होत्रं क्रियत"इति (ऐ० ब्रा ५-५-८) ॥ अथ द्वितीयं पादं विवृणोति—

गायत्रमेको गायति शाक्करीष्वृद्गाता ॥ ४ ॥

एक उक्तादन्य उद्गाता । गायत्र गायत्रशब्दाभिधेयं स्तोत्रं साम, शक्करीषु शक्करी-

प्रथमोऽध्यायः । ४५

ऋचामेकः पोषमास्ते पुपुष्वान्होतर्गर्चनी ॥ ३ ॥

य एते चत्वारो महर्त्विजस्तेषां मध्ये एको होता यज्ञकाले स्वकीयवेदगतानाम् ऋचां पोषं यथाविधिकर्मणि प्रयोगं पुपुष्वान् (एको धातुरनुवादार्थः) बह्वीर्ऋचः पुष्यन् शंसन् आस्ते । इतीयमृक् अर्चनी । अर्च्यते स्तूयतेऽनयेति करणे ल्युट् (३-३-११७) टित्वान्ङीप् ऋच् स्तुतौ (भ्वा. प.) तदेतदृक्शंसनैकर्म होतरि विनियुक्तम् । उक्तंच "यदृचैव होत्रं क्रियत"इति (ऐ० ब्रा ५-५-८) ॥ अथ द्वितीयं पादं विवृणोति—

गायत्रमेको गायति शाक्करीष्वृद्गाता ॥ ४ ॥

एक उक्तादन्य उद्गाता । गायत्र गायत्रशब्दाभिधेयं स्तोत्रं साम, शक्करीषु शक्करी-

अथैतस्मिन्नर्थे निगमं प्रमाणयञ्छकरीशब्दे वृत्तिं दर्शयति—

तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छकरीणां शाकरीत्वमिति विज्ञायते ॥७॥

यद्यस्मादाभिरभिष्टुत इन्द्रो वृत्रमसुरं हन्तुमशकत् तत्तस्माच्छकरीणामृचां शाकरीत्वमित्येवमैन्द्रब्राह्मणेऽपि (५–२–२) शक्नोतेरेव शक्र्य इति विज्ञायते । लिङ्गतोऽपि हि दर्शितं भवति आख्यातजानि नामानीति ॥

४६ निरुक्तविवृतिः ।

अथैतस्मिन्नर्थे निगमं प्रमाणयञ्छकरीशब्दे वृत्तिं दर्शयति—

तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छकरीणां शाकरीत्वमिति विज्ञायते ॥७॥

यद्यस्मादाभिरभिष्टुत इन्द्रो वृत्रमसुरं हन्तुमशकत् तत्तस्माच्छकरीणामृचां शाकरीत्वमित्येवमैन्द्रब्राह्मणेऽपि (५–२–२) शक्नोतेरेव शक्र्य इति विज्ञायते । लिङ्गतोऽपि हि दर्शितं भवति आख्यातजानि नामानीति ॥

ब्रह्मा परिबृढः श्रुततः ॥ १० ॥

श्रूयत एव (न परं केनचित्क्रियते–) इति श्रुतो वेदः । कर्मणि क्तः । तस्मादिति

प्रथमोऽध्यायः । ४७

ब्रह्मा परिबृढः श्रुततः ॥ १० ॥

श्रूयत एव (न परं केनचित्क्रियते–) इति श्रुतो वेदः । कर्मणि क्तः । तस्मादिति

अथ विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्वमाचष्टे—

अध्वर इति यज्ञनाम ॥ १५ ॥

कथम्—[1]

ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधः ॥ १६ ॥

हिंसाकर्मा हिंसार्थकः (निघ० २–१९) ध्वरधातुः । तस्मा"द्धनर्थे कविधानमि"ति अधिकरणे कः । ध्वर्यन्ते बध्यन्तेऽस्मिन्निति ध्वरस्तत्प्रतिषेधो न ध्वरोऽध्वर इति । अहिंसो हि यज्ञः । यत्किंचित्पशुबीजादिकमत्र हिंस्यते साऽभ्युदयहेतुत्वात्तेषां हिंसा न भवति । द्वेषपूर्वको हि प्राणिवधो हिंसा । न तथात्रेति भवति सोऽध्वरः । तथाच श्रुतिः "न वा उ एतस्मिन्म्रियसे" (य० वा० सं० २१–१६) इति । स्मृतिश्च "कुशत्वमिच्छन्ति तृणानि राजन्" इति ॥

निपात इत्येके ॥ १७ ॥

अयं त्वशब्दो निपात इत्येके आचार्या मन्यन्ते ॥

एवंसति पूर्वाभ्युपगतेऽनुदात्तत्वे (नि. १–३–२) शङ्कते—

तत्कथमनुदात्तप्रकृति नाम स्यात् ॥ १८ ॥

तदेतत्त्वेतिशब्दस्वरूपमनुदात्तस्वभावं सत्कथं नाम स्यात् । (यद्भवतोक्तं सर्वनामानुदात्तमिति) उत्तरमाह—

दृष्टव्ययं तु भवति ॥ १९ ॥

दृष्टानुविधिश्छन्दसि भवतीति दृष्टव्ययत्वान्नामेति तद्भवति । तुशब्दोऽत्र भेदार्थ उत्तरपक्षतां ध्वनयितुम् ॥ यद्वा हेतुसमुच्चयार्थ एव तुशब्दः । अयंभावः । यद्यपि "फिषोऽन्त उदात्तः"(फि० सू० १–१) इति फिट्सूत्रं फिषः प्रातिपदिकस्यान्तोदात्तत्वं विदधाति, "निपाताआद्युदात्ताः" (फि० सू० ४–८०) इतिचाद्युदात्तत्वं, तथापि "त्वत्त्वसमसिमे"त्यनुवानी (फि०सू०४–९)ति फिट्सूत्रं तदपवदति। तथा चापवाद-

१. किमयं रूढ एव घटपटादिवदुत योगार्थोऽप्यत्र कश्चिद्घटत इति प्रश्नः ॥

२. यद्वा ध्वरणं ध्वरो न ध्वरो यस्मिन्सोऽध्वरः । तत्प्रतिषेध इत्यस्य तस्य प्रतिषेधोऽस्मिन्निति बहुव्रीहिः ॥

३. निपातत्वं त्वेकेषां केषांचिन्मतं तत्तु विभक्तिदर्शनादेवापातरमणीयं वाङ्मात्रमिति कृत्वा नावधारितं, निपातत्वेनैतदपि सन्दिह्यत इति कृत्वा निपातकाण्डे उदाहृतः । इत्युक्तमधस्तात् ॥

४. दृष्टमनु यथा प्रयोगदर्शनं विधिर्विधानं छन्दसि भवतीति बाहुलकबलेन महाभाष्यकारः पतञ्जलिरप्याह । अतएव दृष्टव्ययत्वं छन्दसः । व्ययो व्यत्ययो यथास्थितसामान्यनियमपरिवर्तनमिति यावत् । तथाचोक्तम् "सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयडांच । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेनेति ॥ उपग्रहः परस्मैपदात्मनेपदे । नरः पुरुषः प्रथमादिः । स्वर उदात्तादिः । कर्तृशब्दः कारकमात्रपरः । तथाच तद्वाचकानां कृत्तद्धितानां व्यत्ययः । यकिति मत्याहारः । यडो यशब्दादारभ्य लिङ्थाशिष्यडिति कक्षावेण ॥

स्मरणाच्चयदर्शनाच्च अनुदात्तमपि सदेतश्चामैव भवतीति ॥ वस्तुतस्तु । निपाता अप्याद्युदात्ता भवन्तीति (फि० सू० ४–११) कृतापवादत्वाद्दृष्टाव्ययत्वाच्चना-मैवैतस्युपपन्नमिति दुर्गः ॥

क्व पुनरस्य व्ययो दृष्ट इत्यपेक्षायामाह—

उत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायाम् ॥ २० ॥

एकवचने व्ययो दृष्टः । त्वमित्ययमन्त्रोदात्तः सच निपातस्वरेणैव भवितुमर्हति । एवम्—

उतो त्वस्मै तन्वं विसस्र इति चतुर्थ्याम् ॥ २१ ॥

सर्वनामत्वान्ङेः स्मै (७–१–१४) ॥ मन्त्रार्थस्तु (नि. १–६–पा.) उपरिष्टाद्व्याख्यास्यते ॥

अथापि प्रथमाबहुवचने ॥ २२ ॥ ३ ॥

व्ययो दृष्टः । स यथा–॥ ३ ॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ॥
आदघ्नास उपकक्षास उत्वे ह्रदा इव स्नात्वा उत्वे ददृश्रे ॥ १ ॥
(ऋ. स. ८–२–२४–७)

आङ्गिरसस्य वृहस्पतेरार्षं विद्यासूक्तं त्रिष्टुप् ॥ अक्षण्वन्त इत्यस्यार्थं निर्विवक्षुराद्यपादमस्या अर्थतो व्याचष्टे—

अक्षिमन्तः कर्णवन्तः सखायः ॥ २ ॥

अक्षि विद्यते येषामित्यर्थे "तदस्यास्त्यस्मिन्निति (५–२–९४) मतुपि "छन्दस्यपि दृश्यत (७–१–७६) इति अक्षिशब्दस्यानङि । अनो नुट् (८–२–१६) इति मतुपो नुडागमे अक्षण्वन्तः । लोके पुनरक्षिमन्तः । अक्षिसंयुक्ताः । एवं कर्णवन्तः कर्णबिललक्षणाकाशवन्तः । उपलक्षणमेतदन्येषामप्यङ्गानाम् । तथाच समानेन्द्रियाः समानोदरपृष्ठपाणिपादाः । अतएव सखायः समानं ख्यानं (ज्ञानं) येषां ते बाह्येन्द्रियेषु समानज्ञाना इत्यर्थः ॥

अथात्रैकपदनिरुक्तम्—

अक्षिचष्टेः ॥ ३ ॥

पश्यत्यर्थस्य चक्षिङ्धातोः (अ. आ.) क्तिरौणादिकः । स्को (८–२–२९) रिति कलोपः । षस्य कत्वं सस्य षत्वं बाहुलकाच्चक्षिङः ख्याञ् (२–४–५४) इति

---

१. सर्वनामत्वेऽप्युदात्तत्वं छान्दसत्वाद्व्यत्ययं दर्शयति । यद्यपि तत्र स्वाङ्गशिटामदन्तानामिति (फि० सू० २ पा.) शिटः सर्वनाम्न आद्युदात्तत्वं विहितं तथापि तदौत्सर्गिकम् । त्वत्वसमत्तिमेत्यनुचानीति (फि० सू० ४ पा.) विशिष्यानुदात्तत्वविधानात् । विशेषविधिश्चौत्सर्गिकस्यापवाद एवेति सूपपादितं प्राक् ॥

२. उत त्वम् उतो त्वस्मै इत्येतद्वाक्य–(पाद–) घटितमन्त्रयोरर्थस्त्वित्यर्थः ॥

३. अनेकार्थत्वाद्धातूनां व्यक्तवाग्यर्थकस्यापि पश्यत्यर्थकत्वम् ॥

स्थानादेशाभाव इडभावश्च । चलोपश्च पृषोदरादित्वात् । ख्यायते (दृश्यते) ख्यनेन सर्वमित्यक्षि ॥

अनक्तेरित्याग्रायणः ॥ ४ ॥

व्यक्त्यर्थस्याञ्जधातोः (रु. प.) औणादिकः क्सिरनिदितामि-(६-४-२४) ति नलोपः । चोःकु-(८-२-३०) रिति कुत्वं चर्त्वं सस्य षत्वं च अनक्षि व्यक्तं भवतीत्यक्षि । इति अग्रस्यापत्यमाग्रायणः "नडादित्वात् (४-१-९९) फक् । फस्यायन् (७-१-२) । आग्रायण आचार्यो मन्यते ॥ यद्यप्यङ्गान्तरमपि व्यक्तमेव भवति तथापीदं तैजसत्वादन्येभ्योऽङ्गेभ्यो व्यक्ततरं भवति ॥ अत्रार्थे श्रुतिं प्रमाणयति—

"तस्मादेते व्यक्ततरे इव भवत" इति ह विज्ञायते ॥ ५ ॥

यस्मादेते तेजोऽवयवभूयिष्ठे तस्मात्कारणादित्येवं तच्छन्दबलाद्यच्छन्दमध्याहृत्य व्याख्याक्रमो निरुक्तशास्त्रकृच्छैलीपरिशीलितोऽन्यत्रापि यथावसरमूह्यः । एते अक्षिणी इतरेभ्योऽङ्गेभ्यो व्यक्ततरे स्पष्टतरे (प्रकाशतरे) भवतः । अन्धकारेपि ह्येते प्रकाशेते एव नक्तंचरादीनां न तथेतराण्यङ्गानि । एवं ब्राह्मणेऽपि अनक्तेरेवाक्षिणी इति ह विज्ञायते ॥

कर्णः कृन्ततेर्निकृत्तद्वारो भवति ॥ ६ ॥

कृती च्छेदने धातोः (रु. प.) औणादिकोऽन्प्रत्ययः । गुणः । पृषोदरादित्वात्तस्य नः णत्वम् ॥ यद्वानिष्टान्त एव पृषोदरादिः । उभयथापि निकृत्त (छिन्न-) द्वार इति कर्णो भवति । गर्भावस्थायामेव केनापि निर्मितबिल इत्यर्थः ॥

ऋच्छतेरित्याग्रायणः ॥ ७ ॥

गत्यर्थस्य ऋधातोः (भ्वा. प.) औणादिकः कर्मणि नन्धातोः कुटागमश्च । गुणो णत्वं च ॥ ऋच्छन्ति (गच्छन्ति) शब्दा एताविति कर्णावित्येवमाग्रायणो मन्यते ॥ ब्राह्मणमप्येतस्मिन्निर्वचने प्रमाणयति—

ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते ॥ ८ ॥

ऋच्छन्ती-(गच्छन्ती-) वैतौ खे आकाशेऽभिव्यक्ताः (सन्तः) शब्दाः । एतावपि च उदगन्तां प्रत्युद्गच्छत इव ग्रहणाय । विचार्यमाणे ज्ञायते खे[2] कर्णाविति ॥

द्वितीयपादमर्थतो व्याचष्टे—

मनसां प्रजवेष्वसमा बभूवुः ॥ ९ ॥

एवंभूता अप्येते मनसां सुखाद्युपलब्धिसाधनेन्द्रियाणां[3]-(मन्तरिन्द्रियाणां) प्रजूयन्ते गम्यन्तेऽत्रेति प्रजवा गम्यप्रदेशाः प्रज्ञाद्याः । जु इति सौत्रो धातुर्गतौ वेगे च

---

१. पाघ्राध्मेति (७-३-७८-) ऋच्छादेशःशिति (शपि) परे विग्रहवाक्ये दर्शितः । एवमन्यत्रापि ऊह्यम्

२. शरीरस्य शिरसो वा ऊर्ध्वं गते (उच्चैः स्थिते) स्थाने आकाशलक्षणे ॥

३. पुरुषभेदाद्बहुवचनम् । मनो हि प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं चेति न्यायविदो वदन्ति ॥

तस्मात्कर्मणि "ऋदोरप् (३-३-५७) इत्यप्प्रत्ययः । तेषु (मनोगम्येषु) असमा असुल्या बभूवुः भवन्ति । छान्दसो लिट् ॥ केचिद्वूहापोहनधारणाप्रवक्तृत्वसमर्थाः । केचित्ततोऽनल्पाः । केचिरत्वमेधस एव ॥

कथमसामान्यमिति तृतीयपादमर्थतोव्याख्यन्-दृष्टान्तेन प्रतिपादयति—

आस्यदघ्ना अपर उपकक्षदघ्ना अपरे ॥ १० ॥

आस्यं प्रमाणं येषां ते आस्यदघ्नाः "प्रमाणे द्वयसज्दघ्नञ्मात्रच" (५-३-३६) इति ऊर्ध्वमाने दघ्नच्प्रत्ययः । आस्यदघ्ना एव आदघ्नाः । पृषोदरादित्वादास्यशब्दस्याकारादेशः स्यशब्दलोपो वा आदघ्ना एव आदघ्नासः । आज्जसेरसुगि-(७-१-५०) ति जसोऽसुगागमश्छान्दसः । हृदा इवेति तुरीयपादस्थमत्रानुसन्धीयतेऽर्थवशादुपमानलाभाय । तथाचास्यप्रमाणोदका हृदा इवेति मध्यमप्रज्ञानाह । अपरे इति त्वे इत्यस्यार्थौ । सर्वनामत्वाज्जसः शी (७-१-१७) भावः । अथ मध्यमप्रज्ञानाह उपकक्षदघ्ना इति । कक्षस्य समीपमुपकक्षं तत्प्रमाणं येषान्त उपकक्षदघ्नाः पूर्ववदत्रापि साधनप्रक्रियोह्या । कक्षो बाहुमूलम् "बाहुमूले उभे कक्षा" वित्यमरः । कक्षसमीपप्रमाणोदका (अल्पोदका)[1] हृदा इवेति । उः पादपूरण एव ॥ तथाचात्र आदघ्नास इत्यतिपरोक्षवृत्तिं तमिमं परोक्षवृत्तितामास्यदघ्ना इत्यनेन संपाद्यास्यप्रमाणेदाका इत्येवं प्रत्यक्षवृत्तितामापादितवान् ॥ इति ध्येयम् ॥

अथात्रैकपदनिरुक्तम्—

आस्यमस्यतेः ॥ ११ ॥

क्षेपार्थस्यासुधातोः (दि. प.) ऋहलोर्ण्यदिति (३-१-१२४) ण्यत् । अस्यते क्षिप्यते स्रोतदाभिमुख्येनान्नमित्यास्यम् ॥

आस्यन्दत एनदन्नमिति वा ॥ १२ ॥

आङुपसृष्टस्य स्रवणार्थस्य स्यन्दतेः (भ्वा० आ०) अन्येष्वपि दृश्यते-(३-२-१०१) इति डः । अन्नं कर्तृ । एनदिति कर्म । अन्वादेशे नपुंसके एनद्वक्तव्य (२-४-३४ वा.) इति एनदादेशो द्वितीयैकवचने । एतदास्यमास्यन्दते द्रवीकरोत्यन्नम् । यद्वा एनदिति कर्तृ बाहुलकात्प्रथमैकवचनेऽप्येनत् । अन्नं (शुष्कमपि) प्राप्यासमन्तात्स्रवत्येव श्लेष्माणं येन तदार्द्रीकृतं प्रसितुं शक्यते ॥ अथ दघ्नशब्दं परिमाणार्थकं नाम मत्वा निर्वक्ति—

दघ्नं दध्यतेः स्रवति कर्मणः ॥ १३ ॥

स्रवत्यर्थस्य दधधातोः कर्मणि बाहुलकादौणादिको नन् इडभावश्च । स्रुततरमिव

---

१. ईषदल्पाः । नञोऽत्राल्पार्थे वृत्तिः । अनुदरा कन्येत्यत्र यथा । पठन्ति च । तस्यादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः । इति ॥ अब्राह्मणः । अपापम् । अनश्वः । अपशवो वाऽन्येगोऽश्वेभ्यः । अधर्म इति शिष्टमुदाहरन्ति ॥

२. प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतावुभाविति हि नियमस्तथा चात्र (सूत्रे) प्रमाणपदमूर्ध्वमानपरमेतद्विषये ॥

तद्भवत्युत्तरात्परिमाणात् ॥ यद्यप्ययं रुधादौ घातने पालने च पठितो न दिवादौ तथापि यास्कवचनादिवादित्वं स्नवत्यर्थकत्वं च कल्प्यते । उक्तं च । दिवादिस्तु भ्वादिवदाकृतिगणत्वेन क्षीयते मृग्यतीत्यादिसिद्धिरितीति ॥ एतच्च शब्दसारूप्याद-न्यथापि निरुक्तं, प्रकृते तु दघ्नच्प्रत्यय एव प्रमाणार्थ इति व्यक्तमुक्तमधस्तात् ॥

दस्यतेर्वा स्याद्विदस्ततरं भवति ॥ १४ ॥

उपक्षयार्थस्य दसुधातोः (दि. प.) औणादिको नन्तस्य धो बाहुलकादिड्-भावश्च । दस्यतेर्वा दघ्नं स्यात् । इत्येवमपरथा व्युत्पाद्यार्थतो निर्ब्रवीति–विदस्ततर-मुपक्षीणतरं तद्भवत्युत्तरस्मात्परिमाणादिति ॥

अथ तुरीयं पादमर्थतो व्याचष्टे—

प्रस्नेया ह्रदा इवैके प्रस्नेया ददृशिरे स्नानार्हाः ॥ १५ ॥

स्नात्वा इत्यस्यार्थतो निर्वचनं प्रस्नेया इति । तत्रहि स्नातेः (अ. प.) कृत्यार्थे (२–४–१४) त्वन् प्रत्ययः । सचार्हे कृत्यतृचश्च (३–३–१६९) इत्यर्हार्थे भवति । अत्रापि प्रकर्षेण स्नातुं योग्या इत्यर्थे स्नातेः अचो यत् (३–१–९७) इति यत् । ईद्यती–(६–४–६५) तीत्वे गुणे प्रस्नेया इति स्नानार्हा अक्षोभ्योदका इति तदर्थः । एवंभूता ह्रदा इव एके प्रधानभूता महान्तः प्रज्ञया प्रस्नेया अगाधाः (अगा-धप्रज्ञाः) ददृशिरे दृश्यन्ते । छान्दसो लिट् वर्त्तमान इह भवति । अत्र त्वेइत्यस्यार्थ एके इति । ददृश्रे इत्यस्य च ददृशिरे इति । उः पादपूरण एव ॥

अथात्रैकपदनिरुक्तम्—

ह्रदोह्रदतेः शब्दकर्मणः ॥ १६ ॥

(अव्यक्त) शब्दार्थस्य ह्राद्धातोः (भ्वा. आ.) पचाद्यच् । बाहुलकाद्भस्वः । शब्दं ह्रसावभिहन्यमानः करोतीति ह्रदः ॥ प्रकारान्तरेण निर्वक्ति—

ह्रादतेर्वा स्याच्छीतीभावकर्मणः ॥ १७ ॥

शीतीभावार्थस्य ह्रादी सुखेचेति धातो–(भ्वा. आ.) रुक्तवत्सिद्धिः । लस्य रत्वं पृषोदरादित्वात् । ग्रीष्मेऽप्यसौ शीतल एव भवज्जनान् सुखयतीति ह्रद इत्युच्यते ॥

अथापि समुच्चयार्थे भवति ॥ १८ ॥ ४ ॥

अथापि अयमपरो निपातः समुच्चयार्थे भवत्येकतमः । त्वत् इति ॥ ४ ॥

अथास्योदाहरणम्—

पर्याया इव त्वदाश्विनम् ॥ १ ॥ (ऋ. प्रा. १२–१०)

इत्याह । किमुक्तं भवति—

आश्विनञ्च पर्यायाश्चेति ॥ २ ॥

इत्येवम् । त्वदिति समुच्चयार्थे भवति ॥

---

१. अशीतस्य शीतभवनं शीतीभावः । अभूततद्भावे "कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः"–(७–४–५०) इति च्विः । 'अस्य च्वा'–(७–४–३२) इतीत्वम् ।

अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिमिति ॥ ३ ॥

पदपूरणसामान्यानुक्रमेऽयमथशब्दः । पूर्वं हि व्याख्याताः केऽपि सङ्कुचार्थीयाश्चादयः । (१-२-३) तत्प्रसङ्गेन हीत्येवमादयोऽनर्थका अप्युक्ताः । (१-२-४) प्रतिज्ञाप्रसक्तानेवाधुना पदपूरणान्वक्ष्यति । तत्सामान्यलक्षणन्तावदनुक्रम्यतेऽनेन । प्रवृत्ते—परिसमाप्ते अन्यैरेव वाक्यगतैः पदैरिति शेषः । अमिताक्षरेषु ग्रन्थेषु गद्यग्रन्थेषु । त एव मिताक्षरेषु पदपूरणा भवन्ति । उभयत्रापितु ते अनर्थकाः अर्थान्तरावाचकाः ॥ कतमे पुनस्ते—इत्याह "कम् इम् इत् उ" इति[1] ॥ एते हि प्रायेण पदपूरणा एव । अन्ये पुनः "इव-न-चित्-न्वा"दयोऽर्थवन्तोऽपि । अर्थासम्भवे पदपूरणा भवन्ति । लक्षणं हि तानपि व्याप्नोति[2] । एते पुनः प्रायेणानर्थका एवेति विशेषतो निर्दिश्यन्ते । अथवा ते प्रायेणार्थवन्तः कदाचिदनर्थका इत्यतो विशेषतो निर्दिश्यन्ते[3] ॥

अधुनोक्तान्कमीमिदून्समासतः प्रत्येकमुदाहरणैर्दर्शयति—

निष्ट्रक्कासश्चिदिन्नरो भूरितोका वृकादिव ॥
विभ्यस्यन्तो वकासिरे शिशिरञ्जीवनायकम्[4] ॥ ४ ॥

---

१. प्रकृतादर्थान्नकिञ्चिदर्थान्तरं द्योतयन्ति । पदमेव वाक्यमेव वा पूरयितव्यमित्ययमेव हि तेषामर्थो नान्यदर्थान्तरमस्ति । उक्तञ्च—

क्रिया वाचकमाख्यातमुपसर्गो विशेषवत् ॥
सत्वाभिधायकं नाम निपातः पादपूरणः ॥ १ ॥ इति ॥

२. उपलक्षणमेतदुक्तानां खलु-नून-मित्यादीनामनुक्तानाञ्च घादीनां, तद्यथा—

आ-घा-ता-गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामिम् ॥
उपबर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे ! पतिम्मत् ॥ १ ॥
(ऋ. सं० ७-६-७-१०)

भ्रातृभगिन्योः संवादोऽयम् ॥ काचिद्भ्रातरं पतिं कामयतेस्म बाल्याद्वालिश्याद्वा । तदा विज्ञानसम्पन्नो भ्राता तां बोधयति । हे सुभगे आ-गच्छान्-आगमिष्यन्ति ता-तानि उत्तरा-उत्तराणि युगानि-कालविशेषाः यत्र जामयो भगिन्यः अजामिं-भ्रातरं पतिं कृणवन्-करिष्यन्ति । यस्मादेवंतस्मात्त्वमिदानीं मत्मत्तोऽन्यं पतिं भर्त्तारमिच्छस्व कामयस्व । तदनन्तरं वृषभाय तव योनौ रेतः सेक्ते पुरुषायात्मीयं बाहुमुपबर्बृहि शयनकाले उपबर्हणं कुरु । इतिहि मन्त्रार्थः । अत्र "घा" इत्यनर्थकः पदपूरणः ॥

३. इति तेष्वतिव्याप्तिवारणाय स्वरूपतोऽप्येषां निर्देश उक्तः ॥

४. इदन्त्वत्रावधेयम् पूर्वोक्तस्य विनिग्रहाद्यर्थी यस्यायमपवाद इति विज्ञायेतेति ॥

५. संक्षेपतः ॥ ६. एतद्वचनं कल्पमिति न दृढं प्रतीमः । दुर्गेण तु केचिदेवं कृतशोषमधीयत इत्युक्तम् । ऋचितु—मुञ्चामि त्वा हविषा जीवनाय कम् । अज्ञातयक्ष्मादुत राजयक्ष्मात् ॥ (ऋ. सं. ८-८-१९-१) इति पठ्यते । अत्र सायणः । हे यक्ष्माभिभूत ! हविषाऽनेन चरुणा साधनेन त्वा त्वामज्ञातयक्ष्मादयमेतत्संज्ञ इत्यप्रज्ञातः शरीरगतो रोगोऽ-

चिदिन्नरः केचिन्मनुष्याः निष्कासः निर्धनाः । अपिच । भूरितोका बहुपत्याः (दरिद्राः) वृकान्मार्गरोधकात्स्तेना-(निघ० ३-२४) च्छृगालादिव बालघातकाद्धि-मादिति शेषः बिभ्यस्यन्तः पुनःपुनर्भृशं वा बिभ्यतः सन्तः हेमन्ते ववाशिरे पुनः पुनर्भृशं वा वाशन्ते कुत्सितं शब्दं कुर्वन्ति । वाशृ शब्दकुत्सायाम् (भ्वा. आ.) किम्—

शिशिरं जीवनाय ॥ ५ ॥

शिशिरमस्माकं जीवनाय, आगच्छतीति शेषः । अल्पतरशीतं हि शिशिरं सुखं तत्र जीविष्याम इत्यभिप्रायाः ॥ अत्र (मन्त्रे) कमित्यनर्थकः पादपूरण एवेति स नोक्तः ॥ अथ निगमप्रसक्तं शिशिरशब्दं द्विधा निर्ब्रवीति—

शिशिरं शृणातेः शान्नातेर्वा ॥ ६ ॥

हिंसार्थकस्य शृधातोः (क्रया. उ.) अजिरशिशिरेत्यादिना (उ. १-५३) निपातः । शृणाति हिनस्तीति शिशिरम् । अर्धर्चादिः (२-४-३१) । अथवा शान्नातेर्हिंसार्थस्यैव । नार्थकृतो विशेषः किन्तुसाधनकृतः । हिनस्ति तस्मिन्कालेऽप्रति-बध्यमानो दवाग्निरतिशयेन शुष्कानोषधिवनस्पतीन् इति ॥

अथ ईमित्यस्योदाहरणम्—

एमेनं सृजतासुते ॥ ७ ॥ (ऋ. सं. १-१-१७-२)

इति । एषैन्द्री गायत्री मधुच्छन्दस आर्षम् ॥ अत्र ईमिति पदपूरण इति बोध-यितुं पादार्थमाह—

आसृजतैनंसुते ॥ ८ ॥

मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये ॥ २ ॥ इत्यस्य शेषः । हे अध्वर्यवः ! सुतेऽभिषुते चमसस्थे सोमे एनं सोममिन्द्रायेन्द्रार्थमासृजत आभिमुख्येन सृजत । पुनरभ्युन्नयतेति सायणः । कीदृशमेनं मन्दिं हर्षहेतुं चक्रं साधुकरणशीलं

ज्ञातयक्ष्मस्तादृशादुत राजयक्ष्माद्रोगात् मुञ्चामि मोचयामि (अन्तर्भावितण्यर्थः) विश्लेष-यामि । किमर्थं जीवनाय कम् । जीवनार्थम् । इहलोके चिरकालावस्थानायेत्यर्थः । कमिति पदपूरक एवेति ॥

१. अत्र किं शब्दोऽनुक्तोऽप्यर्थवशादध्याहृतः । इदितिपदपूरण एवेति वयमुत्पश्यामः ॥

२. वशयन्त इतिदुर्गः । वशकान्तौ (अ. प.) व्यत्ययेन इयन्नात्मनेपदे । कान्तिरिच्छा । भृशमिच्छन्तीत्यर्थः ॥

३. शीतार्त्तस्य दन्ताभिघातपूर्वकः शब्दो दारिद्र्यमूलकः कुत्सित एव भवतीति भावः ॥

४. अन्येत्वाहुः । तत्रहि प्रायेण प्रचुराणि शरद्धान्यानि भवन्तीति शिशिरजीवनार्थं तेषाम् ॥ इति ॥

५. अथं क्रयादावपठितोऽपि वैदिकत्वात्तत्रोक्तः । तथाच "बहुलमेतन्निदर्शन"मिति धातु-पाठपठितगणवार्त्तिकमुपादायोक्तम्-(सि. कौ.) अन्येतु दशगणीपाठो बहुलमित्याहुः । तेनापठिता अपि सौत्रलौकिकवैदिका बोध्या इति ॥

६. शुक्रामन्थिचमसगणे पुनरभ्युन्नयनमापस्तम्बेनोक्तम् । तथाचाग्निष्टोमप्रकरणे आ० सूत्रम् "होत्रकारणं चमसाध्वर्यवः सकृत्सकृदुत्वा शुक्रस्याभ्युन्नीयोपावर्त्तध्वमिती"ति ॥

कीदृशायेन्द्राय मन्दिने हर्षयुक्ताय । विश्वानि सर्वाणि कर्म्माणि चकृवे कृतवते सर्वकर्म्मनिष्पादनशीलायेत्यर्थः ॥ २ ॥

अथेदित्यस्योदाहरणम्—

तमिद्वर्द्धन्तु नो गिरः ॥ ९ ॥ (ऋ. सं. ७–१–२०–१४)

इति । गायत्र्येषा सौमी । अमहीयोरङ्गिरसस्येयमार्षम् ॥ अत्रेदिति पादपूरण इति बोधयितुं पादार्थमाह—

तं वर्द्धयन्तु नोगिरः स्तुतयः ॥ १० ॥

वत्सं संशिश्वरीरिव । य इन्द्रस्य हृदंसनिः ॥ १४ ॥ इत्यस्याः शेषः ॥ अर्थश्च–नोऽस्माकमेता गिरो प्रावस्तुतौ विनियुक्ता वाचः स्तुतिरूपास्तं सोमं वर्द्धन्तु वर्द्धयन्तु (अन्तर्भावितण्यर्थः) । यः सोमः इन्द्रस्य हृदंसनिर्हृदयस्य सम्भक्ता । तत्र दृष्टान्तः । वत्सं बालं शिश्वरीरिव[1] यथा शिश्वर्यो बद्धपयस्का मातरो वत्सं वर्द्धयन्ति तद्वदिति ॥ १४ ॥ अथ निगमप्रसक्तं "गिर"–इत्येतन्निर्वक्ति—

गिरोगृणातेः ॥ ११ ॥

गृशब्दे इति धातोः (क्र्या. प.) क्विप् । ऋत इद्धातोः (७–१–११०) इतीत्वं रपरत्वम् ।

अथोकारस्योदाहरणम्—

अयमु ते समतसि ॥ १२ ॥ (ऋ. सं. १–२–२८–४)

इति । शुनःशेफो (हरिश्चन्द्रमखे वधाय) नियुक्त आत्मानं मोचयितुमिच्छन्नेतया गायत्र्येन्द्रं तुष्टाव । अत्रोकारः पदपूरण इति व्याचष्टे—

अयन्ते समतसि ॥ १३ ॥

कपोत इव गर्भधिम् । वचस्तच्चिन्नओहसे ॥ ४ ॥ इत्यस्याः शेषः । हे इन्द्र ! अयन्ते त्वदर्थः सोमः (यं त्वं नित्यमेव) समतसि[2] संपतसि तासु २ क्रियास्वाहूयमानः इति वाक्यशेषोऽर्थवशाद्बोध्यः । अत्र दृष्टान्तः कपोत इव गर्भधिम् । कवेरोतच्पश्चे (उ. सू. १–६२) ति साधुरव्युत्पन्नो वा कपोतः कम्पतनः कुत्सितपतनो-वेति दुर्गः । सयथा गर्भधिं[3] गर्भधारिणीं कपोतीं अण्डाश्रयं वा नीडं प्रति पुनः पुनः पतति तद्वत् । सोऽयमृत्विग्भिस्त्वदर्थमभिषुतः सोमः । अथ किमस्माभिः करि-

---

१. अन्ये व्याचक्षते–वत्सं संशिश्वरीः एकशिशुका बह्व्यो गाव इव । यथा मृतवत्साः पर्यायेणैकं वत्सं स्वैःस्वैः पयोभिर्वहनादिसमर्थं कुर्य्युः । एवमस्माभिरभिष्टुतं सोमं वर्द्धयन्तु प्रजातबीय्यं कुर्वन्तु देवतर्पणायेत्येवम् ॥

२. अत सातत्यगमने (भ्वा० प०) सातत्येनाविच्छेदेन (नैरन्तर्येण) गमनं सातत्यगमनं तत्फलितमर्थमाह नित्यमेव सम्पतसीति । पततिर्गत्यर्थ एव (भ्वा० प०) इति ॥

नोऽस्माकमेता गिरो प्रावस्तुतौ विनियुक्ता वाचः स्तुतिरूपास्तं सोमं वर्द्धन्तु वर्द्धयन्तु (अन्तर्भावितण्यर्थः) । यः सोमः इन्द्रस्य हृदंसनिर्हृदयस्य सम्भक्ता । तत्र दृष्टान्तः । वत्सं बालं शिश्वरीरिव यथा शिश्वर्यो बद्धपयस्का मातरो वत्सं वर्द्धयन्ति तद्वदिति ॥ १४ ॥ अथ निगमप्रसक्तं "गिर"–इत्येतन्निर्वक्ति—

गिरोगृणातेः ॥ ११ ॥

व्यसि ? मोचयास्मान् । किं वा वच (एव) तदेतन्नः स्तुतिलक्षणं न ऊहसे न वितर्कयसि रोरूयमाणानाम् ? केनाप्यभिप्रायेण वयमेतद्भूमः । कैर्वा युष्मद्भक्तैर्न संयुक्तोऽयं सोमो यदिमं परिगृह्यास्मानतो यूपान्न मोचयसि । किं वा वच ऐवैतच्छ्रुत्वाऽवबुध्यार्थमवधार्यात्तताम्रस्माकं कारुण्यान्मोचयास्मान्किन्तेऽस्माभिरयमेतेऽस्मत्तः प्रतिविशिष्टतरः सोमोऽभिषुत इति तात्पर्यार्थः ॥ ४ ॥

इवोऽपि दृश्यते ॥ १४ ॥ ५ ख. सू. ॥

कदाचिदनर्थकः पदपूरण एवेति वाक्यशेषः ॥

किमुदाहरणम्—

सुविदुरिव सुविज्ञायेते इव ॥ १ ॥

इत्येते उदाहरणे । तत्र सुष्ठुविदुर्यज्ञं ब्राह्मणा इत्याद्यस्यार्थः । अत्रेवोऽनर्थक एव वाक्यपूरणः । सुष्ठु विज्ञायेते यज्ञो नक्षत्रञ्च ब्राह्मणैरिति द्वितीयस्यार्थः । अत्रापीवोऽनर्थक एव वाक्यपूरणः ॥ इत्येवं पदपूरणान्व्याख्याय निपातसमुदायं दर्शयति—

अथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये ॥ २ ॥

निपातसमुदायाधिकारार्थोऽयमथशब्दः । इतिः सम्भावने । अथायमेवेदिति केवलः प्रयुज्यमानः पदपूरणो भवति । अपि चैष एव न इत्येतेन संयुक्तः प्रयुज्यते परि सर्वतो भये अर्थे इति शेषः । तद्यथा—

हावाभरक स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् ॥
शचीर्मदन्त उत दक्षिणाभिर्नेज्जिघ्रायन्त्यो नरकं पतामः ॥ १ ॥
इति ॥ २ ॥

नारदेन किल वञ्चयितुं विप्रलभ्यमाना असुरपत्न्यो भर्तॄन्प्रति तमनेन मन्त्रेण प्रत्यूचुः । एके तावत् इतो भूलोकात् हविर्भिः पुरोडाशादिभिर्निमित्तभूतैः स्वः स्वर्गलोकं सचन्ते गच्छन्ति स्म ॥ अथ एके सवनेषु यज्ञेषु सोमान्सुन्वन्तः अभिषुण्वन्तः । तेन कर्म्मणेत्यर्थः । अन्ये शचीः शच्या वाचा स्तुतिभिः । सुब्व्यत्ययश्छान्दसः । मदन्तः मादयन्तः (अन्तर्भावितण्यर्थः) देवांस्तर्पयन्तः । उत अपिच दक्षिणाभिः स्वः सचन्ते इत्येतदेवानुषज्यते । (तत्रैवंसति । वयमेतेषां स्वः श्रेयसोपायानामसत्त्वाद्भर्तॄन्परिचरेम) नेदितिपरिभयोक्तिः । वयमेतेषामैप्युपजिघ्रा-

---

१. अयमपि कृत्य इति न दृढं प्रतीमः । दुर्गेणापि "नेज्जिघ्रायन्त्यो नरकं पतामे—"ति वाक्यमुक्त्वा "मृग्यः शेष" इत्यभिधाय केचित्त्वेवं कृतशेषमत्राधीयत इति हविर्भिरित्यादिश्लोकमभिदधौ ॥

२. प्राणिषु तेन तेनाभ्युपायेन स्वः श्रेयसं प्रत्यभ्युद्यतेषु सत्सु ॥

३. अस्माभिरज्ञत्वानुष्ठानत्वादिति तात्पर्य्यम् ।

४. स्वभर्तॄणाम्पुरस्तात् (अग्रे) सतीधर्म्ममपह्राय कपटमाचरन्त्यो नरकं पतामेति सम्भावयामः ॥

यन्त्यो जिह्म-(कुपट-) माचरन्त्यो (भगवन् !) नरकं पताम । नान्यो भर्तृपरित्यक्तायाः स्त्रियाः कश्चन धर्मोऽस्तीति भावः ॥ १ ॥

नरकशब्दं निर्ब्रवीति—

नरकं न्यरकं नीचैर्गमनम् ॥ ४ ॥

नीचैरस्मिन्नर्यते गम्यत इति नरकम् । निपूर्वाद्गत्यर्थादृधातोः (भ्वा. प.) अधिकरणे बुन् गुणः नीत्ययं नीचैरित्यर्थकस्य नादेशः पृषोदरादित्वात्ततश्च शकन्ध्वादेराकृतिगणत्वात्परूपम् । यद्वा इकारलोप एव पृषोदरादित्वादित्याह—न्यरकमिति ॥

नास्मिन्रमणकं स्थानमल्पमप्यस्तीति वा ॥ ५ ॥

वा-अथवा नास्त्यस्मिन् रमणकं रतिजनकं स्थानमल्पमपीति नरकम् । न रतिकरम् । न रमणकमितिवाऽर्थः । पृषोदरादित्वाद्वर्णलोपेन वर्णविपर्ययेण वा साधुः ॥

अथापि न चेत्येष इदित्येतेन संप्रयुज्यतेऽनुपृष्टे ॥ ६ ॥

अथाप्ययमपरो निपातसमाहारो न चेति । एष इदित्येतेन संयुक्तः प्रयुज्यते केनचिदनुपृष्टे (सति प्रतिवचनं भवति) तद्यथा—

न चेत्सुरां पिबन्तीति ॥ ७ ॥

कश्चित्कञ्चित्पृच्छति तिष्ठन्ति गृहे वृषलाः ? इति । स प्रत्याचष्टे तिष्ठन्तीति । ततो यदि तिष्ठन्ति किमिति[2] नागच्छन्तीति पुनरनुपृष्टे प्रतिवक्ति न चेदिति । यदि सुरां न पिबन्ति इत्यर्थः ॥ अथ सुरापदं निर्ब्रवीति—

सुराषुनोतेः ॥ ८ ॥

सा ह्यभिषूयतेऽनेकैर्द्रव्यैः पिष्टादिभिरिति[3] सुरेत्युच्यते । षुञ् अभिषवे[4] (स्वा. उ.) अस्मादौणादिको रक्प्रत्ययः कर्म्मणि । कित्त्वाद्गुणाभावः ॥

अथोपक्रान्तं निपातलक्षणमुपसंहरति—

एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः ॥ ९ ॥ ६ ख. सू. ॥

इति या. मु. प्र. नि. शा. प्र. ध्या. तृ. पादः ॥

एवमनेन प्रकारेण उच्चावचेषु बहुप्रकारेषु अर्थेषु निपतन्ति प्रयुज्यन्तेऽन्येऽपि समाहृता द्वित्रा अपि असमाहृताश्चापि कियन्तस्ते लक्षणंशास्त्रमेतच्चार्थनिर्वचनशास्त्रमुपेत्योपगम्यानुप्रविश्येक्षितव्या द्रष्टव्याः कः कस्मिन्नर्थे वर्त्तत इत्येवम् परीक्ष्या इत्यर्थः ॥ इति श्रीमद्यास्कमुनिप्रणीतनि. लघुविवृतौ नैघ. काण्डे प्रथमाध्यायस्य तृतीयः पादः ॥

---

१. पुनः पृष्टे । प्रश्नानन्तरमुत्तरे दत्ते पुनः प्रश्ने सतीति यावत् ॥

२. तर्हि किमर्थम् ॥

३. पैष्टी, गौडी, माध्वीत्यादिसुराभेदाः ॥

४. अभिषवोऽत्र सुरासन्धानं (सुरोत्पादनप्रकारः) नतु क्षपनादि ॥

५. व्याकरणम् ॥

१ अ० ४ पादः ।

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि ॥
नामाख्याते चोपसर्गनिपाताश्च ॥ १ ॥

इतीत्ययमधिकारसमाप्त्यर्थः । इमानि अनुपदोक्तानि चत्वारि पदजातानि चतस्रः पदजातयः पदसामान्यानि "जातिर्जातश्च सामान्य" मित्यमरः । अनुक्रान्तानि पूर्वमाख्यातानि, ततो नामानि, तत उपसर्गाः, ततो निपाता इत्येवमानुपूर्व्येण क्रान्तानि वर्णितानि, व्याख्येयेति वाक्यशेषः । कतमानि पुनस्तानि ? नामाख्याते चोपसर्गनिपाताश्चेति । अयञ्च प्रतिज्ञाभ्यासो निगमनार्थः । प्रतिज्ञाभ्यासो हि निगम

तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च ॥ २ ॥

तत्रैं तस्मिन्नेव पदचतुष्टये यानि नामानि तानि सर्वाण्येवाविशेषेणाख्यातजानीत्येवं शकटस्य गोत्रापत्यं नडादिभ्यः फक् (४-१-९९) फस्यायन् (७-१-२) आदिवृद्धिः । शाकटायन आचार्यो ब्रवीतीति वाक्यशेषः । तथाच पतञ्जलिरपि-सर्वेषामधातुजमाह शकटस्य च तोकैमिति महाभाष्य आह । नैरुक्तानां निरुक्तशास्त्रविदां तदधीते तद्वेदे-(४-२-५९) ष्यण् आदिवृद्धिः । (पूर्वेषां सर्वेषामविशेषेण गार्ग्यवर्ज्यं) चैष समयः सिद्धान्तः । "समयाः शपथाचारकालसिद्धान्तसंविद" इत्यमरः ॥ तदत्र मतान्तरमाह—

न सर्वाणीति गार्ग्यः ॥ ३ ॥

न सर्वाणि नामान्याख्यातजान्यपितु कानिचिदेवेति वक्ष्यमाणेन तयत्रेत्यादिना सम्बन्धः । इति गर्गस्य गोत्रापत्यम् गर्गादिभ्यो यञ् (४-१-१०५) आदिवृद्धिः । गार्ग्य आचार्योब्रवीतीतिवाक्यशेषः ॥ न केवलं गार्ग्य एवापितु—

वयाकरणानाः ॥ ४ ॥

व्याकरणं व्याक्रियन्ते धात्वादिप्रविभागेण व्युत्पाद्यन्ते शब्दा अनेनेति करणेऽर्थे व्याङ्पूर्वात्करोतेः करणाधिकरणयोश्चे-(३-३-११७) ति ल्युट् । तद्विदन्तीति वैयाकरणाः । वेदितर्य्यण् तद्धितः (४-२-५९) आदिवृद्ध्यपवाद ऐजागमः (७-३-३) तेषाम्मध्ये चैके पाणिनिप्रभृतयो न सर्वाणीत्युक्तमर्थं ब्रुवते ॥ अत एव 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानी'ति तेषां समयः ॥

---

१. व्याख्यालक्षणमुक्तमधस्तात् (२ पृ. २१) ॥ तत्राक्षेपसमाधाने नामविषये अवशिष्येतेऽन्यत्सर्वं लक्षणोदाहरणमुखेन दर्शितमिति व्याख्यया वर्णितानीत्यस्य तात्पर्यम् ॥

२. नान्नस्तु किञ्चिदवशिष्यत इति यदुपेक्षितमधस्तात्प्रतिज्ञातञ्च "तत्पदचतुष्टयलक्षणानन्तरं चतुर्थपादेन वक्ष्यत" इति । तदत्र यथावसरं विशेषचिन्तापक्षमनुसृत्याक्षेपसमाधानरूपव्याख्याधर्म्येणोच्यते ॥

३. "अपत्यं तोकं तनयः सम–" इत्यमरः ॥

४. सिद्धान्तः । "समयाः शपथाचारकालसिद्धान्तसंविद" इत्यमरः । तेषां पाणिनीया-

तत्र यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणे-
नान्वितौ स्यातां सँविज्ञातानि तानि ॥ ५ ॥

तदेतत्प्रपञ्च्यते गार्ग्यपक्षेणेति पर्युपयुक्तस्तच्छब्दः । इह हि त्रिधा व्यवस्था नाम्नाम् । प्रत्यक्षक्रियाणि, प्रकल्प्यक्रियाणि, अविद्यमानक्रियाणि च नामानि भवन्ति । तत्र-यत्र येषु नामसु स्वर उदात्तादिः । संस्कारः प्रकृतिप्रत्ययादिः । तौ समर्थौ सङ्गतार्थौप्रादेशिकेन व्याकरणलक्षणानुगतेन गुणेन धातुनाऽन्वितावनुगतौ स्यातां भवेतान्तानि सं-सममैकमत्येनाख्यातजानीत्येवं विज्ञातानि । न तत्र विप्रतिपत्तिः । यथा कारकहारकादीनि । प्रत्यक्षक्रियाणि ह्येतानि ॥ अत उत्तरं नपुनर्नैरिति वाक्यशेषो द्रष्टव्यः—

गौरश्वः पुरुषोहस्तीति ॥ ६ ॥

इत्येवमादीनि पुनर्नसंविज्ञातानि (प्रत्यक्षक्रियाणि) अपि तु—प्रकल्प्यक्रियाणि । एतेषु हि प्रकल्प्यन्ते क्रिया न साक्षादुपलभ्यन्ते । अविद्यमानक्रियाणि तु डित्थो डवित्थोऽरविन्दोऽर्वाडित्येवमादीनि ॥

अथ शाकटायनमतमाक्षिपति—

अथ चेत्सर्वाण्याख्यातजानि नामानि स्युर्थः कश्च(न)
तत्कर्म्म कुर्यात्सर्वन्तत्सत्वं तथाचक्षीरन् ॥ ७ ॥

नाम् अव्युत्पन्नानीत्यस्योद्देश्यत्वेन विधेयत्वेन वा पाणिनितात्पर्याविषयाणीत्यर्थः । अन्यथाहि वदतो व्याघातः । उणादय इत्यस्यहि उणादिप्रत्ययान्तानीत्येवार्थः । नहि तान्यव्युत्पन्नानि भवितुमर्हन्ति । अथाव्युत्पन्नानि, नहि तर्ह्युणादिप्रत्ययान्तानि । उद्देश्यत्वेनेत्याद्युक्त्या निमित्तत्वेन पाणिनितात्पर्यविषयताभ्युपगमस्तेन "अयामन्ताल्वाय्येल्विष्णुपु" (पा. ६–४–५५) इति सूत्रं संगच्छते । तदेतच्छब्देन्दुशेखरे सुव्यक्तं द्रष्टव्यम् ॥

१. समर्थतानामोपपत्तिरुच्यते ॥

२. यथैव हि लक्षणाविप्रतिपत्त्या स्वरोऽवस्थित एवं संस्कारोऽपि यत्रेत्यर्थः ॥

३. याहि तस्मिन्द्रव्येऽवस्थिता यद्धेतुकश्च तस्य नामधेयप्रतिलम्भोऽभिप्रेतः सा प्रदेशाख्या क्रियेत्युच्यते । सा च प्रधानतया पदेऽवतिष्ठते । तद्वाचकश्च धातुः प्रादेशिको गुण इत्युच्यते । गुणः शेषोऽङ्गमित्यनर्थान्तरम् । तथाच प्रदिश्यते नाम्ना निर्दिश्यते द्रव्यमनयेति प्रदेशः क्रिया नामधेयप्रतिलम्भहेतुभूता तामभिधत्त इति प्रादेशिको धातुरित्येके मन्यन्ते । अपरे पुनरन्यथैतद्व्याचक्षते तद्दुर्गभाष्यादौ द्रष्टव्यम् ॥

४. वस्तुतस्तु अत्र संविज्ञातानीतिपदे तन्त्रावृत्त्यादिन्याय आश्रीयते । एकस्य पूर्वेणापरस्य च परेणाभिसम्बन्धः । तत्र संविज्ञानमिति रूढिशब्दस्य संज्ञात्र करिष्यते (दै. का. १–३–६)। तथाच संविज्ञातानि संविज्ञानपदानि तानि यथा गौरश्वः पुरुषोऽहस्तीत्येवमादीनि । नह्येषां गवादीनामष्टाध्याय्यां व्युत्पत्तिलक्षणमस्ति । तथाचोक्तमुणादयोऽव्युत्पन्नानि प्रातिपदिकानीति । तस्माद्रूढिशब्दा एवैते भवन्ति इति ॥ पाचकादयस्तु न्यायवत्कार्म्मनामिकसंस्कारेणानुगता यौगिकशब्दा इत्येवमन्ये व्याचक्षते ॥

कश्च (न) कश्चित् । (अविशेषेण प्राणिमात्रम्) तत्कर्म्म एकाकारकमनेकः कुर्य्यात्सर्वं तत्सर्वं प्राणिजातं तथा एकनाम्नैव ते शाकटायनादय आचक्षीरन् कथयेयुः ॥ तद्यथा—

यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्यात्
यत्किञ्चित्तृन्द्यात् तृणं तत् ॥ ८ ॥

यः कश्चिदनश्वोऽप्यध्वानमश्नुवीत व्याप्नुयात् अशू व्याप्तौ (स्वा. आ.) विधौ लिङ्। अश्वइत्येवं स वचनीयः स्यात्। कस्माद्वाऽश्वोऽप्यनश्नुवन्नश्व इत्युच्येत तैः। अथ चेदनश्नुवन्नप्यश्वस्तदान्योऽप्यनश्नुवन्नश्व इत्युच्यताम्। तस्मादश्वोऽपि नैवाशनक्रियायोगाभिप्रायेणाश्व इत्युच्यते किन्तर्हि? शब्दव्यवहारएवायमर्थप्रत्यायनार्थ ईदृशः क्रियानिरपेक्षः। एवमेव यत्किञ्चित्तृन्द्याच्छिन्द्यात्। उतृदिर्हिंसानादरयोः (रु. प.) विधौ लिङ्। अविशेषेण तत्सर्वं तर्दनक्रियायोगात्तृणमित्येवमाचक्षीरन्न चाचक्षते। तस्मान्न सर्वाण्याख्यातजानि नामानि ॥

अथापि चेत्सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः
संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् ॥ ९ ॥

क्रियाहेतुके हि नामधेयप्रतिलम्भे सति यावद्भिर्भावैर्यावतीभिः क्रियाभिरेकं द्रव्यं संयुक्तं प्रयुज्येत तावद्भ्यो भावेभ्यः क्रियाभ्यो नामधेयप्रतिलम्भः स्यान्नहि तत्र कासाञ्चिद्व्यावर्त्तको विशेषहेतुरस्ति अन्यासां वा नियामकः ॥ अपिरत्र शङ्कायां संम्भावनायां वा एवमुत्तरत्रापि। "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपी"त्यमरः ॥

तत्रैवं स्थूणा दरशया वा सञ्जनी च स्यात् ॥ १० ॥ १ सं. सू. ॥

तत्रैवं सति स्थूणा एकैव सती दरे (श्वभ्रे गर्त्ते) शेत इति "दरशया" इत्युच्येत न चोच्यते। एवं सज्जतेऽस्यां वंश इति सञ्जनीत्युच्येत। न चोच्यते। एवमनेकानि सत्वानि एकक्रियायोगादेकनामानि स्युः। एकं वाऽनेकक्रियायोगादनेकनाम। उभयथापिच व्यवहाराप्रसिद्धिः। तस्मान्न सर्वाण्याख्यातजानि नामानि स्युः ॥ १० ॥ १ ॥

अथापि य एषां न्यायवान्कार्मनामिकः संस्कारो
यथाचापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन् ॥ १ ॥

एषां पुरुषादिनाम्नां यः न्यायवान् लक्षणन्यायेन युक्तः कार्मनामिकः कर्म्मकृते नाम्नि (पाचकलावकादौ) भवः संस्कारः यथा चापि यथैव च। प्रतीतार्थानि प्रतीतक्रियाणि स्युर्भवेयुस्तथा आचक्षीरन् कथयेयुर्जना इति शेषः ॥ कथं पुनर्न्यायवत्संस्कारोपेतानि कथं वा प्रतीतक्रियाणि स्युस्तत्राह—

पुरुषं पुरिशय इत्याचक्षीरन् ॥ २ ॥

---

१. "सत्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः। पिशाचादावात्मभावे बले प्राणेषु जन्तुषु" इति हेमचन्द्रः। "प्राणी तु चेतनो जन्मी जन्तुर्जन्युश्शरीरिण" इति त्वमरः ॥

२. उक्तसूत्रेऽपि वस्तुतस्तु अथशब्दः प्रश्ने अपिशब्दःसम्भावनायाम् "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इत्यमरः ॥

पुरुषं तावत् पुरिशय इत्याचक्षीरन् । इतिना निपातेन कर्मणा उक्तत्वात्र या । पुरि शयो शेत इति "अधिकरणे शेते" (३-२-१५) इति घञ् । इत्येवं न्यायवत्। कार्मनामिकसंस्कारयुक्तेन पुरिशय इति शब्देनोक्तः स्यात् । एवं चैष प्रतीतक्रियः शब्दो भवति ॥ एवमेव—

अश्नुत्यध्वं तर्दनमिति तृणम् ॥ ३ ॥

आचक्षीरन्नित्यनुषज्यते। अश्नोति व्यसावित्यष्टा इत्येवमध्वमाचक्षीरन्। तृणत्ति यत्तर्दनमित्येवं तृणमाचक्षीरन् । न चैवमाचक्षते । किं कारणम् ? । न चासति कारणे विद्यमाना क्रिया परोक्षीकर्तुं न्याय्या । तस्मान्नाख्यातजानि नामानीति ॥

अथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति ॥ ४ ॥

अथापीदमपरमप्राप्तं कुर्वन्ति ते शाकटायनाः । यन्निष्पन्ने सिद्धे अभिव्याहारे नाम्नि अभि आभिमुख्येन (तस्य नाम्नः) स्थित्वा विचारयन्ति कतमस्य धातोरत्र रूपमिति ॥ ततश्च—

प्रथनात्पृथिवीत्याहुः, क एनामप्रथयिष्यत्किमाधारश्चेति ॥ ५॥

प्रथनात्पृथुत्वात्पृथिवीत्याहुस्ते शाकटायनाः । तत्र पृच्छामः । यदीयं स्वभावत एव पृथिवीनाम नाभविष्यत् तदा कएनामप्रथयिष्यत्कोऽस्याः प्रथनमकरिष्यत् । अथापि कथंचिदस्या अपृथिव्याः सत्याः कश्चित्प्रथनकर्तोऽभ्युपगम्येत । ततोऽपि च वयमिदमपरं पृच्छामः । किमाधारश्चेति ? चशब्दः समुच्चयार्थः । सर्वस्य हि प्राणिजातस्येयमेवाधारः । अथ पुनर्यदेयमप्रथिताऽऽसीत् तदा योऽस्याः प्रथनकर्तासकिमाधार आसीत् । न ह्यनाधारेण शक्येयं प्रथितुम् । आधाराभावे च प्रथनक्रियाभावः । प्रथनक्रियाभावे च सति क्रियाजान्येव नामानीत्येतदयुक्तम् ॥ तस्मान्न सर्वाण्याख्यातजानि नामानि ॥

अथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः ।
पदेतरार्धान्संचस्कार शाकटायनः ॥ ६ ॥

अथापीदमपरमप्राप्तं कृतवान् शाकटायनः । यदनन्वितेऽननुगते शब्देनार्थे—यत्र संस्कार्यमाणोऽपि शब्दोऽर्थमनुगन्तुं न शक्नोति तादृशे, अथ चाप्रादेशिके विकारे ययाहि क्रियया तद्द्रव्यं प्रदिश्यते (नाम्नोच्चार्यते) तदभिधायको धातुः प्रादेशिकः स तदभिधानं विगृह्यमाणं विकर्तुं न शक्नोति तादृशे, हीयमानप्रतिज्ञः (शाकटायनः) सर्वाण्याख्यातजानि नामान्युपपादयिष्यन् असम्भवे सति कुशकाशावलम्बनमिव कुर्वन् पदेभ्य आख्यातपदेभ्यः समस्तेभ्योऽवयवानुपादाय पदेतरार्धानन्यानन्यांश्चेतरेतराख्यान् पदावयवैरन्यैश्चान्यैश्चान्यदर्धभ्राम्रः संचस्कार संस्कृतवान् । सन्तमर्थमाययति गमयतीति सत्यमित्येवम् । अत्र—

एतेः कारितंच यकारादिंचान्तकरणमस्तेः शुद्धं च सकारादिंच ॥ ७ ॥

---

१. अभिमुखं व्याहियते उच्यतेऽसाविति कर्मणि "इकश्चे"ति घञ् ॥ दुर्गः ॥

२. अत्र कारितंच यकारादिंच शुद्धंच सकारादिंचेति इकारस्य चेतरंचार्थमिति समुच्चयार्थश्चकाराः ॥ इति दुर्गः ॥

एतेः इण्गतावित्यस्य धातोः (अ. प.) कारितं ण्यन्तं रूपं कृत्वा तदर्थस्या-(न्तर्भावितण्यर्थस्या-) चि'इ णोयणि'ति (६-४-८१) यणि सत्यशब्दस्य यकारादिमन्तकरणमन्त्यार्थं यमितिशब्दं सञ्चस्कारेत्यनुषज्यते । अस्तेरस्धातोः (अ. प.) शुद्धमनन्तर्भावितण्यर्थं सकारादिं सदिति शब्दं शतरि 'श्नसो'(६-४-१११)रित्यलोपे सञ्चस्कार । तदेतदकृतपूर्वमन्यैर्विद्वद्भिः कृतवान्पाण्डित्याभिमानी शाकटायनो यदभिनत्पदानि[1] ॥ १ ॥

अथापि सत्वपूर्वो भाव इत्याहुरपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्यते ॥ ८ ॥ (२ ख. सू. ॥)

अथाप्ययमपरो दोषः प्रसज्येत यत्सत्वपूर्वो भाव इत्याहुरभियुक्तास्तद्विदः । सत्वं (द्रव्यं) पूर्वमस्मात्सोऽयं सत्वपूर्वः । सत्वाश्रय एव ह्यसौ भावः (क्रिया) । तत्रैवं सति अपरस्माद्भावादपरकालिकेन भावेन (क्रियया) पूर्वस्य पूर्वोत्पन्नस्य प्रदेशनं प्रदेशः संज्ञाप्रतिलम्भो नोपपद्यते । किंकारणम् ? उत्पत्तिसहभूता हि सा, स्वेनाभिधानेन, क्रियानिरपेक्षेणाभिसंबद्धमेव द्रव्यमुत्पद्यते । नित्यसम्बद्धौ हि शब्दार्थौ । इति तदेतत्सर्वथा सर्वाण्याख्यातजानि नामानीति शाकटायनमतं नोपपद्यते । तदनुपपत्तावस्मत्पक्षसिद्धिः कानिचिदाख्यातजानि मानानि कानिचिदनाख्यातजानीति ॥ (परिसमाप्तोऽयं गार्ग्यपक्षः) ॥ २ ॥

अथ शाकटायनपक्षेण समाधत्ते—

यथो हि नु वा एतत् ॥ १ ॥

यथेति वाक्योपादाने । यथा येन प्रकारेण । उकारोऽवधारणार्थः हील्यसूयायाम् नुइत्येष हेत्वपदेशे वै इत्ययं यथोक्तपूर्वपक्षोपदेशार्थः । तथाचायमर्थः । येनैव

१. अत्रायमप्यर्थः स्वरसतः प्रतीयते । यथासौ शाकटयनः प्रवृत्तो न पदेषु स्थास्यति अपिचासौ वर्णानपि भेत्स्यति अनेकार्थांश्च कल्पयिष्यति । योहि पदानभिनत्तस्य वर्णाभेदने विशेषहेतुः को भविष्यति । तस्मादतिप्रसङ्गदोषापत्त्या नानेकधातुजानि नामानि नापि सर्वाण्याख्यातजानि नामानीति ॥

२. नाख्यातजानि किन्तु रूढान्येव तेषुतेष्वर्थेष्विति ॥ कानिचिदित्युक्त्वाऽन्यान्यपि सन्तीतिसूच्यते । तथाच आख्यातजानीत्यनेन यौगिकानि अनयोरेव परस्परभेदाद्योगरूढानि यौगिकरूढानि चेति चतुर्विधानि नामानि । यत्रावयवार्थ एव बुध्यते तानि यौगिकानि । यथा पाचकादीनि । यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेणार्थो बुध्यते तानि रूढानि यथा गोपदमण्डलादिपदानि । यत्र त्ववयवशक्तिविषये समुदायशक्तिरप्यस्ति तानि योगरूढानि यथा पङ्कजादिपदानि ॥ तथाहि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति समुदायशक्त्या च पङ्कत्वेन रूपेण पङ्कं बोधयति एवमन्यत्र । यत्रावयवार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तानि यौगिकरूढानि यथोद्भिदादिपदानि । तत्रहि ऊर्ध्वभेदनकर्तरि तरुगुल्मादिरपि बुध्यते, वागविशेषोऽपीत्येवमन्यत्राप्यूह्यम् ॥

प्रकारेणासूयिता (असमर्था) हेतवो गार्गीयैरुक्तास्तेनैवप्रकारेण एतैत् प्रत्यनुभाष्य प्रवक्तृधर्मेण समीकरिष्याम इति भावः शाकटायनानाम् ॥ इत्येवं प्रतिज्ञाय गार्ग्यमतमनूद्य खण्डयति—

तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां* ।
सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति ॥ २ ॥

यथैतदुक्तं—यत्रेत्यादि तदेतत्प्रत्युच्यते—सर्वमित्यादिनेति पर्युपयुक्तस्तच्छब्दः । सर्वमेव प्रादेशिकं क्रियाजं नाम । किंततः ? इत्येवं सत्यनुपालम्भ एष भवति । अयमाशयः । प्रदेशवाचिन आख्यातानुत्प्रेक्ष्य तदाश्रयौ स्वरसंस्कारौ यावद्गम्यमनुविधेयौ । विभ्वीहि लक्षणगतिर्नैष शब्दापराधो नाप्यस्माकं किन्तु भवत एव, मन्दशिक्षिततत्वात्[७] । यथाचाहुः । न चैष स्थाणोरपराधो यदेनमन्धो न पश्यतीति । येनैत्वं प्रदेशवाचिनि धातौ विद्यमानावपि स्वरसंस्कारौ नानुविधातुं शक्नोषि स त्वं तावत्पुनः पुनः शिक्षस्वान्यद्याकरणं यावच्छक्तिस्तवानुविधातुमिति ॥

यथो एतद्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्वं तथा चक्षीरन्निति* ।
पश्यामः समानकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां ।
यथा तक्षा परिव्राजको जीवनो भूमिज इति ॥ ३ ॥

यथो एतत् यत्पुनरेतदुक्तं-यः कश्चेत्यादि (अनेकेषामेककियायोगादेकनामता प्रसज्येतेति तदर्थः) तदेतत्प्रत्युच्यते—पश्याम इत्यादिना । त्वमपि पश्यँसि वयमपिच, पश्यामः समानकर्मणां तुल्यकर्मणामपि सतां (कर्मकर्तृणां) मध्ये नामधेयप्रतिलम्भस्तत्कर्मकृतसंज्ञाप्राप्तिरेकेषामेव केषांचिद्वे नियमतस्तत्कर्म कुर्वन्ति ईति । नैकेषां

---

१. गर्गगोत्रापत्यछात्रैस्तन्मतानुयायिभिरित्यर्थः । अत्र गर्गाणां छात्रा इत्यर्थे "यञिञोश्चे"ति (२–४–६४) प्राप्तं यञोलुकं "गोत्रेऽलुगची"ति (४–१–८९) "वृद्धाच्छ" इति (४–२–११४) छे विवक्षिते बाधते । "आपत्यस्य चे"ति (६–४–१५१) यलोपः ।

२. अयंच पूर्वपक्षसमीकरणाभिनयः । पूर्वपक्षस्वरूपानुवादो वा तथार्थकस्यैवोत्तरत्राप्यभिसंबन्धात् । तथात्वेच प्रत्युच्यत इति क्रियाध्याहार्या योत्तरत्राप्युपयोक्ष्यते ॥

३. प्रवक्तृत्वेन प्रकृष्टवक्तृत्वेन, प्रवचनकर्तृत्वेन वा ॥

४. महाभाष्ये पतञ्जलिचरणैरुपन्यस्तोऽयंलोकानामाभाणकः । अत्रापि स्फुटीभविष्यत्युपरिष्टान्मूले । (निरु. १–५–२) ॥

५. मन्दशिक्षिततत्वेन ॥

६. "निपातएकाजि"–(१–१–१४)ति प्रगृह्यत्वात्प्रकृतिभावे(६–१–१२५) असन्धिः॥

७. त्वंच वयं चेति वयं "त्यदादीनां मिथः सहोक्तौ यत्परंतच्छिष्यत" इत्यस्मदः शेषः॥

८. निपातेनामुना कर्मण उक्तत्वान्न द्वितीया नामधेयप्रतिलम्भात् ॥

९. एकशब्दोऽत्र साधारणवचनः पूर्वत्र तु प्रधानवचनः । यथाहुः "एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणेसमानेऽल्पे संख्यायाञ्च प्रयुज्यत" इति ॥

*गार्ग्यमतानुवादसूचकमेतत् ॥ एवमुत्तरत्रापि बोध्यं सूत्रेष्वनुपदम् ॥

न सर्वेषां तत्कर्मकर्तृणां, तद्यथा तक्षन्कश्चित् (वर्धकिः) तक्षेत्युच्यते अन्यस्तक्षन्नपि न तक्षेत्युच्यते । नात्राहमुपलब्धव्यो लोकनियम एवायम् । एवं परिव्रजतीति परिव्राजकः सन्यासी एव, नपुनः सर्वोऽपि कार्यवशात्प्रयोन्यगृहादिभ्यः । एवं जीवन, इक्षुरसः शाकजातिर्वा । भूमिजोऽङ्गारकः (कुज-) एकेत्येवमन्यत्राप्यूह्यम् । उदाहरणस्य दिङ्मात्रप्रदर्शकत्वात्तदेतदाह–इतीति । इतिशब्द आद्यर्थः ॥

एतेनैवोत्तरः प्रत्युक्तः ॥ ४ ॥

उत्तरः यावद्भिर्भावैः संप्रयुज्यते तावन्त्यो नामधेयप्रतिलम्भः स्यादित्येषः । स प्रत्युक्तः खण्डितः । अयं भावः । पश्यामोऽनेककियायुक्तानामपि एककियाकारितो नामधेयप्रतिलम्भो भवति । तद्यथा तक्षादिः । तक्षादिर्ह्यन्यान्यपि कर्माणि करोत्येव न पुनस्तस्य तत्कृतो नामधेयप्रतिलम्भोऽस्ति । तस्मादेकस्यानेककियायोगेऽपि, अनेकस्यैककियायोगेऽपि वा व्यवस्थितएव शब्दनियमः स्वभावत एव लोके इति न व्यवहाराप्रसिद्धिदोषः शङ्कनीय इति ॥

यथो एतद्यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति* । सन्त्यल्पप्रयोगाः कृतोप्यैकपदिका यथा व्रततिर्दमूना जाट्य आट्टणारो जागरूको दर्विहोमीति ॥ ५ ॥

यथो एतद्यत्पुनरेतदुक्तं यथा–चापीत्यादि । अत्र ब्रूमः । सन्त्येवाल्पे प्रयोगाः प्रतीतार्थकाः केचित् कृतः कृत्प्रत्ययान्ताः शब्दा अप्यैकपदिका एकपदप्रकरणोक्ताः । तद्यथा । व्रततिर्वृणोतेस्तनोतेश्च (स्वा० त० उ०) क्तिच् । "अनुदात्तोपदेश"–(पा०६–४–३७) त्यनुनासिकलोपः । वृणोतेरगागमश्च बाहुलकात् । तथाच व्रततिर्वरणाच्च तननाच्चेति (नैग० का० ६–५–६) वल्ली । "वल्ली तु व्रततिर्लते"त्यमरः । दमूना दममना वा दानमना वा दान्तमना वापिवा दम इति गृहनाम (निघ० ३–४) तन्मनाः स्यादिति (नैग० का० ४–१–४) । दाम्य-

१. परित्यज्य सर्वं रुदन्तं पुत्रादिकं व्रजति गच्छत्येवेति ण्वुल् (३–१–१३३) ॥

२. प्रयाणं (प्रस्थानं) कुर्वन् ॥

३. जले तु क्लीवम् । "जीवनं भुवनं जलमि" त्यमरः ॥

४. "ज्वलितिकसन्तेभ्य" (३–१–१४०) इत्यत्र यथा ॥

५. प्रथमतस्तुशब्दस्वाभाव्यमेतद्यत्तथा सर्वाण्याख्यायन्ते यथा यथाप्रतीतार्थानि भवन्ति । न तत्राहमपराध्ये भवतो नापि च शास्त्रम् । यथावस्थितानां शब्दानामन्वाख्यानमेव क्रियते । नाहंशब्दानां कर्ता । य एषां प्रयोक्तारस्तानेवोपालभस्व निराकुरु वा यदि शक्नोषि । अथ कस्मात्पुनः कानिचिदेवाख्यायन्ते लोके ? तदप्यभिधानस्वाभाव्यमेव । कानिचित्प्रतीतार्थानि कानिचिदप्रतीतार्थानि । तान्यपि शास्त्रेण प्रतीतार्थान्येव कर्तव्यानि । एतदेव हि शास्त्रस्य शास्त्रत्वं यदप्रतीतार्थान्यपि यथा प्रकृत्यादिना प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति । आख्यायन्तएव कानिचित् । कानिचित् शास्त्रेण प्रतीतार्थानि क्रियन्ते । कृत्यनुविधायित्वाल्लक्षणस्य गुणतस्तेषु लक्षणम्–अपिच–(इतिदुर्गः) ॥

तीति दमूनाः । दसु उपशमे (दि. प०) अन्तर्भावितण्यर्थात् "दमेरूनसिः" (उ. ४–२३५) पृषोदरादित्वाद्दीर्घः । "दमूना दमुनाः प्राचीनबर्हिश्शुचिर्बर्हिषौ" इति नामनिधानम् । दम इति घञन्तः "नोदात्तोपदेशस्येति (७–३–३४) वृद्धिनिषेधः । दाम्यते शाम्यतेऽनेन शीतादिरिति । ददातेर्भावे ल्युटि दानम् । तत्र (दमे दाने वा) मगो यस्य । यद्वा दमेर्निष्ठायां "वा दान्ते"–(पा० ७–२–२७) त्यादिना निपातितेन दान्तशब्देन बहुव्रीहिर्दान्तं मनोयस्य असौ । अत्र दम–दान–दान्तानां दभावो मनस उपधाया ऊकारश्च पृषोदरादित्वात् ॥ अग्निरतिथिर्वा दमूनाः । "सप्तार्चिर्दमूनाः शुक्रश्चित्रभानुर्विभावसु"–रित्यमरः । निगमश्च "दमूना अतिथिर्दुरोणे (ऋ० सं० ३–८–१८–५) । जाट्यो जटावाञ्जटसंघाते (भ्वा. प.) बाहुलकात्कर्तरि "ऋहलोर्ण्यत्" (पा० ३–१–१२४) । आट्टारोऽटनशीलः । अट गतौ (भ्वा. प.) औणादिकोट्टारच् बाहुलकात्ताच्छील्यविशिष्टे कर्तरि "लोपोव्योर्वली"ति (६।१।६६) यलोपः । भृशमत्यर्थमटतीति सः । सततकरणं हि ताच्छील्यम् ॥ एवं जागरूको जागरणशीलः । "आक्रोस्तच्छीले"–त्यधिकारे "जागर्तेरूकः" (पा. ३–२–१६५) इति कर्तर्यूके गुणः । दर्विहोमी दर्व्या जुहोतीति । हु दानादनयोः (जु. प.) मिनिर्बाहुलकादौणादिकः । इत्येवं-प्रतीतार्था अन्येऽपीति ॥

---

१. अतएवोक्तं सि. कौ. उपशमे इति ण्यन्तस्य तेन सकर्मकोऽयं नतु शमिवदकर्मक इति ॥

२. अयंच दीर्घमध्योऽपीत्युक्तमुपरि द्विरूपंनामनिधानम् ॥

३. केचित्तु मत्वर्थे ण्यदिति व्याचख्युः । यद्यपि "तद्धिताः" (पा. ४–१–७६) इत्यधिकारसूत्रे बहुवचननिर्देशेनाविहिता अपि केचनेन् टिकन्नादयो भवन्ति तेनाल्पः शकटः शकटिः । अल्पो ग्रामो ग्रामटिका इत्येवं सत्वाल्पत्वेविवक्षया स्त्रीत्वाट्टापि सिध्यति । एवमिहापि कथंचित्सिद्धिरुद्भाविता स्यात्तथापि कृतोऽप्यल्पप्रयोगाः कृतोऽप्येकपदिका इति मूलविरोधादुपेक्ष्यं तत् ॥ तुष्यन्तु "अभिधानलक्षणाः कृत्तद्धितसमासा"इति पतञ्जल्युक्त्या कथञ्चित्॥

४. अस्य सन्तीतिपूर्वोक्तेनाभिसंबन्धः । अत्रापिना–येऽप्यप्रतीतार्थास्तेऽपि शास्त्रेण प्रतीतार्था एव कर्तव्याः । एतदेव हि शास्त्रस्य शास्त्रत्वं यदप्रतीतार्था अपि प्रकृत्यादिप्रदर्शनेन यथाप्रतीतार्थाः स्युस्तथैनानाचक्षीरन्निति–सूचितम् ॥

---

1. जाट्यो जटावानिति सायणभाष्यमुपादायैतत्केषांचिद्व्याख्यानम् ॥

2. तथाच ह० नाटकम् "न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः ।
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ॥
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा ।
स्वर्गग्रामटिकाविलुण्ठनभृथोच्छ्रूनैः किमेभिर्भुजैः ॥ १ ॥" इति ॥

3. तथाच "एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्व"मिति महाभाष्यं पातञ्जलमुपादायाचेतनखट्वाद्यृक्षादिसाधारणं सत्वादीनांत्रयगुणानामुपचयापचयस्थितिरूपं क्रमेण पुंस्त्वीनपुंसकार्थं लिङ्गमभ्युपेतमभियुक्तैः । तच्चार्थनिष्ठं केवलान्वयीति नागेशः । शब्दनिष्ठं तदित्यन्ये ॥

यथो एतन्निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति * ।
भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः ॥ ६ ॥

यथो एतत् यत्पुनरेतदुक्तं–निष्पन्न इत्यादि । अत्रापि ब्रूमः । युक्तं ते कुर्वन्ति । भवति हि (निश्चयेन) निष्पन्ने सिद्धेऽभिव्याहारे नाम्नि योगस्यावयवार्थस्य परीष्टिः परीक्षणम् । कथंचानुत्पन्नः सन्नभिधानयोगः परीक्ष्येत ॥

तत्र यदुक्तम्—

प्रथनात्पृथिवी त्याहुः क एनामप्रथयिष्यत्किमाधारश्चेति * ।
अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः ॥ ७ ॥ ३ खं. ॥

अत्र तावद्ब्रूमः । प्रथितेयं केनचिदतः पृथिवीत्युच्यते । कथमप्रथिता सतीयं पृथिवीत्वमापेति । यदि नैवमभ्युपैषि तदापि प्रतिब्रूमः । अथेति पक्षान्तरे अथवेत्यर्थकम् । वै निश्चयार्थः । चेदिति यद्यर्थः । यद्यप्यन्यैरप्रथिता तथापि पृथुदर्शनयोगात्तथोच्यत इति ॥ ३ ॥

अथाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यन्ते ॥ १ ॥

अपिचैवं सति सर्वएव दृष्ट्वा प्रवदन्तीति दृष्टप्रवादाः "कर्मण्यण्" (३–२–१) उपालभ्यन्ते उपालब्धा (निन्दिता) भवन्ति न केवलमहमेव । योऽयं दृष्ट्वा ब्रवीति स दोष एव ॥

यथो एतत्पदेभ्यः पदेतरार्थान्संचस्कारेति * ।
योनन्विते ऽर्थे संचस्कार स तेन गर्ह्यः । सैषा पुरुषगर्हा ॥ २ ॥

यत्पुनरेतदुक्तं–पदेभ्य इत्यादि । अत्र ब्रूमः । योऽनन्विते शब्देनाभिधेयेऽर्थे संचस्कार अर्थात् अननुगतमसंबद्धं, स तेनासंबद्धेन संस्कारेण गर्ह्यो गर्हणीयः "ऋहलोर्ण्यत्" (३–१–१२४) न पुनराचार्योऽनुगतधातुभिरनेकैरेकाभिधानगतानर्थांस्ततः संचस्कार विद्याप्राकर्ष्येण न मौढ्येन सैषा तदभिप्रायापरिज्ञानात्पुरुषगर्हा भवति । पुरुषो हि कश्चिदशिक्षितत्वादेकधातुजमपि नाम न जानाति किं पुनर्बहुधातुजम् । अपिच सन्ति लोके तादृशाः पुमांसो ये कारकहारकादीन्यपि प्रकटक्रियाणि सन्ति, कतमेभ्यो धातुभ्य एतान्यभिनिष्पाद्यन्त इति न जानते । एष पुरुषदोषो न शास्त्रदोषो यदनुगमयितुं शब्दैरर्थो न शक्यतेऽइति ॥

१. तुष्यतुदुर्जनइतिन्यायेनेदमुच्यते । अयमर्थोऽप्रथिताचेदपीति पदकदम्बस्वारस्यात्प्रतीयते ॥

२. एतच्चार्थनिर्वचनं, व्युत्पत्तिस्तु दृष्टं प्रवदन्तीति ॥

३. कस्यांचिद्व्यक्तौ क्रोधपूर्वकं दोषप्रतिपादनमुपालम्भः ।

४. एतेन यदुक्तमननुगत एवार्थे संचस्कार शाकटायनः "सन्तमेव ह्यर्थमाययति गमयतीति सत्यमित्येव"मिति तत्सत्यमेव शाकटायनमतम् । अपिच रूढिशब्दव्युत्पत्तिमन्त्रेष्वपि दृश्यते । यथाच लक्षणं तथैव लक्ष्यं प्रवर्तितुमर्हति । इतरथा हि कस्य तल्लक्षणं स्यात् । तथाहि यदसर्पत्तत्सर्पिरिति मन्त्रः । यन्नवनीतमभवदिति मन्त्रः । अपिच ब्राह्मणे-

यथो एतदपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति * । पश्यामः पूर्वोत्पन्नानां सत्वानामपरस्माद्भावान्नामधेय-प्रतिलम्भमेकेषांनैकेषाम् । यथा बिल्वादो लम्बचूड इति ॥ ३ ॥

यत्पुनरेतदुक्तमपरस्मादित्यादि । अत्र ब्रूमः । पश्या० केषाम् । स्पष्टोऽर्थः ॥

उदाहरति—यथेति । पश्चात्कालिकयापि चूडालम्बनक्रियया भविष्यता योगेन, बिल्वादनक्रियया च पूर्वोत्पन्नस्य सत्वस्य (पदार्थस्य) नामधेयप्रतिलम्भ उपपद्यमानो दृष्टः ॥ बिल्वं निर्वक्ति—

बिल्वं भरणाद्भेदनाद्वा ॥ ४ ॥ ४ ख. सू. ॥

इति या. मु. प्र. निरु. शा. प्र. ध्या. चतुर्थः पादः ॥ * ॥

बिल्वं कस्मात् ? भरणात् । भृतं हि तद्भवति बीजानां, बिभर्ति वा दुर्भिक्षादौ भक्षयितारमिति भरणाद्भेदनाद्वा भक्षणकाले हि तदवश्यं भिद्यते । ततः प्राक् भविष्यत्क्रियया नामोपलम्भः कथमिति युक्तः शास्त्रार्थः ॥ * ॥

इति श्रीमद्यास्कमुनिप्रणीतनिरुक्तलघुविवृतौ नैघण्टुककाण्डे प्रथमाध्यायस्य चतुर्थः पादः ॥

१ अ० ५ पादः ।

एवं नामाख्यातोपसर्गनिपातानां प्रविभागेनावस्थितानां लक्षणं सपरिकरं सोदाहरणमुक्त्वा शास्त्रारम्भप्रयोजनं प्रतिजानीते—

अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते ॥ १ ॥

शास्त्रप्रयोजनारम्भेऽयमथशब्दः । द्वितीयं शास्त्रारम्भप्रयोजनमधिकरोतीति । अपीति सम्भावने अपिपदेषु विभागेनावस्थितेषु लोके वेदे वा, अपिमन्त्रेषु वाक्यभावेनावस्थितेषु यः समस्तोऽर्थस्तस्मिन् (तद्विषयकः) प्रत्ययो विशेषावधारणमिदं निरुक्तशास्त्रमन्तरेण विना, "अन्तराऽन्तरेण युक्त"–(२–३–४) इति द्वितीया ॥ न विद्यते न भवति ॥

अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः ॥ २ ॥

अप्रतियतोऽप्रतिपद्यमानस्यानवधृतार्थस्येति यावत् । नात्यन्तं—नैकान्तिकेन

नापि अनेकधातुजान्येव कृत्वा निरुच्यन्ते । तत्र मन्त्राभिधानानि यत्परिज्ञाने च फलमुपपद्यते । आह (श० ब्रा० १४–८–४–१) "तदेतत्त्रयक्षर ँ हृदयमिति, ह इत्येकमक्षरमभिहरन्त्यसौ स्वाश्चान्ये च य एवं वेद । द इत्येकमक्षरं ददत्यसौ स्वाश्चान्ये च य एवंवेद । यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद" इति ॥ एवं हरतेर्ददातेरेतेर्हृदयशब्दः तदर्थफलोपदर्शनार्थं ब्राह्मणेनैवं निरुक्तः । तच्च नः परं प्रमाणं, तस्माच्छाकटायनस्तदनुदृश्य सम्यगेव कृतवान्यदनेकैर्धातुभिरेकमभिधानं निरुक्तवान् इति शाकटायनाभिप्रायमाह दुर्गः ॥

एकान्तं नाम निश्चयः स एवैकान्तिकं विनयादित्वात्स्वार्थे (५-४-३४) ठक् । नैकान्तिकेनानिश्चयेन स्वरसंस्कारयोरुद्देशः स्वधारणं नास्तीति शेषः । किं कारणम् ? नह्यनवधृतार्थः स्वरसंस्कारावधारयितुं शक्नुयात् । अर्थवशेन हि स्वरसंस्कारावतिष्ठेते ॥

तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम् ॥ ३ ॥

तदिदमुपक्रान्तं निरुक्तशास्त्रं विद्यास्थानं स्वातन्त्र्येणेत्यादिः । विद्याया ब्रह्मविद्याया वेदार्थज्ञानस्येति यावत् स्थानमसाधारण उपायः । अर्थपरिज्ञानस्यैतदधीनत्वात् अर्थवशगत्वाच्च स्वरसंस्कारयोरिदं व्याकरणस्य कार्त्स्न्यं साहाय्येन कृत्स्नभावं पूर्णतां करोतीति शेषः । व्याकरणेन हि स्वरसंस्कारौ चिन्त्येते । तस्मादपरिसमाप्तमेव तावत् व्याकरणं यावन्निरुक्तशास्त्रं नाधिगतमिति । नह्यनैरुक्तोऽर्थमवधारयितुमलं भवति । नानवधृतार्थः स्वरसंस्कारतत्त्वं जानीयादिति ॥

ननु व्याकरणस्य कार्त्स्न्यमेतत्करोतीत्युक्ते तच्छेषमेवैतदुणादिवदिति—गुणशास्त्रत्वमस्योक्तं भवति । ततश्च स्वातन्त्र्येण विद्यास्थानत्वमस्योक्तं विरुध्येतेति गुणशास्त्रत्वं निराचष्टे—

स्वार्थसाधकं च ॥ ४ ॥

यथा कश्चिल्लोके स्वार्थमपरिहाय परानुग्रहं करोति स्वार्थं च साधयत्येवमिदं स्वार्थाजहद्वृत्त्याऽनुषङ्गतो व्याकरणस्य कृत्स्नतां करोति । उणादयस्तु "उणादयो बहुलम्" (३-३-१) इत्युक्तेस्तन्त्रान्तर्भूता एवेति तस्य गुणशास्त्रत्वं युक्तमेव । तस्मात्स्वतन्त्रमेवेदं विद्यास्थानमर्थनिर्वचनात्मकं निरुक्तशास्त्रम् । व्याकरणं तु लक्षणप्रधानम् इति विशेषः ॥

यदि मन्त्रार्थप्रत्ययाय, अनर्थकं भवतीति कौत्सः ॥ ५ ॥

यदि मन्त्रार्थस्य प्रत्ययाय ज्ञानायेदं शास्त्रमारभ्यते तर्हि (एतदर्थमारभ्यमाणमिदं निरुक्तशास्त्रम्) अनर्थकं भवति नास्त्यर्थः प्रयोजनमस्येति कौत्स आचार्यो मन्यते इति शेषः ॥ कुतः ?

अनर्थका हि मन्त्राः ॥ ६ ॥

हि यतो मन्त्रा अनर्थकास्तस्मान्नारब्धव्यमिदमित्येवं कौत्सो मन्यत इति पूर्ववाक्यस्यैव शेषः ॥

तदेतेनोपेक्षितव्यम् ॥ ७ ॥

तत्कौत्सोक्तमेतेन नैरुक्तेन उपगम्य मन्त्राणामर्थवत्त्वमीक्षितव्यमालोचितव्यम् । यद्वा वेदं शास्त्रं चोपगम्येक्षितव्यमयं सत्यं वदति नवेति ॥

स आह—

नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्ति ॥ ८ ॥

मन्त्रा इत्यनुवर्ततेऽर्थवशात् । नियता निरूढा सर्वदैवैकरूपा वाचोयुक्तिः शब्द-

योजना येषु ते । "वाग्दिक्पश्यक्षो युक्तिदण्डहरेष्वि"–(६–३–२१ वा०) ति षष्ठ्या अलुक् । तथैव विपृच्छति–नियतानुपूर्व्या इति । नियतं निश्चितमानुपूर्व्यं पद-प्रयोगपरिपाटी येषां ते तथाभूता मन्त्रा भवन्ति । अग्न आयाहि वीतये (सा. वे. सं. १–१–१–१) इति मन्त्रेण विभावसो आगच्छ संपातायेत्येवमर्थं उच्यते । अत्र नियता आनुपूर्वी पदप्रयोगस्य । तद्यथा अग्न आयाहीत्येवोच्यते न पुनरा-याह्यग्ने इति विभावसो आगच्छेति वा । इहहि लोकेऽर्थवतां शब्दानामनियमेन पर्यायवचनता पौर्वापर्ये च दृष्टं, तद्यथा गामभ्याज गोणीमभ्याज अभ्याजगोणी-मित्यादि । नच तथा मन्त्रेषु । तथाचार्थवत्प्रयोगवैधर्म्यात्पश्यामोऽनर्थका मन्त्रा इति । तथाचानुमितिप्रयोगः । मन्त्रा अनर्थका नियतानुपूर्वीकत्वात् यन्नियतानुपूर्वीकं तन्नानर्थकं (किंत्वर्थवत्) यथा लोके–आहर पात्रं पात्रमाहरेत्यादि ॥ इति (कौत्समतम्) ॥

हेत्वन्तरमाह—

अथापि ब्राह्मणेन रूपसंपन्ना विधीयन्ते ॥ ९ ॥

अथ–अयमपरो हेतुरानर्थक्ये मन्त्राणाम् । यदिमे रूपसंपन्ना रूपेण स्वेन लिङ्गे-नैव संपन्नाः स्वमात्मानं बोधयितुं समर्था अपि सन्तो ब्राह्मणेन शतपथादिना विधीयन्ते तेषु तेषु कर्मसु । यदीमेऽर्थवन्तोऽभविष्यंस्तदा न ब्राह्मणेन तेषु तेषु कर्मसु व्यधास्यन्त । विहिताश्च । तद्यथा—

उरुप्रथस्वेति प्रथयति । प्रोहाणीति प्रोहति ॥१०॥ (श.ब्रा.१–१–६–८)

उरुप्रथस्वेति प्रथनलिङ्गो मन्त्रो विहितः प्रथनैकर्मणि । तथा प्रोहाणीति ब्राह्मणं द्रोणकलशप्रोहणविधौ "इदमहमात्मानं प्रोहामि" प्रोहामि प्राञ्चं प्रेरयामीति प्रोह-णलिङ्गो मन्त्रो विहितः ॥ तस्मालिङ्गसंपन्नविधानादननर्थका मन्त्रा इति युक्तमुत्प-श्यामः ॥ ननु ब्राह्मणस्यैव किमिति नानर्थक्यमुरीक्रियते गुणत्वाद्गुणे त्वन्याय्यक-ल्पनेति न्यायान्मन्त्रास्तु मुख्यैतयाऽवस्थिता इति कथं तेषामानर्थक्यम् इतिचेन्न । ब्राह्मणस्यानर्थक्ये ह्यभ्युपगम्यमाने देशकालकर्तृदक्षिणादि–कर्माङ्गभूतं कुत उप-लभ्येत । अपिचास्यानर्थक्येऽभ्युपगम्यमाने वेदैकदेशस्य मन्त्रस्यात्यन्तमेवानर्थकत्व-

---

१. उरुप्रथा ; उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् (य. वा. सं. १–२२) यजुरिदं पुरोडाशं प्रत्युच्यते । हेपुरोडाश ! त्वं स्वभावत एव उरु विस्तीर्णं यथा स्यात्तथा प्रथते प्रसरतीत्युरुप्रथा विस्तीर्णप्रथनस्वभाव इतीदानीमपि उरु अधिकं प्रथस्व विस्तारयथाः स्वात्मानं । किंचायन्ते यज्ञपतिर्यजमानः प्रजापशुहिरण्यादिभिरुरुप्रथतामधिकं विस्तीर्य-ताम् ॥ "विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् । बड्डोरुविपुल" मित्यमरः ॥

२. पुरोडाशप्रथनविधौ ॥

३. तथाहि मन्त्रब्राह्मणयोर्वेदनामधेयम् । (आश्व०गृह्यम्) इति सूत्रे मन्त्राणामभ्य-र्हितत्वेन पुरस्तात् प्रयोगो मुख्यतां व्यञ्जयतीति वादिनोऽभिमतं । तथाच वार्त्तिकम् "अभ्यर्हितत्वे"–ति (२–२–३४) अल्पाच्तरत्वात्पूर्वप्रयोगो मन्त्रस्येति प्रतिवादिनः । तथाच सूत्रम् "अल्पाच्तरम्" (२–२–३४) इति ॥

मभ्युपगतं स्यान्नहि ब्राह्मणस्य विधिस्तुत्यर्थादतेऽर्थवत्तास्ति । मन्त्राणां पुनर्वाच्यवाचकत्वेनानर्थकानामपि सतां विनियोगमात्रेणार्थवत्ता स्यात् । विधेयत्वाच्चानर्थका मन्त्राः । विधायकत्वाच्च ब्राह्मणमर्थवत् । एतेन मुख्यत्वं मन्त्राणां, ब्राह्मणस्य तु गुणत्वमित्यपि निरस्तं वेदितव्यम् ॥

हेत्वन्तरमाह—

अथाप्यनुपपन्नार्था भवन्ति ॥ ११ ॥

अथ अयमपरो हेतुरानर्थक्ये मन्त्राणां यदिमे अनुपपन्ना अर्था येषां ते तथाभूता भवन्ति । य एष्वर्था उपलभ्यन्ते न त उपपद्यन्ते । तद्यथा—

ओषधे त्रायस्वैनम् । स्वधिते मैनꣳ हिꣳसीरित्याह हिंसन् ॥ १२ ॥

ओषधे त्रायस्व (य. वा. सं. ४–१) एनमित्याह । प्रजापतेरिदमार्षम् कुशतरुणो देवता स एवौषधे इत्यनेन संबोध्यते । क्षुरेण छेत्स्यन्तृणेन (कुशेन) शिखाम् (जूटिकाम्) अन्तर्दधाति तत्रायं मन्त्रो नियुक्तः । हे ओषधे कुशतरुण ! त्वमेनं यजमानं त्रायस्व क्षुराद्रक्षेति तदर्थः । नचौषधय आत्मानमपि त्रातुं समर्थाः किंपुनर्यजमानम् । एवं "स्वधिते मैनं हिंसी" (य. वा. सं. ४–१) रित्याह । इदमपि प्रजापतेरार्षं क्षुरो देवता स एव स्वधिते इत्यनेन संबोध्यते । हे स्वधिते क्षुर ? एनं कुशतरुणं यजमानं वा मा हिंसीरिति तदर्थः । को ह्येवं वदेदात्मनैव हिंसन्[1] । उक्त्वा वा स्वयमेव हिंस्यात् । हिनस्ति च । लोके यान्येवंविधानि वाक्यानि तान्युन्मत्तप्रभृतीनामिति कृत्वाऽनर्थकान्येव भवन्तीतीहापीमान्यनर्थकान्येवेत्युपपद्यते ॥ तस्मादनर्थका मन्त्राः ॥

हेत्वन्तरमाह—

अथापि विप्रतिषिद्धार्था भवन्ति ॥ १३ ॥ इति[3] ।

अन्यस्यान्येन विरुद्धार्थेन प्रतिषेधो वारणं विप्रतिषेधः परस्परव्याघातस्त-

---

१. यद्यपि कोशे "द्वयोः कुठारः स्वधितिः परशुश्च परश्वध" इति कुठारस्य संज्ञामाह स्वधितिरिति । तथापीह छेदनसाधनत्वसाम्याच्छुरे प्रयुज्यतेऽजहत्स्वार्थलक्षणया । यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदमजहत्स्वार्थलक्षणया दध्युपघातके श्वादावपि वर्तते । ये केचन दध्युपघातकास्तेभ्यो दधि रक्ष्यतामित्येव वक्तुस्तात्पर्यात् ॥

२. छिन्दन् । छेदनश्च कुशतरुणस्यैव निषिध्यते, विधीयते च शिखायाः । तथा च कात्यायनः "यूपवत्कुशतरुणं क्षुरेण चाभिनिधाय छित्वे"ति । ८।२।११ ॥ पश्वर्थयूपस्य यथा छेदे मन्त्र एवमत्रापि तृणान्तर्धानं क्षुरस्थापनं च मन्त्रद्वयेन कर्त्तव्यमिति सूत्रार्थः । तथाचैनमिति यजमानाभिधानं कुशतरुणसम्बन्धात् । शिखाद्वारको हि तस्य सः (सम्बन्धः) शिखां छिन्दन् कुशतरुणं यजमानं वा मा हिंसीरिति स्फुटोऽर्थः ॥

३. इतिशब्दोऽयं हेत्वर्थः । 'इतिहेतुप्रकरणप्रकाशादिसमाप्तिष्वि' त्यमरः । तथाचायं प्रयोगः । मन्त्रा अनर्थकाः परस्परविरुद्धार्थत्वाद्यद्यत्परस्परविरुद्धार्थं तत्तदनर्थकं यथा लोके ॥ तदेतदुपपादयति—अन्यस्येत्यादिना—॥

द्विशिष्टा विप्रतिषिद्धास्ते अर्था येषां ते विप्रतिषिद्धार्थाः परस्परविरुद्धार्था भवन्ति । तद्यथा—

एक एव रुद्रोऽवतस्थे न द्वितीयः । असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् । अशत्रुरिन्द्र जज्ञिषे । शतं सेना अजयत्साकमिन्द्रः॥ इति॥१४॥

एक एवेत्यस्य "रणे निघ्नन्पृतनासु शत्रून् । संसृज्य विश्वा भुवनानि गोषा प्रत्यङ्जनान्संचुकोचान्तकाले" इति शेषः । रुद्रस्तुतिरेषा । अवतस्थे—स्थितवान् । रणे रणाय रणार्थं । "निमित्तात्कर्मयोगे" (२—३—३६ वा०) इति सप्तमी । नान्यो द्वितीयः कश्चिदस्तीति रुद्रबहुत्वप्रतिषेधः । कथमवतस्थे पृतनासु सेनासु "ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमू"रित्यमरः । शत्रून् शातयितव्यॉल्लोकानामरातीन् नि-निश्चयेन घ्नन् हिंसन् ॥ किंच स एक एव स्रष्टा पालयिता संहर्ता चेत्याह—संसृज्येति । विश्वा विश्वानि (सर्वाणि) भुवनानि "सुपां सुलुगि"—(७—१—३९) ति जसः स्थाने डा । संसृज्य सम्यक्सृष्ट्वा गोषा रक्षिता सृष्टिकालानन्तरमेव पालयिता च स्थितिकाले । अन्तकाले प्रलयकाले जनान् लोकान् प्रत्यङ् सृष्टिप्रातिलोम्येन संचुकोच संकोचयति वर्तमाने लिट् छान्दसः ॥ अथैतद्विप्रतिषिद्धं (विपरीतं) प्रब्रवीति असंख्याता-भूम्याम् । अस्य—तेषा॑सहस्रयोजनेऽवधन्वानि तन्मसि (य. वा. सं. १६—५४) इति शेषः । शतरुद्रियेऽनुष्टुप् । प्रजापतेरार्षम् । असंख्याता असंख्यातानि सहस्राणि अमिता॑ ये रुद्रा भूम्यामधि भूमेरुपरि स्थिताः । तेषां रुद्राणां धन्वानि धनूंषि "छन्दस्यपि दृश्यत" (७—१—७६) इति दृशिग्रहणाद॑न्येषामप्यन्यत्राप्यनङ् । सहस्रं योजनानि यस्मिंस्तादृशे सहस्रयोजनव्यवहिते पथि मार्गे वयमवतन्मसि अवतनुमोऽवतारयामः अपगतज्यानि कृत्वाऽस्मत्तो दूरं क्षिपाम इति तदर्थः ॥

एवम् अशत्रुरिन्द्र जज्ञिषे—अस्य "त्वं सिन्धूँरवासृजोऽधराचोऽहन्नहिम्" इत्यादिः । "विश्वं पुष्यसि वार्यं तंत्वा परिष्वजामहे नभन्तामन्यकेषां ज्याका अधिधन्वसु"—(ऋ. सं. ८—७—२१—२) इति शेषः । एतयाऽतिच्छन्दसा इन्द्रं तुष्टाव सुदाः पैजवनः । षोडशिनि शस्त्रे विनियुक्ता । हे इन्द्र ! त्वं सिन्धून् स्यन्दनशीलान्

---

१. "समानकर्तृकयोः पूर्वकाल' (३—४—२१) इति हि क्त्वाऽव्यवहितपूर्वकाल एव विधीयतेऽसतिबाधके ॥

२. रुद्रस्तुतिरेवैषा तावदेतानभिष्टुमो यावत्ततानि तानि धनूंषीति स्तोतुरनुध्यानम् । अनेनार्षेण चाग्निचयनेऽर्कपर्णेनाजाक्षीरमिश्रा गवेधुकाः (मुन्यन्नविशेषाः) सप्तकृत्व उत्तरस्यां श्रोणावन्त्यायामिष्टकायां हूयन्ते ॥

३. नास्ति संख्यातं संख्यानं परिगणनं येषां ते, इति सहस्राणीति च बहुत्वोक्त्याऽपरिमितत्वमनन्तत्वमुक्तं भवति । तथाहि "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययो" रित्यभिधानबलेन सहस्रमित्येव भवितुमर्हति "सहस्रं शाखा ह्यर्थतो वेद शवर" इत्यत्र यथा । ततश्च सहस्रं च ३ इत्येवमेकशेषे सहस्राणीति संभवतीति ॥

४. "अस्थिदधी" त्यादिसूत्रानन्तरमस्य विधिः । तद्धि टादावच्येव लोके विधीयते । वेदे पुनरस्थ्यादिभिन्नानां टादिभिन्नेऽप्यच्यनङ् भवतीति भावः ॥

जलपूरितघटवत्[1] अयरमणोमुखमश्वतो गन्तृन् मेघानवासृजो विसृजसि । अतस्त्वं महिमन्तरिक्षे गतं मेघमहन् अभिहतवानसि । यद्वा अहिं आगत्य हन्तारं सर्वस्य जगत आवरकम् । अह व्याप्तौ (स्वा. प.) अह्नोति व्याप्नोति आकाशं दिगन्तराणि वेत्यहिः "सर्वधातुभ्य इन्" (उ. ४. ११४) इतीन्प्रत्ययः । वृत्रमसुरम् । "अहिर्बुध्नासुरे सर्पे" इति मेदिन्यपि । अहन् हतवानसि अतस्त्वमशत्रुः शत्रुरहितो जज्ञिषे जायसे । तथा विश्वं सर्वं वार्यं वरणीयं संभजनीयं धनं पुष्यसि वर्धयसि । इक् संभक्तौ "ऋहलोर्ण्यत्" (३-१-१२४) तं तादृशं त्वां परिष्वजामहे इविभिःस्तुतिभिश्चालिङ्गनं कुर्मः । वशीकुर्म इतियावत् । ष्वंज परिष्वंगे (भ्वा. आ.) "दंशसंजसजां शपी"-(६-४-२५) त्यनुनासिकलोपः ॥ अन्यकेषां कुत्सितानामन्येषां सर्वेषां शत्रूणां "कुत्सिते" (५-३-७४) इत्यधिकृत्य "अव्ययसर्वनाम्नामकच्प्राक्टे"-(५-३-७१) रित्यकच् । ज्याकाः कुत्सिता ज्या मौर्व्यः । कुत्सिते "प्राग्विवात्क" (५-३-७०१) इति कः । अधिधन्वसु धनुष्षु (आरोपिताः) नभन्तां माभूवन् । णभ तुभ हिंसायाम् (भ्वा. दि. क्या. आ.) अत्राद्योऽभावेऽपि । इति सि. कौ. ॥ यद्वा नभन्तां हिंस्यन्तां नश्यन्तां नश्यन्तु इति सायणः ॥ २ ॥ अथैतद्विप्रतिषिद्ध-(विपरीत-) मुच्यते "शतं सेने"ति । अस्य-आशुः शिशानो वृषभो न भीमो धनाघनः क्षोभणश्चर्षणीनां । संक्रन्दनोऽनिमिष एकवीर (ऋ० सं० ८-५-२२-१) इत्यादिः ॥ अप्रतिरथस्येन्द्रपुत्रस्यार्षं त्रिष्टुप् । तेन हि अग्निप्रणयने विनियुक्तेयमिन्द्रस्तुतिः । अस्या अर्थः । अयमिन्द्रः शतं सेनाः शतसंख्याका अनन्ता इत्यर्थः । निरुपपदाः शतसहस्रशब्दा असंख्यातमर्थमाहुः । शतं मनुष्याः । सहस्रशीर्षा पुरुष इत्यादौ यथा । साकं सहैव एकप्रयत्नेनैवाजयत् जयति । वर्तमाने लङ् छान्दसः । कीदृश इन्द्रः । आशुः । अश्नुते व्याप्नोतीति "कृवापेत्यादिना" (उ. १-१) उण् उपधावृद्धिः । अशू व्याप्तौ (स्वा. प.) शीघ्रगामी व्यापको वा । शिशानः । श्यति वज्रं तीक्ष्णीकरोतीति शो तनूकरणे (दि. प.) बहुलं छन्दसीति जुहोत्यादित्वाच्छानचि श्नौ द्वित्वम् । "भृञामिदि"-(७-४-७६) त्रात्र बहुवचननिर्देशादाद्यर्थावगतेर्बाहुलकवलेन स्यतेरभ्यासस्येत्वम् । वृषभो न वृषभ इव विभेत्यस्मादिति भीमः "भीमादयोऽपादाने" (३-४-७४) इति निपातः । धनाघनः घातकः । हन्तेः पचाद्यचि । "हन्तेर्घत्वंच" (३-१-१३४ वा.) इति द्वित्वमभ्यासस्याकागमो घत्वं च । उत्तरस्य लभ्यासाच्च (७-३-५५) इति कुत्वम् । हनहन्तेति वक्ता वा वृष्टिकर्तृमेघरूपो वा "वर्षुकाल्दो धनाघन" इत्यभिधानादिति महीधरः । चर्षणीनां चर्षणयो द्रष्टारो मनुष्यास्तेषां, द्वेष्याणामिति सायणः । प्रत्यनीकावस्थितानामसुरादीनामिति दुर्गः । कृष विलेखने (भ्वा. प.) इत्यस्माद् "कृषेरादेश्च चः" (उ० २-९७) इत्यनिप्रत्यये ककारस्य चकारो गुणश्च

---

१. वारि भवं त्रीह्यादिकमिति दुर्गः ।

२. किमुतान्ये केचनान्मुष्णमाना एतेऽसङ्क्षिप्तेऽवततज्यधनुषो हतसर्वोद्यमाः सन्त्यिवत्यतस्त्वां परिष्वजामह इत्यभिप्रायेण इति दुर्गः ॥

धातोरुपधायाः । क्षोभणः । क्षोभयतीति क्षोभण>नन्द्यादित्वाल्युः । (३–१–१३४) क्षुभ संचलने (भ्वा. आ.) । क्षोभहेतुर्भयजनक इत्यर्थः । संक्रन्दनः सम्यक्क्रन्दिता समाह्वाता शत्रूणाम् । सम्यक्क्रन्दयिता रोदयिता प्राणिनामाकर्षणेन रोदनेन वेति सायणः । सम्यक्क्रन्दनं परभयहेतुर्ध्वनिर्यस्येति महीधरः । समाहूय च अनिमिषः । न निमिषतीति "इणुपधज्ञेति" (३–१–१३५) कः । निमेषरहितः[1] अनलसः आदरवान् जयं प्रतीति दुर्गः । एकवीरः । वीरयति विविधं क्षिपत्यमित्रानिति वीरः । एकश्चासौ वीरश्चेति[2] कर्मधारयः । अन्यनिरपेक्षं शत्रून्संग्रामे जेतुं समर्थः । अप्रतिद्वन्द्व इति यावत् य एवं भूत इन्द्रस्तं वयं स्तुम इतीन्द्रस्तुतिरेषा ॥ १ ॥ एवमितरेतरप्रतिषिद्धान्येतानि मन्त्रवाक्यानि । यद्येको रुद्रः नासंख्यातानि सहस्राणि । अथासंख्यातानि, नैकः । यद्यशत्रुः कथं शतं सेना अजयत् ? । अथ शतं सेना अजयत् कथमशत्रुः ? । लोके हि यान्येतल्लक्षणानि वाक्यानि तान्युन्मत्तादीनामेव भवंतीत्यनर्थकान्येवैतानीति ॥

हेत्वन्तरमाह—

अथापि जानन्तं संप्रेष्यत्यग्नये समिध्यमानयानुब्रूहीति ॥ १५ ॥

जानन्तं विधिज्ञं संप्रेष्यति संप्रेषणं (प्रेरणं) करोति । इष् गतौ (दि.प.) कः कम् ? अध्वर्युर्होतारम् । कथमित्याहाग्नये इति "तदुहैक आहुरग्नये समिध्यमानाय होतरनुब्रूहीति" (श. ब्रा. १–३–२–३) होता हि विधिज्ञ एव भवति । नह्यविद्वान् विहितोऽस्तीति स विजानात्येवामुष्मिन्नवधाविदं मयानुष्ठातव्यमिति । तदेतद्विज्ञातार्थस्य सतः संप्रेषणमनर्थकमेव भवति । यदैतदनर्थकं तदैवमन्येऽपि मन्त्रा इति ॥

अथाप्याहादितिः सर्वमिति ॥ १६ ॥

अथापि अयमपरो हेतुर्मन्त्राणामानर्थक्ये यदाह मन्त्रनिगम इति शेषः । किम् ? अदितिः सर्वमिति । नह्येकः सर्वं माता पिता चेत्येवमादि भवितुमर्हति ॥

अत्रोदाहरणम्—

अदितिर्द्यौरदितिरन्तरिक्षमिति ॥ १७ ॥ (ऋ. सं. १–६–१६–५)

तदुपरिष्टाद्व्याख्यास्यामः ॥ १८ ॥

तत्–एतदुदाहरणम् उपरिष्टात् उपरि अग्रे (निरु. ४–४–१) व्याख्यास्यामः विवि-

---

१. निमेषोऽक्षिपक्ष्मनिकोचः । 'अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तित' इत्यभिधानात् । नास्ति निमेषो यस्य सः । देवत्वात् । यद्वा कदाचिदपि निमेषं न करोति अत्यन्तसावधान इति चर्षणीनां (विनाशच्छिद्रं पश्यतां) प्रतिभटत्वमनेन युक्तंभवतीति महीधरस्वरसः ॥

२. अत्र यद्यपि "पूर्वकालैके"(२–१–४९)ति बाधित्वा परत्वा "त्पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्चेति" (२–१–५८) समासे वीरशब्दस्यैव "प्रथमानिर्दिष्टत्वे नोपसर्जनत्वात्" (१–२–४३) उपसर्जनं पूर्वं (२–२–३०) इति पूर्वनिपाते वीरैक इति प्राप्नोति । तथापि बहुलग्रहणाद्भविष्यति । "कर्तृकरणे कृताबहुलम्" (२–१–३२) इति ॥ अत्र बहुलग्रहणं योगविभागेन सर्वोपाधिव्यभिचारार्थमित्युक्तम् ॥

क्ष्य अदितिरदीना देवमातेत्यादिना आख्यास्यामो निर्वक्ष्यामः शब्दतोऽर्थतश्चेत्यर्थः ॥ इह त्वेवमर्थमियमृगुदाहृता—कथं वैव द्यौः सैवान्तरिक्षम् । वैव माता स एव पुत्रः स एव पितेत्येवमादि परस्परविरुद्धं किमपि बहुत्रासंबद्धमुच्यते ? तदर्थवत्त्वे सत्युपपादयितुमशक्यम् । तस्मादनर्थका मन्त्रा इति ॥

हेत्वन्तरमाह—

अथाप्यविस्पष्टार्था भवन्ति ॥ १९ ॥

नास्ति विस्पष्टः प्रकटं प्रतीयमानोऽर्थो येषां ते तथाभूता अपिहि केचिन्मन्त्रा भवन्ति ॥

तद्यथा—

अम्यग्-यादृशिमन्-जारयायि-काणुकेति ॥ २० ॥

इत्येवमादयः । नह्येषां विस्पष्टार्थता मन्त्रेषु शक्यते परिज्ञातुम् । नच केचिदर्थवन्तः केचिदनर्थका इति न्याय्यमभ्युपगन्तुम् । अर्धवैशंसं हि स्यात् । तस्मात्सर्व एवानर्थका मन्त्रा इति ॥ इतिशब्दः पूर्वपक्षसमाप्त्यर्थ आद्यर्थो वा ॥ * ॥

अर्थवन्तः शब्दसामान्यात् ॥ २१ ॥

मन्त्राः अर्थवन्तः इति प्रतिज्ञा शब्दसामान्यात् शब्दत्वात् इतिहेतुः गवादिवदिति प्रसिद्धमुदाहरणमिति कृत्वा नोक्तम् । त्रितयमेवानुमितौ प्रदर्शनीयं भवत्यवयवभूतम् । यथाहुः अवयवपञ्चकमुपादाय,—

तच्च पञ्चतयं केचिद्वयमन्ये वयं त्रयम् ।
उदाहरणपर्यन्तं यद्वोदाहरणादिकम् ॥ १ ॥ इति ॥

एवं लौकिकहेतुमुक्त्वा वैदिकमुपपादयिष्यन्ब्राह्मणमप्यर्थवत्त्वे प्रमाणयति—

एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाण-मृग्यजुःसामाभिवदतीति च ब्राह्मणम् ॥ २२ ॥

१. अर्द्धजरतीयं स्यादित्यर्थः । यथैका स्त्री अर्धं युवती अर्धं च जरतीति परस्परविरुद्धं न भवति तथेति तदर्थः ।

२. "इतिहेतुप्रकरणप्रकाशादिसमाप्तिष्वि"त्यमरः ॥ आद्यर्थस्तु "ज्वलितिकसन्तेभ्यो णः" (३–१–१४०) इत्यत्र दृष्ट इत्यसकृदुक्तमधस्तात् ॥

३. अवयवत्रयं प्रतिज्ञा–हेतू–दाहरणरूपम् ।

४. प्रदर्शयितुमावश्यकम् ॥

५. शास्त्रदीपिकायां तर्कपादे मैथिलमहामहोपाध्यायश्रीपार्थसारथिमिश्रचरणाः ।

1. विशसनं विशसः हिंसा, शसु हिंसायां (भ्वा. प.) ततः "पुंसि । संज्ञायां" (३–३–११८) मिति घः । स एव वैशसम् स्वार्थेऽण् । अर्धचांदिः । अर्धवैशसस्येत्यर्धवैशसमर्धहिंसनमित्यक्षरार्थः ॥

एतदेव हि यज्ञकर्मणः समृद्धं यद्रूपसमृद्धं मन्त्रलिङ्गैरभिधीयते । तदेव हि समस्तवृत्त्या युक्तं भवति नेतरत् । एतदेव स्पष्टयति–यत्कर्मेति । तस्मादर्थवत्त्वे हेतुद्वयम् । नञ्शब्देनैतदाह अनर्थका हि सन्तः कथंकर्माभिवदेयुः । कथंवाऽनभिवदन्तः समर्धयेयुरिति यदेव भवतां मुख्यं प्रमाणं तदेव तथाविधमस्मदर्थं वाच्यवृत्त्या स्थापयतीति सर्वमवदातम् ॥ १ खं. सूत्रम् ॥

समृद्धरूपत्वं मन्त्राणामुदाहरति—

क्रीळन्तौ पुत्रैर्नप्तृभिरिति ॥ १ ॥

इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम् । क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे (ऋ. सं. ८–३–२८–४२) सवितृसुतायाः सूर्याया आर्षमनुष्टुप् । विवाहे विनियुक्ता । हेवधूवरौ ! युवाम् इहास्मिन्नेव लोके स्तं भवतं स्वे गृहे मोदमानौ हर्षमाणौ सन्तौ मा वियौष्टम् वियुक्तौ मा भवतम् "माङ्योगे" (३–३–१७५) लोडर्थे सर्वलकारापवादत्वात् । "नमाङ्योगे" (६–४–७४) इत्यडभावः । पुत्रैर्नप्तृभिः पौत्रैः सह क्रीळन्तौ विहरन्तौ विश्वं सर्वमायुर्व्यश्नुतं व्याप्नुतमायुर्व्याप्यस्थितौ भवतं प्राप्नुतमिति सायणाः ॥

इत्येवं मन्त्राणामर्थवत्त्वं संस्थाप्य परोक्तदूषणान्यनूद्य सद्धेतुभिर्निराकरोति—

यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति ॥ २ ॥

यथो एतत् यत्पुनरेतदुक्तं नियतेत्यादि । अत्र ब्रूमः । लौकिकेष्वपि ह्यर्थवत्पदेषु एतन्नियतवाचोयुक्तित्वं नियतानुपूर्वीकत्वं दृष्टमेव । यथेन्द्राग्नी, पितापुत्राविति, च । नहि भवति अमीन्द्रौ पुत्रपितरौविति । तथाच प्रयोगनियमादनर्थका मन्त्रा इति यत्साधितं स एष हेतुरनैकान्तिक उक्तप्रयोगे लोकेऽपि व्यभिचरित इति नोक्तार्थसाधकोऽसद्धेतुत्वात् तस्मादर्थवन्त एव ते ॥

यथो एतद्ब्राह्मणे न रूपसम्पन्ना विधीयन्त इति* उदितानुवादः स भवति ॥ ३ ॥

यत्पुनरेतदुक्तं ब्राह्मणेनेत्यादि । अत्र ब्रूमः । उदितानुवादः स भवतीति । उदितस्योक्तस्यैवानुवादोऽनुविधिरुदितानुवादः । अयमर्थः । आत्मानमात्मना विधातुं मन्त्रो न समर्थ इति ब्राह्मणेन मन्त्रोक्त एवार्थो विस्तरेण प्रकृतार्थसन्तुष्ठूषयाऽनूद्य

---

१. अत्र हि "ध्यन्तादजाद्यदन्तं विप्रतिषेधेने"ति नियमाद्यन्तस्याग्निशब्दस्यैव पूर्वप्रयोगः "द्वन्द्वेधी"–(२–२–३२) ति प्राप्तोऽपि न भवति ॥

२. अत्र हि अभ्यर्हितत्वात्पितुरेव पूर्वप्रयोगो भवति "अभ्यर्हितं च"(२–२–३४ वा०) इति नियमात् पितापुत्रावित्येव भवति । अत्र यद्यपि "आनङ् ऋतो द्वन्द्वे" (६–३–२५) इति, ऋदन्तानामेव द्वन्द्व आनङं विदधाति । इति स इह न प्राप्नोति । तथापि "पुत्रेऽन्यतरस्याम्"–(६–३–२२) त्यतो मण्डूकप्लुत्या पुत्र इत्यनुवृत्तेस्तस्मिन् परेऽपि भवति । इति बोध्यम् ॥

विधीयते । नह्यनुक्तं स्तोतुं शक्यते सोऽयमनुक्तानुवाद एव । अभिधानैकेऽपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति । ते ह्यहंपूर्विकयैकं प्रयोगं प्रति खले कपोतवत् संपतन्ति । तेषां समुच्चये विकल्पे च प्राप्ते सति अभिमत एको नियमार्थं ब्राह्मणेन विधीयते । एवमुभयोर्मन्त्रब्राह्मणयोरर्थवत्त्वं साधितम् ॥ तथाच यत्पूर्वमुक्तम् रूपसंपन्नविधानान्मन्त्रानर्थक्यम् । मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्यमिति तदयुक्तम् । तस्मादुभयमप्यर्थवन्मन्त्राश्च ब्राह्मणाश्चेति ॥

यथो एतदनुपपन्नार्था भवन्तीति*आम्नायवचनादहिंसा प्रतीयते॥४॥

यत्पुनरेतदुक्तम्–"ओषधे त्रायस्वैनं," स्वधिते मैनꣳहिꣳसी"रित्यादयो मन्त्रा अनुपपन्नार्था भवन्तीति । अत्र ब्रूमः । ओषध्यधिदेवताऽत्रोच्यते । हे ओषधे! एनं स्वाधिष्ठितमोषधिं कुशं त्रायस्व । त्वत्पूर्वको ह्येष कुशश्छिद्यमानः सम्यक्छिन्नो भविष्यति ततश्च यज्ञे विनियुक्तः प्रतिविशिष्टमुत्कर्षमेतस्याः स्थावरजातेः प्राप्स्यत इत्येतन्नाम्नैमभिप्रेत्योक्तमोषधे! त्रायस्वैनम् । इति । तस्मादुपपन्नार्थ एवायम् । यदपि चोक्तं स्वधिते मैनꣳहिꣳसीरित्याह हिंसन्निति । अत्रोच्यते आम्नायवचनादिति । अत्रेति शेषः । अत्रास्मिन्ननुपदमुपक्रान्ते स्वधिते इत्यादिद्वितीयवाक्ये । अयंभावः । इयं हिंसा; इयमहिंसेत्येतदाम्नायादेवावसीयते । आम्नायश्चायं वैदिक आगमः कृत्स्नस्य जगतः प्रतिविशिष्टाय श्रेयसेऽभ्युद्यतः सन्कर्त्तारं हिंसायां विनियोजयतीत्यहिंसैवैषेति प्रतीयते । तद्वचनात् इति ॥

यथो एतद्विप्रतिषिद्धार्था भवन्तीति* ।
लोकेऽप्येतद्यथाऽसपत्नोऽयं ब्राह्मणो इनमित्रो राजेति ॥ ५ ॥

१. अहंपूर्वमहंपूर्वमहमग्रे भवामीत्याग्रहपुरस्सरं पूर्वं युद्धमहंपूर्विका सुप्सुपेति समासे स्वार्थे कन् । स्त्रियां टाप् । "अहंपूर्वमहंपूर्वमित्यहंपूर्विका स्त्रियामि"त्यमरः ॥

२. प्रथमवाक्ये । फलपाकान्ता व्रीहियवादयो धान्यभेदास्तृणवीरुधश्च ओषधय इत्यभिधीयन्ते । "ओषध्यः फलपाकान्ताः स्यु" रित्यमरः । तात्स्थ्यात्ताच्छब्द्यं यथा गृहा दारा इत्येवं तदधिष्ठातृदेवता ओषधि रित्युच्यतेऽत्र ओषध्य इति "कृदिकारादि"–(४–१–४५ वा०)ति ङीष्वा भवतीति । ओषधिः । ओषधी । रात्रिः रात्रीतिवत् ॥

३. यज्ञे हि विधानतः सकृच्छिद्यमानोऽयं न पुनश्छेदनं प्रतिपत्स्यतेऽल्पमपि कदापीत्यभिप्रायः ॥

४. सर्वेषामितरेषामागमानां प्रभवोयं सर्वतः प्रतिविशिष्टः पुरुषार्थसाधनं न न्यधि कर्मणि पुरुषं प्रवर्त्तयेद्धिंसारूपे । वस्तुतस्तु । द्वेषपूर्वकः प्राणिवध एव हिंसा नहि कश्चित्पशुं द्विषन्यज्ञे हिनस्ति नापि तृणवीरुदादिम् । तदेतन्मीमांसितम् (जै-सू-१–१–२ सूत्रमुपादाय श्लोकवार्त्तिके ॥

५. तथाच दुर्गः । अपिचैतदोषधिवनस्पतिपशुमृगपक्षिसरीसृपाः सन्यगुपयुक्ताः सन्तो यज्ञे परमुत्कर्षं प्रापयन्ति । सोऽयमभ्युदय एव सम्पद्यते । न हिंसा । नह्यसौ हिनस्ति किंतर्हि? अनुगृह्णाति । यज्ञः विनियोगार्थं विधानतश्छिन्दन् । तस्मादुपपन्नार्थ एवेति ॥

यत्पुनरेतदुक्तम् "एक एव रुद्रोऽवतस्थे, असंख्याता सहस्राणि ये रुद्रा" इत्यादयो विप्रतिषिद्धार्था भवन्तीति । अत्र ब्रूमः । नैष विप्रतिषिद्धोऽर्थः । देवता हि महाभाग्ययोगादेकाऽपि सत्यनेकधा भवति, अनेकाऽपि चैकधेति वक्ष्यते "महाभाग्याद्देवतायाः" (दै. का. ७–१–४) इति । यत्पुनरेतदुक्तम् "अशत्रुरिन्द्र जज्ञिषे, शतं सेना अजयत्साकमिन्द्र" इति । अत्र तावदुच्यते लौकिकेष्वप्यर्थवत्सु पदेषु एतदेवमेवोच्यमानं दृष्टम् । तद्यथाऽसपत्न इति । नहि कश्चिदसपत्नोऽस्ति लोके । यथाहुः—

मुनेरपि वनस्थस्य खानि कर्माणि कुर्वतः ।
उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः ॥ १ ॥ इति ॥

तथापि खल्पसपत्नं दृष्ट्वाऽल्पार्थे नञं प्रयुञ्जानोऽसपत्नोऽयं ब्राह्मणः । अनमित्रोऽयं राजेति लोको ब्रवीति । अल्पत्वादसत्त्वं वोपचर्यते यथा लोकेऽनुदरा कन्येति । एवम् कस्मिँश्चिदतिप्रवृद्धे मेघे वृत्रे वा भृशं पातितेऽन्येषामसारतामभिप्रेत्येदमुक्तं स्याद्-"शत्रुरिन्द्र जज्ञिषे" यस्त्वमेतमेवमतिप्रवृद्ध"महन्महिम्" इति । यत्पुनरेतदुक्तं "शतं सेना अजयदि "ति । अत्र ब्रूमः । देवा हि विभवो वशिनोऽधिकरणधर्माः परेण महिम्ना युक्ताश्च भवन्तीति नहि देवानां जेतव्याः शत्रवः सन्ति कुतो हि सेना या इन्द्रो जेष्यति । कथंतर्हि शतं सेना अजयदित्युच्यते ? रूपकल्पनयैवैषा युद्धप्रवादात्स्तुतिः । वक्ष्यति च अपांच ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते । तत्रोपमार्थेन युद्धवर्णा भवन्ति (नै० का० २–५–२) इति । तदेतद्भवता न सम्यगदृश्यते सम्यगनुशिष्यतां देवतातत्त्वं नैरुक्तेभ्यः । ततो मन्त्रार्थानविरोधेन सम्यगवभोत्स्यते । नैवमवाक्यतत्वज्ञेन मन्त्रार्थो विगाहितुं शक्यः गम्भीरपदार्थो हि वेदस्तस्माद्यदुक्तं विप्रतिषिद्धार्था भवन्तीति तदयुक्तम् ॥ इत्थंचार्थवन्त एव मन्त्रा इति साधितम् ॥

यथो एतज्ञानन्तं संप्रेष्यतीति*
जानन्तमभिवादयते । जानते मधुपर्कं प्राह ॥ ६ ॥

यत्पुनरेतदुक्तम् जानन्तं संप्रेष्यतीति । अत्र ब्रूमः । लौकिकेष्वप्यर्थवत्सु पदेष्वेतदेव स्वाभाव्यं दृष्टम् । यत् जानन्तं गुरुं शिष्योऽभिवादयते स्वगोत्रमभिवदन् । "अयमहंभोः शाण्डिल्यः प्रियव्रतो गुरुमभिवादये" इत्येवम् । तथा च गो० गृ० सू० २–३–१३ "अनुमन्त्रिता गुरुं गोत्रेणाभिवादयते । तथा च जानते मधुपर्कं प्राह त्रिर्मधुपर्को मधुपर्को मधुपर्क इति ॥ तदेततर्थवत्स्वपि शब्देषु विहितार्थख्यापनार्थशब्दसामान्यादर्थवन्तो मन्त्रा इति ॥

यथो एतददितिः सर्वमिति* लौकिकेष्वप्येतद्यथा-
सर्वरसा अनुप्राप्ताः पानीयमिति ॥ ७ ॥

---

१. यथात्मानं समुद्रं ध्यायेदिति ध्यानार्थं रूपकल्पना । तथाचाहुर्मीमांसकाः "देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्" (जै० ९–१–६) इति सूत्रे शाबरदीपिकायाम् । (एतच्च पूर्वपक्षसूत्रमित्यपि तत्रैव सुव्यक्तम्) ॥

यत्पुनरेतदुक्तम्–अथाप्याहादितिः सर्वमिति । अत्र ब्रूमः भक्तिरेषा । द्विविधा हि शब्दप्रवृत्तिः मुख्यार्था गौणी च । तदेवंसति यत्र मुख्याऽसंभवस्तत्र गौणी आश्रीयते स एष भक्तिवादोऽदितिः सर्वमिति । यथा कश्चित्कंचिदनेकोपकारिणं ब्रूयात्त्वमेव मे माता, त्वं मे पितेत्येवमेतदपि द्रष्टव्यम् । लौकिकेष्वपि चार्थवत्सु शब्देषु एतदुच्यमानं दृष्टं यथा सर्व० नीयमिति । ततो हि तेषां प्रभव इत्यनया गुणवृत्त्यैवमुच्यते । एवमिहापि गुणवृत्त्या कयाचिददितेः सर्वत्वमुच्यते । तथा च यदुक्तमित्येवमादिपरस्परविरुद्धं किमपि बह्वसंबद्धमुच्यत इति । एतदयुक्तं सर्वमेवैतदुपपद्यते एव गुणवृत्त्या । तस्मादर्थवन्त एव मन्त्रा इति ॥

यथो एतदविस्पष्टार्था भवन्तीति*

नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति ॥ ८ ॥

यत्पुनरेतदुक्तम् अथाप्यविस्पष्टार्था भवन्तीति । अत्र ब्रूमः । नैष स्थाणोरपराध इति । नह्यत्र स्थाणुरपराध्यति यदेनं स्थाणुमन्धो न पश्यति यदत्रासावभिहन्यते । किंतर्हि ? पुरुषापराधः स भवति । पुरुष एवापराधी तत्र यदसावचक्षुष्मान् । एवमिहापि नैव मन्त्राणामपराधो नवा मम यदशिक्षितेन भवता न विज्ञायन्ते । भवत एवापराधोऽस्ति । भो भवान् सर्वमात्मीयमपराधं मन्त्रेष्वस्मासु वा संयोजयितुमिच्छति न तव प्रज्ञास्ति किंचित् ॥

यथा जानपदीषु विद्यातः पुरुषो भवति ॥ ९ ॥

यथा जानपदीषु जनपदभवासु कासुचित्प्रवृत्तिषु (इतिकर्त्तव्यतासु) विद्यातः कौशलशिक्षा (कृ) तः पुरुषः पुरुषाणां[1] विशेषो भवति । एवमिहापि मन्त्रार्थशिक्षाकौशलकृतः पुरुषाणां विशेषो भवत्येव । तत्रैवं सति केचित्पुरुषा विस्पष्टार्थानपि मन्त्रान्न शक्नुवन्ति निर्वक्तुमपरे पुनरविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्तुम् ॥ तदुक्तम् उतत्वः (ऋ. सं. ८–२–२३–४) । (नैघ. का० १–६–३) इत्यत्र ॥

तत्रैवंसति—

पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥ १० ॥. २ ख. ॥

इति या० मु. प्र. निरु. शा० प्र. ध्या. पञ्चमः पादः ॥*॥

---

१. जनाः पद्यन्ते गच्छन्त्यस्मिन्निति जनपदो देशः । "पुंसि संज्ञायामि"–(३–३–११८)ति घः । ततो भवार्थे (४–३–५३) अण् ङीप् । देशप्रसिद्धासु ॥ सर्वजनसाधारणीषु ॥ लोकोक्तिषु–इति केचित् । इत्युच्यते इति तत्र (मते) शेषः ॥

२. यथा पुरुषाय कन्या देयेत्युक्ते पुरुषविशेषाय सद्गुणवत इति प्रतीयते । यन्मूलिका हि मैथिलमहामहोपाध्यायविद्यापतिठक्कुराणां "पुरुषपरीक्षा" ग्रन्थप्रवृत्तिः ॥

---

1. एवं ह्याख्यायते पारावारनामा भूपतिर्मन्त्रिणं सुबुद्धिनामानं मुनिं पप्रच्छ । कस्मै मयेवंपद्मावती कन्या देयेति । स प्रत्याह पुरुषायेति । "नह्यपुरुषाय कन्या प्रदीयत इति किमेवमुच्यते" इति भूपतिना पुनरनुयुक्तः स विद्यातः पुरुषो भवतीत्याहेति ॥

परॉश्चावरॉश्च विदन्तीति पारोवर्यविदस्तेषु । "तद्धितार्थेति" (२-१-५१) समासे "चतुर्वर्णादे-"(५-१-१२४ वा.) राकृतिगणत्वात्स्वार्थे ष्यञ् । "परोवरपरम्परे" (५-१-१०) ति परावरशब्दस्य परोवरादेशो बाहुलकात्स्वप्रत्ययं विनापि भवति । आचार्यपरम्परया विद्वत्सु वेदितृषु ब्राह्मणेषु "यतश्च निर्द्धारणम्" (२-३-४१) इति गुणतो निर्द्धारणे सप्तमी । तेषांमध्ये भूयोविद्यो बहुश्रुतो यो मन्त्रार्थपरिज्ञानकुशलः स एव प्रशस्यः प्रशंसार्हो भवति नेतरः । नहि तेषामविस्पष्टार्थाः केचन सन्ति मन्त्राः । तॉश्चोपरिष्टात्स्पष्टीकृत्य व्याख्यास्यामहे । तस्मादर्थवन्त एव मन्त्रा इति सिद्धम् ॥ तस्माच्चैतदपि शास्त्रं मन्त्रार्थपरिज्ञानायारभ्यमाणमर्थवदेव भवतीति सिद्धः शास्त्रारंम्भः ॥

१ अ० ६ पादः ।

अथापीदमन्तरेण पदविभागो न विद्यते ॥ १ ॥

शास्त्रारम्भप्रयोजनान्तरारंम्भेऽयमथशब्दः । अपीति संभावने । इदं निरुक्तशास्त्रमन्तरेण विना पदविभाग एवं पदानि वक्तव्यानीत्येतद्विभागपरिज्ञानं नास्तीत्यर्थः । किं कारणम् ? अर्थवशेन हि पदान्यवतिष्ठन्ते न चेदमन्तरेणार्थपरिज्ञानमस्ति ॥

एवं प्रतिज्ञाय समानसंहितेषु मन्त्रेष्वर्थहेतुकौ पदाविभागविभागावुदाहरणद्वारा दर्शयति—तत्राद्योदाहृणम्—

अवसाय पद्वते रुद्र मृळेति ॥ २ ॥ (ऋ. सं. ८-८-२७-१)

पदंघ्रिरस्यास्तीति पद्वत्तस्मै पादयुक्तायावसाय पथ्यदनाय गोरूपाय हे रुद्र ! त्वं मृळ सुखयेति प्रार्थना ॥

---

१. तेहि आचार्यपरम्परया मन्त्रार्थं मर्मतत्त्वंच विदन्ति न पुनस्ते साक्षात्कृतधर्माणस्ते तु पुनर्ऋषय एव भवन्ति । यथाच वक्ष्यते (निरु० १-६-५) ॥

२. जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं तस्मिन् ॥

३. अविस्पष्टार्थत्वेन तवाभिमतान् मन्त्रान् ॥

४. एतेन यदि मन्त्रार्थपरिज्ञानायानर्थकं भवतीत्येवं (पादारम्भे १ सू. ५ वाक्यत आरभ्योक्तं) कौत्समतं निराकृत्य प्रतिज्ञातं शास्त्रारम्भप्रयोजनं समर्थितं वेदितव्यम् ॥

५. मयोभूर्वातोऽभिवातूस्रा ऊर्जस्वतीरोषधीरारिशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृळ ॥ १ ॥ कक्षीवद्गोत्रस्य शबरस्यार्षं गोदैवत्यं त्रिष्टुप् । धासाय

---

1. तथाचानुक्रान्तम्—मयोभूः शबरः कक्षीवतो गव्यमिति । सूत्रितंच—गाः प्रतिष्ठमाना अनुमन्त्रयेत "मयोभूर्वातोऽभिवातूस्रा" इति ॥ दुर्गास्तु सुचरो नाम गौतमः स मयोभूरित्यस्यास्त्रिष्टुभः पूर्वैस्त्रिभिः पादैर्गवामाशिषमाशास्योत्तमेन तासामेव रुद्रात्सुखमयाचत । गवामुपस्थाने विनियुक्तेत्याह ॥

पद्वत् । अवसं-गावः पथ्यदनम् ॥ ३ ॥

पद्वत् पादयुक्तम् । अवसं भृशं गन्तृ सत्त्वभूतं लिङ्गसामान्यनपुंसकमेतच्चास्यैकवचनम् । गोजातिमभिप्रेत्य तस्या एवोपक्रान्तत्वादित्यवसपदेन गाव एवोच्यन्त इत्याह गावइति । पथ्यदनमित्यवसमित्यस्यैव निगमप्रसक्तस्य पर्यायवचनम् । पथि अत्तीति । नन्द्यादित्वाल्युः (३-१-१३४) "युवोरनाकौ" (७-१-१) । इत्यनादेशे साधुः ॥

अवतेर्गत्यर्थस्यासौनामकरणस्तस्माच्चावगृह्णन्ति ॥ ४ ॥

गत्यर्थस्य अवधातोः (भ्वा० प०) असौ समित्येष नाम क्रियतेऽनेनेति नामकरणः करणेल्युट् (३-२-११७) संज्ञाप्रयोजकः प्रत्ययोः सश् । शित्वात्सार्वधातुकत्वे (३-४-११३) "कर्त्तरि शबिति" (३-१-६८) शप् । वस्तुतस्तु अवद्गच्छदश्नातीत्यवसं पृषोदरादित्वात् (६-३-१०९) शस्य सः । तस्मादसमासत्वादस्य, नावगृह्णन्ति एतत् पदकारा इति शेषः । इत्येतत्पदविभागोदाहरणम् । अथ पदविभागोदाहरणम्—

अवसायाश्वानिति ॥ ५ ॥ (ऋ. सं. १-७-१८-१ ।)

अस्मिन्वाक्ये पूर्वेण सरूपमेवावसायेतिपदमर्थकृताद्विशेषादवगृह्यते—

स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णन्ति ॥ ६ ॥

स्यतिः "षोऽन्तकर्मणि" (दि० प०) इत्येष धातुरुपसृष्ट उपसर्गेणावेत्यनेन संयुक्तः सन् विमोचनेऽर्थे वर्त्तते अवसात्वेत्यवसायावमुच्येत्यर्थः । तस्माद्गतिसमासरूपत्वादस्य अवगृह्णन्ति एतत्पदकारा इति पूर्ववत् शेषोऽत्रापि बोध्यः ॥

यान्यपि खल्वनवगृह्याणि पदानि समानसंहितानि तेषामप्यर्थकृतमेव विभागवैशेष्यं भवति तद्यथा—

वनं प्रतिष्ठमानानां गवामनुमज्जने विनियुक्ता । मयइति सुखनामधेयं (निघ. ३-६) मिनोति हिनस्ति दुःखमिति मयः । मिञ् हिंसायाम् (स्वा. उ) असुन् औणादिकः । मयः सुखं भावयतीति मयोभूः सुखस्य भावयिता (पुरो) वातः । एता उस्राः गाः "माहेयी सौरभेयी गौरुस्रा माता च सूक्ष्मिणी" त्यमरः । अभि—आभिमुख्येन वातु वहतु । किंच (तेन सुखभावयित्राऽनुद्वेजनीयेन पुरोवातेन स्पृश्यमाना एता गावः) ऊर्ज्जस्वतीः प्रभूतरसाः ओषधीस्तृणानि आ. अभितः रिशन्तां स्वादयन्तु । (आस्वाद्य २ च सलवणस्वादमात्माभिप्रेते काले) पीवस्वतीः प्रवृद्धा जीवधन्या जीवानां प्राणयित्रीरपश्च पिबन्तु । हे रुद्र ज्वरादिरोगस्य प्रेषणेन संहर्त्तः । देव त्वमस्मै पद्वते पादसंयुक्ताय गोलक्षणायावसाय पथ्यदनाय सत्त्वाय मृड सुखय ॥ मैनां हिंसीस्त्वमासामीश्वर इत्यभिप्रायः ॥ १ ॥

१. अवसदलक्षणमुक्तमधस्तात् ( )

२. द्वयोः पदयोर्बहूनां वा यदविच्छेदेनोच्चारणं स समासः समसनं (संक्षेपणमविस्तरकरणं) समास इति निर्वचनात् । भावेऽत्र घञ् । स च समर्थानां (संश्लिष्टार्थानामेव) भवतीति "समर्थः पदविधि"—(२-१-१) रिति शास्त्रमनुशास्ति ॥

दूतो निर्ऋत्या इदमाजगामेति ॥ ७ ॥ (ऋ. सं. ८–८–२३–१)

निर्ऋत्याः पापदेवतायाः दूतः (कपोतः) इदमस्मद्गृहमाजगामेति वाक्यार्थः ॥ अस्मिन्वाक्ये निर्ऋत्या इत्येतस्मिन्पदे सन्दिग्धे—

पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षावाः कारान्तम् ॥ ८ ॥

प्रेक्षा दर्शनम् । पञ्चम्यर्थदर्शनं वा षष्ठ्यर्थदर्शनं वेत्यर्थः । उभयमप्यत्र दृश्यते संभवि च यत एतत् आःकारान्तं पदं निर्ऋत्याः इति ॥ आः"इत्यनुकरणस्यानितिपरकस्य (१–४–६२) निपातत्वेन निपाताच्चकारप्रत्ययस्य "उच्चैस्तरां वा वषट्कार" (१–२–३५) इत्यादौ दर्शनेनेह तथा प्रयोगः । तद्दर्शनेन निपातानां वर्णत्वातिदेशेन "वर्णात्कार" (३–३–१०८ वा.) इति कारप्रत्ययो भवतीति तत्त्वम् ॥

परो निर्ऋत्या आचक्ष्वेति ॥ ९ ॥ (ऋ. सं. ८–८–२२–१)

परः परस्ताद्वर्त्तमानायै निर्ऋत्यै पापदेवतायै आचक्ष्व वयं न बाधनीया इति प्रब्रूहि । इति वाक्यार्थः । अत्र वाक्ये तस्मिन्नेव निर्ऋत्या इत्येतस्मिन्पदे—

---

१. देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम। तसा अर्चाम कृणवाम निष्कृतिं शं नोऽअस्तु द्विपदे शं चतुष्पदे ॥ १ ॥ आङ्गिरसस्य प्रचेतस आर्षं वैश्वदेवं त्रिष्टुप् । कपोतनिलयनशान्त्यै तेनेयं कपोतसूक्ते दृष्टा । तत्रैवास्या विनियोगः । सूत्रितं च कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोत इति प्रत्यृचं जुहुयाज्जपेद्वेति ॥ मन्त्रार्थस्तु । हे देवाः । निर्ऋत्याः पापदेवतायाः सकाशात् इषितः प्राप्तः कपोतः यद्धनादि इच्छन्नभिलषन् इदमस्मदीयं गृहमाजगाम । (यस्य जन्मान्तरकृतकर्मणो विपाकलिङ्गमेतत्कपोतगृहनिलयनं कुड्यादिषु तत्पददर्शनं च) तस्मै पाप्मने तन्निर्हृत्यर्थं युष्मानेवार्चाम हविषा पूजयाम (ततश्चानेन हविर्दानेन तस्य कपोतप्रवेशजन्यस्य दोषस्य) निष्कृतिं परिहृतिं (निर्णेजनं शान्तिं) कृणवाम करवाम । अतो नोऽस्माकं द्विपदे पत्राय शं सुखप्रदं । चतुष्पदे गवा-

प्रथमोऽध्यायः । ८१

दूतो निर्ऋत्या इदमाजगामेति ॥ ७ ॥ (ऋ. सं. ८–८–२३–१)

निर्ऋत्याः पापदेवतायाः दूतः (कपोतः) इदमस्मद्गृहमाजगामेति वाक्यार्थः ॥ अस्मिन्वाक्ये निर्ऋत्या इत्येतस्मिन्पदे सन्दिग्धे—

पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षावाः कारान्तम् ॥ ८ ॥

प्रेक्षा दर्शनम् । पञ्चम्यर्थदर्शनं वा षष्ठ्यर्थदर्शनं वेत्यर्थः । उभयमप्यत्र दृश्यते संभवि च यत एतत् आःकारान्तं पदं निर्ऋत्याः इति ॥ आः"इत्यनुकरणस्यानितिपरकस्य (१–४–६२) निपातत्वेन निपाताच्चकारप्रत्ययस्य "उच्चैस्तरां वा वषट्कार" (१–२–३५) इत्यादौ दर्शनेनेह तथा प्रयोगः । तद्दर्शनेन निपातानां वर्णत्वातिदेशेन "वर्णात्कार" (३–३–१०८ वा.) इति कारप्रत्ययो भवतीति तत्त्वम् ॥

परो निर्ऋत्या आचक्ष्वेति ॥ ९ ॥ (ऋ. सं. ८–८–२२–१)

परः परस्ताद्वर्त्तमानायै निर्ऋत्यै पापदेवतायै आचक्ष्व वयं न बाधनीया इति प्रब्रूहि । इति वाक्यार्थः । अत्र वाक्ये तस्मिन्नेव निर्ऋत्या इत्येतस्मिन्पदे—

चतुर्थ्यर्थप्रेक्षा-ऐकारान्तम् ॥ १० ॥

चतुर्थ्यर्थप्रेक्षा चतुर्थ्यर्थदर्शनमत एतत्पदं निर्ऋत्या इत्यैकारान्तम् । सैंहितायां-"एचोऽयवायाव" (६-१-७८) इत्यायादेशे" लोपः शाकल्यस्ये-" (८-३-१९) ति यलोपः । "पूर्वत्रासिद्धमिति" (८-२-१) यलोपस्यासिद्धत्वान्न खरसन्धि"राद्धुण" (६-१-८७) इति ॥ एवं समानसंहितानामपि पदानामर्थभेदकृतं विभागवैलक्षण्यं सचार्थं इदं निरुक्तशास्त्रमन्तरेण न विज्ञायते अत इदमुक्तम् "अथापीदमन्तरेण पदविभागो न विद्यत"इति ॥

एवं प्रतिज्ञातं समर्थ्याधुना पदविभागप्रसक्तं संहितालक्षणमाह—

परः सन्निकर्षः संहिता ॥ ११ ॥ (पा० १-४-१०९)

परः प्रकृष्टो यः सन्निकर्षः संश्लेषः स्वराणां स्वराधिरूढानां व्यञ्जनानां च परस्परं स्वारैसिकार्धमात्राधिककालव्यवायेनानुच्चारणं सा संहितेत्युच्यते । साच पुनरियम्—

पदप्रकृतिः संहिता ॥ १२ ॥ (ऋ० प्रा० २-१)

पदानां संधीयमानानां प्रकृतिः संहिता, विकृतिस्तुपदानीत्यर्थः । अपरे तु पदान्येव प्रकृतिर्यस्याः सा, विकृतिः संहितेत्यर्थमाहुः ॥ एवं च कृत्वा—

पदप्रकृतीनि सर्वचरणानां पार्षदानि ॥ १३ ॥

८२ निरुक्तविवृतिः ।

चतुर्थ्यर्थप्रेक्षा-ऐकारान्तम् ॥ १० ॥

चतुर्थ्यर्थप्रेक्षा चतुर्थ्यर्थदर्शनमत एतत्पदं निर्ऋत्या इत्यैकारान्तम् । सैंहितायां-"एचोऽयवायाव" (६-१-७८) इत्यायादेशे" लोपः शाकल्यस्ये-" (८-३-१९) ति यलोपः । "पूर्वत्रासिद्धमिति" (८-२-१) यलोपस्यासिद्धत्वान्न खरसन्धि"राद्धुण" (६-१-८७) इति ॥ एवं समानसंहितानामपि पदानामर्थभेदकृतं विभागवैलक्षण्यं सचार्थं इदं निरुक्तशास्त्रमन्तरेण न विज्ञायते अत इदमुक्तम् "अथापीदमन्तरेण पदविभागो न विद्यत"इति ॥

एवं प्रतिज्ञातं समर्थ्याधुना पदविभागप्रसक्तं संहितालक्षणमाह—

परः सन्निकर्षः संहिता ॥ ११ ॥ (पा० १-४-१०९)

परः प्रकृष्टो यः सन्निकर्षः संश्लेषः स्वराणां स्वराधिरूढानां व्यञ्जनानां च परस्परं स्वारैसिकार्धमात्राधिककालव्यवायेनानुच्चारणं सा संहितेत्युच्यते । साच पुनरियम्—

पदप्रकृतिः संहिता ॥ १२ ॥ (ऋ० प्रा० २-१)

तायाः) प्रकृतिर्येषु[1] तानि तथाभूतानि भवन्ति[2] ॥

अथापि याज्ञे दैवतेन बहवः प्रदेशा भवन्ति ॥ १४ ॥

शास्त्रारम्भप्रयोजनविशेषाधिकारार्थोऽयमथशब्दः । अपीति संभावने । अपीदं वक्ष्यमाणमपीत्येवम् । किम्? याज्ञे यज्ञविहिते कर्मणि देवतेन लिङ्गेन उपलक्षणे तृतीया (पा० २–३–२१) उपलक्षिता इति तदर्थः । बहवः प्रदेशा[3] विधिषु देशा भवन्ति । तद्यथा ज्योतिष्टोमे श्रूयते–आग्नेय्याऽऽग्नीध्रमुपतिष्ठते, ऐन्द्र्या सदः, वैष्णव्या हविर्धानमित्येवमादि । याज्ञिकाः खल्वपि न्यायविदो (मीमांसकाः) लिङ्गतो मन्त्राणां शेषभावमधिकृत्य पठन्ति[4] "लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाख्यानम्" इति (जै. सू. ३–२–१९) "अधिकारे च मन्त्राविधिरतदाख्येषु शिष्टत्वादि"तिच (जै. सू. ३–२–२०) एवमादि—

तदेतेनोपेक्षितव्यम् ॥ १५ ॥

तदेतन्न्यायविदुक्तमेतेन नैरुक्तेनोप (प्रवेश्य बुद्धिम्) ईक्षितव्यमालोचितव्यं किमिमे वदन्तीति–॥

ते चेद्ब्रूयुर्लिङ्गज्ञा वयमत्र स्म इति ॥ १६ ॥

ते न्यायविदश्चेद्यदि ब्रूयुर्वयमत्रैतस्मिन्नाम्नाये लिङ्गज्ञा लिङ्गज्ञातारः स्मो भवामः । लिङ्गतो वयमत्र यद्यस्मिन्देवतारूपं तत्तत्र विजानीमः । विज्ञाय च तं मन्त्रं तद्दैवत एव कर्मणि विनियोक्ष्यामहे । एवंच सति न नो निरुक्तशास्त्रेण प्रयोजनमस्ति

---

१. तान्येव हि तत्र प्रकृतित्वेन चिन्त्यन्ते । तेषामेव च सन्धानं संहिता । "दधातेर्हि" (पा० ७–४–४२) त्यादौ किति । अत्र हि संपूर्वाद्दधाते "गत्यर्थाकर्मके" (पा० ३–४–७२) त्यादिना कर्तरिक्तः ॥

२. नन्वत्रोपक्रान्ते व्याख्यानद्वयेऽपरस्यैवानेन ज्यायस्त्वमुक्तं भवति नचैतद्युज्यते यतो हि मन्त्रदृश ऋषेः सकाशादभिव्यज्यमानो मन्त्रः पूर्वं संहितयैवाभिव्यज्यते न पदैः । अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणा अधीयते चाध्येतार इति चेत्सत्यम् । एतदभिप्रेत्यैवापरेत्वित्येवमयं पक्षः केषांचित्प्रातिशाख्यीयानां, व्याख्याभेदेनोपन्यस्त इत्यवेहि ॥

३. प्रदेशपदेन सर्वत्र शास्त्रे विशेषतो व्याकरणे निरुक्ते च विधिदेश उच्यते । तद्देशीयत्वमेव हि तस्य प्रकर्षः । विधिर्हि विधायकं वाक्यं सर्वतः प्रधानं तदङ्गभूताश्चान्य इति ॥

४. शिष्यते विशेषणीक्रियतेऽसौ शेषोऽङ्गं तद्भावस्तत्त्वमङ्गत्वं कर्मसु विनियोगकाले ।

५. इदंच सूत्रद्वयं शाबरभाष्ये सपरिकरं पूर्वपक्षे स्थापितम् । सिद्धान्तसूत्रं तु तत्रैव तृतीयम् (२१) "तदाख्यो वा प्रकरणोपपत्तिभ्याम्" ॥ इति ।

६. "सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयत" इति मीमांसापरिभाषा । यस्य शब्दस्य यदर्थप्रकाशनसामर्थ्यं तदेव तस्य लिङ्गमिति सोदाहरणं "श्रुतिलिङ्गवाक्ये" त्यादिसूत्र (जै० ३–३–१४) व्याख्याने शास्त्रदीपिकादौ द्रष्टव्यम् ॥

लिङ्गमेवास्माकं ज्ञापकं देवतानामिति—त एवं ब्रुवन्तः प्रतिवक्तव्या यदि वयं लिङ्गतो मन्त्रदेवतां विजानीध्वे—तदा—

इन्द्रं न त्वा शवसा देवता वायुं पृणन्तीति ॥ १७ ॥ (ऋ. सं. ४–५–६–२)

इत्यत्र—

वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे ॥ १८ ॥

अत्र तावदाग्नेये मन्त्रे इन्द्रवायू अपि श्रूयेते । तदेतदुष्परिज्ञानं लिङ्गमात्रेण कतमदत्र प्रधानं देवताभिधानं कतमदत्र नैघण्टुकम्? इति । तस्मात्परिशेषं निरुक्तम् तेन हि एकमन्त्रगतानां देवताभिधानानां गुणप्रधानभावः शक्यते विज्ञातुम् ॥

उदाहरणान्तरमाह—

अग्निरिव मन्योत्त्विषितः सहस्वेति ॥ १९ ॥ (ऋ. सं. ८–३–१९–२)

---

१. अथाग्नेयत्वं कथमस्येति चेच्छृणु "त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महिनः श्रोष्यग्ने । इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः" ॥ २ ॥ इति ॥ अयं हि मन्त्रः । अस्यार्थः । भरद्वाजस्यार्षं त्रिष्टुप् आग्नेयी । प्रातरनुवाकाश्विनशस्त्रयोर्विनियुक्ता । हे अग्ने ! त्वामेव मन्द्रतमं मृदुतमं स्तुत्यतमं वा अर्कशोकैरर्कैर्वचनीयैः शोकैर्दीप्तिभिर्ब्रह्मचर्यजनितवीर्यैर्युक्तम् । "इत्थंभूतलक्षण"–(पा० २–३–२१) इति उपलक्षणे तृतीया ववृमहे वृणीमहे संभजामहे "वृङ् संभक्तौ" (क्रया० आ०) हि यतोऽतस्त्वं नोऽस्माकं महि महत् स्तोत्रं (तैरेव मन्त्रैर्युष्मद्गुणानुस्मृतिसन्तानगर्भैरुपग्रथितं) श्रोषि शृणु । किंच एवं त्वं महती देवता येन त्वामेवैकं सर्वा अपि देवता इन्द्रं नेन्द्रमिव वायुमिव च शवसा बलेन युक्तं यद्वा बलेन वायुं गन्तारं, वा गतिगन्धनयोः (अ० प०) उणू "आतो युगिति" (पा० ३–३–१२८) युक् । पृणन्ति अभ्यर्थन्ति । अथच ये नृतमा नृषु बलधनश्रुतैः श्रेष्ठाः । स्तुतीनां वा नेतृतमा ऋत्विजस्ते उभयेऽपि राधसा हविर्लक्षणेन धनेन । राधः शब्दो धनवचनः (निघ० २–१०) राध्नोतेरसुन्नन्तः राध्नोति साध्नोति धर्मादीन् पुरुषार्थानिति राधः । पृणन्ति प्रीणयन्ति तर्पयन्ति । यद्वा एते नृतमा देवतां देवतात्मानं त्वां पृणन्तीति "सुपां सुलुगि" (पा० ७–१–३९) त्यादिनाऽमो लुक् । पृण प्रीणने (तु० प०) प्रीणनं तर्पणमिति ॥ २ ॥

एवमयमाग्नेयो मन्त्रः । स एष लिङ्गमात्रदर्शनेनाविज्ञातप्रधानदेवतो विनियुज्यमान ऐन्द्रे वायव्ये वा कर्मणि कर्तुरभिप्रेतफलसिद्धै नालं स्यात् । कर्मवैगुण्याच्च कर्तुरपध्वंसः स्यात् । तस्माद्विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्तमिदमिति समुदितोऽर्थः ॥

२. लिङ्गतो देवताविनियोगे दोषभूतं द्वितीयमुदाहरणमाहेत्यर्थः ॥

३. अग्निरिव मन्यो । त्विषितः सहस्व सेनानीर्न सहुरे धृत धृषि । हत्वाय शत्रून्विम-

---

1. "सावधारणं हि सर्वं वाक्यमभ्यक्षो वायुभक्ष इति । अप एव भक्षयति वायुमेव भक्षयतीति गम्यत इति महाभाष्योक्तदिशाऽत्रावधारणपरतया व्याख्यातम् ॥

2. सुखाराध्यतममिति यावत् । त्वं हि देवेषु मृदुतमहृदयो यतोऽतस्त्वामेव संभजामह इत्यन्वयः ॥

इत्यत्र—

तथाग्निर्मान्यवे मन्त्रे ॥ २० ॥

यथा पूर्वस्मिन्नाग्नेये मन्त्रे वायुलिङ्गमिन्द्रलिङ्गं च तथा एतस्मिन्नपि मान्यवे मन्युदेताके मन्त्रे अग्निः अग्निलिङ्गं नैघण्टुकम् । एवमनेकदेवतालिङ्गसङ्कटेषु दुरवधारं देवतातत्त्वमनैरुक्तेनाप्रसिद्धमन्त्रव्याख्यानसमयेन । तस्माद्यदुक्तं तैर्लिङ्गत एव मन्त्रान्कर्मसु विनियोक्ष्यामहे न नो निरुक्तशास्त्रेण प्रयोजनमस्तीति तदयुक्तम् ॥

अथ मन्त्रस्थं त्विषित इत्येतत्पदमर्थतो व्याचष्टे निर्ब्रवीति च—

त्विषितो ज्वलितः । त्विषिरित्यप्यस्य दीप्तिर्नाम भवति ॥२१॥

अस्य नैरुक्तस्य नैघण्टुककाण्डेऽपठितमपि दीप्तिनामसु त्विषिरित्येतद्धातुस्वरूपं दीप्तिरित्येतन्नाम प्रसिद्धं भवति । लोकेऽपि त्विष दीप्तौ (भ्वा. उ.) क्विप् । त्विट् संजाताऽस्येति त्विषितः । "तदस्य संजातं तारकादिभ्य इतच्" (पा. ५–२–३६) एवमन्यान्यपि धातुरूपाणि नैघण्टुकप्रकरणेऽपठितान्यपि लोकवेदप्रसिद्धान्युपादाय व्याख्येयानीति भावः ॥

अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥ २२ ॥ १ खं. सू. ॥

अथापीदमपरमारम्भप्रयोजनमस्य–यदत्र लोके शास्त्रे च ज्ञानं प्रशस्यते, अज्ञानं च निन्द्यते । तत्रैवंसति वयमनिन्द्याः स्याम प्रशस्याश्चेति ज्ञेयं निरुक्तम् । अतो हि आध्यात्माधिदैवताधियज्ञाभिधायिनां मन्त्राणामर्थाः परिज्ञायन्ते । तेच परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति । तदेवमखिलपुरुषार्थोपकारसमर्थशास्त्रमिति न्याय्यमारब्धुम् ॥ १ ॥ अथ क्व पुनर्ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यत इत्यपेक्षायां लोके तावत्प्रसिद्धमेव । शास्त्रेऽपि—

स्थाणुरयं भारहारः किलाभूत् ॥ १ ॥

जस्व वेद ओजो विमानो विमृधो नुदस्वा ॥ २ ॥ इयं त्रिष्टुप् तपसः पुत्रेण मन्युना दृष्टा । तस्यैवेदमार्षं मन्युदैवत्यम् । अजिरनाम्न्यभिचारे विनियुक्ता । हे मन्यो ! अग्निरिव त्विषितो ज्वलितः सहस्व अभिभव नः शत्रून् । हे सहुरे ! सहनशील ! नोऽस्माकं संग्रामे हूत आहूतः सन् सेनानीःसेनाध्यक्ष एधि भव । किंच हत्वाय हत्वा "क्त्वोयगि"–(पा० ७–१–४७)ति यगागमः । शत्रून् विभजस्व प्रयच्छास्माकं वेदो धनं शत्रुसंबन्धि । किंच ओजोविमानः अस्माकं बलं कुर्वन्मृधः संग्रामात् शत्रून् विनुदस्व क्षिप दूरीभूतान्कुरु । यद्वा मृधः शत्रून् विनुदस्व घातयेत्यर्थः ॥ २ ॥

१. तावदित्ययं साकल्ये वर्त्तते । "यावत्तावच्च साकल्येऽवधौ मानेऽवधारण" इत्यमरात् । तथाच लोके सर्वत्रैतत्प्रसिद्धं प्रत्यक्षमेव यथः कश्चिद्विद्वान्भवति स पुण्यफलैर्विभिर्जनैः पूज्यते इति ॥

---

1. यद्यपि मृधशब्दः संग्रामवचनः (निघ० २–१७) पठितः । मृधिर्हिंसार्थ इति स्कन्दस्वामिभाष्यम् ततः क्विप् । तथापि तात्स्थ्यात्ताच्छब्द्यं यथा गृहा दारा इतिवदत्र तत्स्था रिपवोपि मृध इत्युच्यन्ते ॥

स्थाणुर्वृक्षः । स यथा पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव संबध्यते न तज्जनितैर्गन्धरसरूपस्पर्शोपभोगसुखैस्तथायमपि । अभूत्किलेति संभावने ॥ कः ?—

अधीत्य वेदं न विजानाति योऽर्थम् ॥ २ ॥

वेदाध्ययनस्य भारमात्रमेव ह्यसौ बिभर्ति ॥ अथ–

योऽर्थज्ञ इत्सकलं भद्रमश्नुते ॥ ३ ॥

इदित्ययमेवकारार्थे भिन्नक्रमश्च । य एवार्थज्ञो भवति (न ग्रन्थमात्राध्येता) स एव सकलमनवखण्डितं भद्रमर्थपरिज्ञानफल–(मिहलोके शिष्टानां पूज्यतादिक–) मश्नुते प्राप्नोति । इतो लोकादन्तकाले च—

नाकमेति ॥ ४ ॥

कमिति सुखनाम । तथा चोक्तं कमित्युदकसुखयोरिति । तत्प्रतिषिद्ध(मकं दुःख) म्प्रतिषिध्यते "नवाऽअमुं लोकं जग्मुषे किंचनाकम्" नवा अमुं लोकं गतवते किंचनासुखम् । पुण्यकृतो ह्येव तत्र गच्छन्ती"ति (नैग० का० २–४–२) ॥ न अकं यस्मिंस्तन्नाकम् । न श्राडि-(पा० ६–३–७५)त्यादिना नलोपाभावो निपातनात् । तन्निरतिशयं स्थानमेति स्वर्गाख्यम् । नहि यत्र किमप्याध्यात्मिकमाधिदैविकमाधिभौतिकं वा दुःखमस्ति ॥ अत्र हेतुं विशेषणमुखेनाह—

ज्ञानविधूतपाप्मा ॥ ५ ॥

यतोऽयसौ ज्ञानेन विधूतास्तिरस्कृताः (नाकगमनप्रतिबन्धिनः) पाप्मानः पापानि यस्य स तथाभूतोऽतोऽसौ नाकमेति । तथाचोक्तं भगवता गीतायाम्–"नहि ज्ञानेन सदृशं पवित्रमिह विद्यत" इति । पवित्रं पावनं पापनाशकमिति यावत् । तथाच "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन ।" इति भगवद्वाक्यम् ॥

एवंतावदस्मिन्पद्ये ज्ञानं प्रशस्तमथैतस्मिन्नज्ञानं निन्द्यते—

यद्गृहीतमविज्ञातम् ॥ ६ ॥

यद्गृहीतं श्रुतं गुरुमुखाच्छब्दतोऽर्थतश्चाविज्ञातं किंच—

निगदेनैव शब्द्यते ॥ ७ ॥

१. यद्वा स्थाणुर्गर्दभः । स यथा चन्दनभारं वहन्नपि तद्गन्धाद्युपभोगैर्न सम्बध्यते । एवंकिलासौ यो ग्रन्थमात्राध्येता नार्थज्ञ इति भावः ॥

२. तथाचामरः "वार्त्तासंभाव्ययोः किले"ति ॥

३. तथाच मेदिनी"कं शिरःसुखवारिषु" इति ॥

४. तत् लोकवेदप्रसिद्धम् ।

५. आध्यात्मिकं वातपित्तश्लेष्मणां वैषम्यनिबन्धनम् । आधिदैविकं यक्षराक्षसपिशाचग्रहाद्यावेशनिबन्धनम् । आधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिबन्धनमित्येतद्दुःखत्रयमुच्यते ।

६. तथाचामरः "अकं पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मष"–मिति ॥

निगदेन पाठमात्रेणैव निरुक्तं शब्द्यते उच्चार्यते न पुनरर्थतो विचार्यते ॥ तस्य किमित्यपेक्षायामाह—

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥ २ ॥ ८ ॥

यथा शुष्कमेधः काष्ठमनग्नावग्निरहितप्रदेशे न ज्वलति न दीप्यते । ज्वल दीप्तौ (भ्वा० प०) एवमर्थानभिज्ञेऽध्येतरि तदधीतमपि निष्फलं भवति । परिज्ञातं तु तदेव श्रेयसाभ्युदयेन च युनक्तीति सर्वथा तत्परिज्ञानाय निरुक्तशास्त्रमिदमारम्भणीयमिति भावः ॥

स्थाणु शब्दमर्थशब्दं च निगमप्रसक्तौ निर्वक्ति—

स्थाणुस्तिष्ठतेरर्थोऽर्त्तेः । अरणस्थो वा ॥ ९ ॥ २ ॥

तिष्ठतेर्गतिनिवृत्त्यर्थात्स्थाधातो (भ्वा. प.) र्णु प्रत्ययः (उ० ३-३७) ॥ नित्यकालमेवासौ तिष्ठति स्थितो भवति न कदाचिदप्यास्ते । अर्थः अर्त्तेर्गत्यर्थात् ऋधातोः (जु० प०) "उषिकुषीति" (उ० २-४) कर्मणि थन् । गुणः । अर्यते ह्यसावर्थिभिः । यद्वाऽरणस्थोऽर्थः । अरणं गमनम् । "ल्युट्च्वे"ति (पा० ३-३-१) ल्युट् । योरनादेशः । तत्र तिष्ठतीत्यरणस्थः । पृषोदरादिः यदास्य स्वामी गच्छत्यस्मालोकाल्लोकान्तरं तदायमिहैव (लोके) तिष्ठति न तेन सहामुं लोकं गच्छतीति हिरण्यादिरर्थः । तत्सामान्यादितरोऽपि शब्दाऽर्थोर्थ इत्युच्यते ॥

एवं तावच्छिष्टानुगमस्मृतौ ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यत इति दर्शितम् । इदानीं न केवलं स्मृतावेव (ज्ञानं प्रशस्यतेऽज्ञानंच निन्द्यते) अपितु श्रुतावपीति प्रदर्श्यते खण्डसूत्राभ्याम् ॥

तत्राद्ये-यथा—

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥ १ ॥

(ऋ. सं. ८-२-२३-४ ।)

वाक्सूक्तमियमृग्बृहस्पतिना दृष्टा । एवमपरापि । त्रिष्टुप् ॥ अत्रोतशब्दोऽप्यर्थे । उशब्दो वितर्के । सचात्र पूर्वोक्तानभिज्ञवैलक्षण्यायात्र प्रयुक्तः निपातानामनेकार्थत्वात् ॥ त्व इत्येकवाची । तदाह—

अथैकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनाम् ॥ २ ॥

अयमर्थः । बहूनामपि समानोदरपृष्ठपाणिपादानां समानमेवाध्ययनमधीयानानामेकः कश्चित् पुरुषः पाठमात्रपर्यवसितः पश्यन्नपि मनसा पर्यालोचयन्नपि वाचं वेदरूपां न पश्यति । अर्थ विज्ञानरूपदर्शनफलाभावात्[३]। मूले ददर्शेति छान्दसो लिट्

---

१. इदं शाखान्तरगतं मन्त्रवचनद्वयमिति ऋग्भाष्यभूमिकायां सायणः ॥

२. अनुपदं (४ खं. सूत्रे) वक्ष्यमाणा "उतत्वं सख्ये" इत्यादिकापि ॥

३. एतच्च महाभाष्यकुब्याख्यानानुसारेणोक्तम्। सायणस्तु—पश्यन्नपि न सम्यक्पश्यति।

लब्धेर्थे ॥ एवमेकः शृण्वन्नपि एनां वाचं न शृणोति श्रवणफलाभावात् । येनैव हि वाचोऽर्थोऽवबुध्यते तेनैव सा श्रुता भवति नेतरेणाविदुषा । तदाह—

इत्यविद्वांसमाहार्धम् ॥ ३ ॥

इत्यर्धमनेनार्धचैनाविद्वन्निन्दनमाह मन्त्रदृगित्यर्थः ॥

अथ तृतीयपादेन विदितवेदितार्थमर्थज्ञं प्रशंसंस्तदर्थमाह—

अथैकस्मै तन्वं विसस्र इति ॥ ४ ॥

अथैकस्मै कस्मैचिदर्थज्ञाय तन्वं तनुं "वाच्छन्दसिअमिपूर्वं" (पा० ६–१–१०७) इति पूर्वरूपाभावपक्षे यण् । विसस्रे विस्रंसयति विवृणोतीति तदर्थस्तदाह—

स्वमात्मानं विवृणुते ज्ञानम् ॥ ५ ॥

इति । ज्ञानमित्यनेनार्थो लक्ष्यते । तद्विषया हि वागुच्यते । अर्थो हि वाचः शरीरम् । तं विवृणोत्यात्मानं दर्शयति प्रकाशयतीत्यर्थस्तदाह—

प्रकाशनमर्थस्याहानया वाचा ॥ ६ ॥

अनया वाचा अनेन तृतीयेन पादेनेत्यर्थः ॥ कथं तर्हि विवृणुते तन्वमित्यतः—

उपमोत्तमया वाचा ॥ ७ ॥

एकवचनबहुवचनादिविवेकाभावे पाठशुद्धेरपि कर्तुमशक्यत्वात् । वायुमेव स्वेनभागेनोपधावति स एवैनं भूतिं गमयति (तै. सं. २–१–१) आदित्यानेव स्वेन भागधेयेनोपधावति त एवैनं भूतिं गमयंति (तै. सं. २–३–१) इत्यादावव्युत्पन्नः कथं पाठं निश्चिनुयात् । अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि शृण्वन्नपि मीमांसारहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति यावतोऽश्नान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदि–(तै. सं. २–३–१२) ति । अत्र व्याकरणमात्रेणाप्रतिगृहीतुरिष्टिः प्रतीयते । मीमांसायां तु न्यायेन दातुरिति निर्णीतम् । तस्मादुभयमप्यविद्वांसं प्रत्येवमाहेति व्याख्यत् ॥

१. अर्थज्ञानपूर्विका प्रवृत्तिनिवृत्ती एव श्रवणफलं तदभावे तच्छ्रवणमप्यश्रवणप्रायमिति भावः ॥

२. नहि मन्त्रः कंचिदर्थमाह किंतु तेन तद्वक्ता । अयं च न्यायवैशेषिकसंमतोऽध्वा । मीमांसका–(जैमिनीया)–स्तु वेदमपौरुषेयं मन्वाना मन्त्रस्यैव स्वातन्त्र्येण प्रवर्त्तकत्वं निवर्त्तकत्वं चाहुः ॥

३. तृतीयपादार्थम् सायणस्तु–यः पुमान्व्याकरणाद्यङ्गैः स्वशब्दार्थं मीमांसया तात्पर्यंच शोधयितुं प्रवृत्तस्तस्मा एकस्मै वेदः स्वकीयां तनुं विसस्रे । स्वमित्यादिकं पदव्याख्यानम् । ज्ञानमित्यादिकं तात्पर्यव्याख्यानम् । वेदार्थप्रकाशनक्षमं सम्यग्ज्ञानमनया तृतीयपादरूपया वाचा मन्त्र आहेत्येवं व्याचख्यौ ॥

४. अपिशब्दोऽत्र उतशब्दस्य मन्त्रोक्तस्य पर्यायः । सचाथशब्दसमानार्थोऽत्र (निरुक्ते) बहुत्र व्याख्यातः ॥

उत्तमया वाचा उत्तमेन (अन्तिमेन) पादेन "जायेव पत्ये उशती सुवासा" इत्यनेन तृतीयपादस्योपमा "उच्यत" इति शेषः ॥ तदर्थमाह—

जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु ॥ ८ ॥

यथा जाया जायतेऽस्यामित्यधिकरणे घञ् बाहुलकाज्जादेशे आतो युक् । (पा० ७–३–३३) तथाच निगमः "तज्जाया जाया भवति यदस्यां जायते पुन"रिति । पत्ये इष्टाय भर्त्रे । उशतीत्यस्यार्थमाह कामयमाना इच्छन्ती वशकान्तावित्यादादिकस्य शतैरि डिति संप्रसारणे "उगितश्चे" (पा० ४–१–६)ति ङीप् । संभोगार्थमत्यर्थं प्रार्थयमानेतियावत् । कदेत्यपेक्षायामाह ऋतुकालेषु । "षोडशैतुर्निशा स्त्रीणा"मिति मनूक्ते रजोनिर्गमदिवसादारभ्य षोड़शाहोरात्राणि ऋतुस्तदुपलक्षिताः काला ऋतुकालास्तेषु । तत्रापि न सर्वदा किंतु यदा सुवासास्तदर्थमाह—

सुवासाः कल्याणवासाः ॥ ९ ॥

बहुव्रीहिणा निर्णिक्तवसना नीरजस्का "भवति तदे"ति शेषः । तथाभूता च चतुर्थादिषु रात्रिषु भवतीति व्यक्तमन्यत्र ॥

कामयमाना ऋतुकालेषु ॥ १० ॥

अयं च प्रतिज्ञाभ्यासो निगमलक्षणम् । तथाचोक्तं "प्रतिज्ञाभ्यासो निगम" इति ॥ तदाहि साऽतितरां संभोगार्थं पुरुषं प्रार्थयतेऽत एतयावस्थयोपमीयते । इत्थंच । यथा जाया पत्नी विवृतसर्वाङ्गावयवा भूत्वाऽत्यर्थकामयमाना सती पत्ये इष्टाय भर्त्रे

---

१. तुरीयपादार्थम् ॥

२. शतुर्ङित्वं "सार्वधातुकमपिदि"–(पा. १–२–४)ति । संप्रसारणंच "ग्रहि ज्येति" (पा. ६–१–१६) ॥

३. अस्यार्थमाह रक्तेत्यादिना ॥

४. शोभनं वासो वस्त्रं यस्या इत्येवम् ॥

५. रजोदिवसादित्यादिः । आद्यासु हि तिसृषु रजोनिर्गमावश्यंभावान्न सा नीरजस्का भवति । अतएव याज्ञवल्क्यः । "स्त्रीधर्म्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शये"दित्यादि । स्त्रीधर्मो रजः सोस्त्यस्या इति स्त्रीधर्मिणी पुष्पवती । तथाचामरोऽपि "स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपी"–ति ॥ तथा चतुर्थदिने स्नानमुक्त्वा सएव "सुस्नाता भर्तृवदनमीक्षेन्नान्यस्य कस्यचि–"दित्याह । अन्ये त्वाहुः सुवासाः शोभनवस्त्रा । वास इत्युपलक्षणं भूषादेरपि । तथाच कृतप्रसाधनेति तदर्थः । ऋतुष्वित्युक्त्वैव षोडशरात्रिलाभे कालेष्वित्युक्तया च विहितकालेषु । "तासामाद्याश्चतस्रस्तु निन्दितैकादशी च ये–" त्यादिना मनुना निषिद्धतत्कालभिन्नेष्वित्यर्थः इति ॥

६. सायणस्तु–यद्यप्यहि गृहकृत्यवेलायां मलिनवासास्तथापि संभोगकालेषु कल्याण-

ऋतुकालास्तेषु । तत्रापि न सर्वदा किंतु यदा सुवासास्तदर्थमाह—

सुवासाः कल्याणवासाः ॥ ९ ॥

बहुव्रीहिणा निर्णिक्तवसना नीरजस्का "भवति तदे"ति शेषः । तथाभूता च

ऋतुकालेषु संभोगार्थं प्रेम्णोपतिष्ठते स्वात्मानं विवृणुते । एवं वागप्यर्थज्ञायेति-दृष्टान्तं सम्यगभिधाय प्रकृतमुपसंहरति—

यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा ॥ ११ ॥

तथा, एवेति शेषः । यथा स पुरुषस्तामेनां स्त्रियं यथावैत्पश्यति नेतरामेवं स (अर्थज्ञ) एवैतां वाचं यथावच्छृणोति नेतरः । इति एवमस्यामृचीयमर्थज्ञप्रशंसोक्ता ॥

तस्योत्तरा भूयसे निर्वचनाय ॥ १२ ॥ ३ (खं०) ॥

तस्यैव प्रकृतस्यार्थस्य ज्ञानप्रशंसाख्यस्योत्तरा पूर्वोक्ता उतत्व इत्यस्या ऋचः परभूताऽनुपदमुपक्रमिष्यमाणोतत्वमित्यादिका (फलाभिधानद्वारा) भूयसे बहुतराय निर्विविच्य अमुना फलेनाभिसंबन्धात्प्रतिविशिष्टं ज्ञानमित्येवं निर्धार्य-वचनं निर्वचनं तस्मै निर्वचनाय भवति । तादर्थ्ये चतुर्थी ॥ (पा० २-३-१३ वा०)

तद्यथा—

उँतत्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ॥
अधेन्वा चरति मायया एष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥ १ ॥
(ऋ. सं. ८-२-२३-५)

---

१. अर्धार्द्धेन प्रस्तुतम् ॥

२. साकल्येनादरयुक्तः । पश्यति । किं च तयोक्तमर्थं हितबुध्या शृणोति । तथायं चतुर्दशविद्यास्थानपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक्पश्यति वेदोक्तञ्च धर्मब्रह्मरूपमर्थं हितबुद्धया स्वीकरोति सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति सायणः ॥

३. याज्ञनल्पावृतसर्वगात्रा भवतीति दुर्गः ॥

४. यः पदशोऽवच्छिद्यैतां विगृह्यार्थमस्याः पश्यति समन्ततः । इति दुर्गः ॥

५. प्रक्रान्तार्थको ह्यत्र तच्छब्दोऽतएव च न यच्छब्दापेक्षापि । "प्रक्रान्तप्रसिद्धानुभूतार्थकस्तच्छब्दो यच्छब्दोपादानं नापेक्षत-"इति मम्मटोक्तेः । सावधारणोक्तिस्तु वाक्यधर्मत्वादब्भक्षवदित्युक्तमसकृदधस्तात् ॥

६. तस्मै इदं तदर्थं तस्य भावस्तादर्थ्यं तत्संबन्ध उपकार्योपकारकभावरूपस्तस्मिन् । कृत्तद्धितसमासैः संबन्धाभिधानं भावप्रत्ययेनेति नियमो व्याकृतिविदाम् ॥

७. सायणस्त्विमं मन्त्रमित्थं व्याख्यत् । अपिचैकं चतुर्दशविद्यास्थान-कुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण वेदोक्तार्थामृतपानयुक्तमाहुः । अभिज्ञाः कथयन्ति, "सखिविदं सखायमि (ऋ. सं. ८-२-२४) ति" मन्त्रे वेदस्य सखित्वमुदाहृतम् । यद्वा स्वर्गलोके वेदानां सख्ये स्थित्वाऽतिशयेन पीतामृतमाहुः । वाचामिना ईश्वराः । संभासु प्रगल्भा वा वाजिनास्तेषु तेषां मध्येऽप्येनं वेदार्थकुशलं चोदयितुं न हिन्वन्ति । न केऽपि प्राप्नुवन्ति । तेन सह विवदितुमसमर्थत्वात् । यस्त्वन्यः पाठमात्रपरः पुष्पफलरहितां वाचं शुश्रुवान्भवति । पूर्वकाण्डोक्तस्य धर्म्मस्य ज्ञानं पुष्पम् । उत्तरकाण्डोक्तस्य ब्रह्मणो ज्ञानं फलम् । यथा लोके पुष्पं फलस्योत्पादकं, तथा वेदानुवचना-दिधर्म्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति । "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति

अत्राप्युत-ल-शब्दावप्ये-वाऽर्थौ ॥ तदाह—

अप्येकं वाक्सख्ये स्थिरपीतमाहुः ॥ २ ॥

विदुषां संसदि या सत्कथा भवति सा सखिकर्मत्वात्सख्यमित्युच्यते । साच वाचा क्रियतेऽतो वाक्संबन्धाद्वाक्सख्ये स्थिरपीतं पीतं मधु यस्य हृदये स्थिरं भवति स स्थिरपीतः । बहुव्रीहौ सुखादित्वात्स्थिरशब्दस्य, निष्ठान्तस्य पीतशब्दस्य परप्रयोगस्तथाच वार्तिकम् । "जातिकालसुखादिभ्यः परा निष्ठा वाच्ये"ति (पा० २–३–३६ वा०) यद्वा स्थिरप्राप्तिमाहुर्ऋषयः ॥ प्रकारान्तरेणैतदर्थमाह—

रममाणं विपीतार्थं देवसख्ये रमणीये स्थान इति वा ॥ ३ ॥

अत्र सख्ये इत्यस्यार्थमाह देवसख्य इति । समानख्यानतायां देवसायुज्य इति तदर्थः । वक्ष्यति हि "यां यां देवतां निराह, तस्यास्तस्यास्ताद्भाव्यमनुभवति" (प० का० १३–१३) इति ॥ अथवा देवसख्ये देवानां सख्यं यत्र तस्मिन्रमणीये स्थाने देवलोके इत्यर्थः । स्थिरपीतमित्यस्यार्थमाह रममाणं विपीतार्थमिति । स्थिरमविचालिनमप्रच्यवमानधर्माणं तत्रैव रममाणमिति यावत् । विपीतार्थमापीतार्थं गृहीतार्थमिति यावत् । लोकेऽपिहि ज्ञातार्थं पुरुषं पीतार्थमिति वदन्ति ॥

एकं कमित्यपेक्षायां द्वितीयपादार्थमाह—

विज्ञातार्थं यन्नाप्नुवान्ति वाग्ज्ञेयेषु बलवत्स्वपि ॥ ४ ॥

यमेनं स्थिरपीतं विज्ञातार्थं पुरुषं वाजिनेषु वाक् इनाँ ईश्वरा येषांते वाजिना अर्थास्तेषु वाच आयत्ताः खल्वर्था इत्याह वाग्ज्ञेयेषु अर्थेषु बलवत्सु

यज्ञेन दानेन तपसाऽनाशकेने"ति श्रुतेः । यथाच फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः । "यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवतीति"श्रुतेः । तादृशपुष्पफलरहितवेदपाठकः स एष पुमानधेन्वा मायया सह चरति । नवप्रसूतिका क्षीरस्य दोग्ध्री गौः प्रीतिहेतुत्वाद्धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते । पाठमात्रपरं प्रति वेदरूपा वाक् धर्म–ब्रह्म–ज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः । अतएवासौ मायाकपटरूपा ऐन्द्रजालिकनिर्मितगोसदृशगोरूपत्वात् । तया मायया सह चरन्नयं परमपुरुषार्थं न लभत इति ॥ १ ॥

१. तदेतदुपदर्शयन्प्रथमपादार्थमाहेत्यर्थः ॥

२. ईश्वरा ईशयित्री प्रभुरिति यावत् । तथाचामरः "इनः सूर्ये प्रभौ"इत्यादिः ॥ ईश ऐश्वर्ये (अ. आ.) वरच्टाप् ।

३. दुरवघटनीयेषु समुद्रपिहितरत्नसन्निभेषु देवतापरिज्ञानादिषु व्याकर्तव्येषु । सएवहि तान् व्याकर्तुं शक्नोति नेतरे मन्दमतयो बहवोऽपि समागताः शक्नुवन्ति तानर्थान्व्याकर्तुं यानसौ व्याकरोति इति दुर्गः ॥ यद्वा वाजिनेषु सारभूतेषु निरूपणीयेष्वर्थेषु एनं न हिन्वन्ति न बहिष्कुर्वन्ति एनं पुरस्कृत्यैव सर्वे वेदार्थं विचारयन्तीत्यर्थः । वाजिनो बुध्नानदेवतास्तदुद्देश्यकत्वाद्वाजिनानि । श्रृतोष्णे क्षीरे दधियोगे घनीभूतांशादन्यानि द्रवीभूतानि दुग्धदध्युभयसारभूतानि जलानि । घनीभूतांशस्त्वामिक्षा । तथाच श्रुतिः "तप्ते पयसि

नापि हिन्वन्ति । अपिशब्दोऽन्वर्थे । केचिदपि नानुगन्तुं शक्नुवन्ति । प्रीणनार्थोऽपि हिवि–(भ्वा० प०)रिहानेकार्थत्वादुक्तार्थकः । एवंतावदर्थज्ञः प्रशस्तः । अथेदानीं केवलपाठकोऽनर्थज्ञः (अविद्वान्) उत्तरेणार्धेनैन निन्द्यते । तदर्थमाह—

अधेन्वा होष चरति मायया वाकृप्रतिरूपया ॥ ५ ॥

एषोऽविज्ञातार्थः । अधेन्वा धेनुत्ववर्जितया कामानामदोग्ध्र्या वाक्प्रतिरूपया मायया हि निश्चयेन चरति ॥ कुतः? । यतः—

नास्मै कामान्दुग्धे वाग्दोह्यान् देवमनुष्यस्थानेषु ॥ ६ ॥

वाक्–कर्त्री । देवाश्च मनुष्याश्च देवमनुष्यास्तेषां स्थानानि तेषु देवतास्थानेषु मनुष्यस्थानेषु च दोह्यान्दोग्धव्यान् कामानभिलषणीयान् अस्मै अविज्ञातार्थाय न दुग्धे न प्रपूरयति ॥ क एवंविधः—

यो वाचं श्रुतवान्भवत्यफलामपुष्पामिति ॥ ७ ॥

इति– एवं पाठमात्रेण यः अफलामपुष्पां वाचं शुश्रुवान्[3] श्रुतवान् भवति । एभ्यः सकशात् श्रुत्वाचदृढग्राहेण गृहीत्वाऽवस्थितो भवति 'अध्ययनादते नान्यदस्ति किंचिद्वाचि मृग्यमिति' ॥ तस्मै किमित्यपेक्षायामाह—

अफलास्मा अपुष्पा वाग्भवतीति वा ॥ ८ ॥

यथैव ह्यसौ पश्यति अफलेयमपुष्पा चेति तथैवास्मै अफलैव अपुष्पैव च वाग्भवतीति भावः ॥ वाशब्दोत्र एवकारार्थे प्रयुक्तः ॥

किंचित्पुष्पफलेति वा ॥ ९ ॥

दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिन"मिति । अमरोऽपि "आमिक्षा सा घृतोष्णे या क्षीरे स्याद्दधियोगत"इति ॥ वैश्वदेवी विश्वेदेवदेवताकत्वात् ॥

१. तृतीयपादार्थमाहेत्यर्थः ॥

२. वाक्तुल्यया यतो हि नेयं वास्तविकी वाक् । या हि कामदोग्ध्री सैव सा । प्रतिरूपशब्दः सदृशवचनोऽस्ति यथोपसर्गविभक्तिस्वरप्रतिरूपकाश्चेति । मायेति । यथा वन्ध्या पीना गौः किं द्रोणमात्रमियं क्षीरं दोग्धीति? मायां भ्रान्तिमुत्पादयन्ती चरति, यथावा वन्ध्यो वृक्षोऽकाले पल्लवादियुक्तःसन्पुष्प्यति फलतीति भ्रान्तिमुत्पादयंस्तिष्ठति तथाऽर्थवर्जितां कर्मादिविषयज्ञानवर्जितां वा वाचं श्रुतवान्केवलं पाठमात्रं प्रब्रुवाणश्चरतीत्यर्थ इति समुदितार्थः ॥

३. शृणोतेश्छान्दसो लिटः कसुस्तदर्थमाह श्रुतवानिति । शुश्रुवानिति निगमोक्तानुवादः ॥

४. पाठमात्रेणाफलामपुष्पां वाचं श्रुतवन्न आत्मवदनात्मविन्नः ॥

---

1. एतच्च परिज्ञानापेक्षयोच्यते । सत्यपि वाचकतयाऽर्थे, विषयतया च ज्ञाने, स्वविषयकज्ञानवत्तया समवायेन चापरिज्ञातरि पाठमात्रेणाधीयाने फलाभावाच्चास्त्येवेति सती अपि अर्थज्ञाने नस्त एवेतिभावः । स्वम् अर्थः ॥

वा अथवा । अयमर्थः । नञर्थोऽप्यस्ति । अनुदरा कन्येति यथा । तथाच अफलामपुष्पामित्यस्याल्पफलामल्पपुष्पामित्यर्थोऽपि भवितुमर्हति । नहि सर्वथाऽध्ययनमनर्थकं भवितुमर्हति अध्यापनविधिना शिष्टत्वाद्ध्ययनविधेश्चेति भाष्यकाराभिप्रायः ॥

किं पुनर्वाचः पुष्पफल? मुच्यते—

अर्थो वाचः पुष्पफलमाह ॥ १० ॥

एतस्मिन्मन्त्रे मन्त्रदृक् ॥

कःपुनरसावर्थ? इति (याज्ञदैवतमध्यात्ममित्येष वाचः समासतोऽर्थः । स एष रूपकल्पनया) पुष्पफलविभागेन द्विधा प्रविभज्यते—

याज्ञदैवते पुष्पफले देवताध्यात्मे वा ॥ ११ ॥ ४ खं० ॥

यज्ञे भवं ज्ञानं याज्ञं देवतासु भवं दैवतम् । आत्मन्यधि यद्वर्त्तते तदध्यात्मम् ॥

---

१. तथाचोक्तम् (वै० सू० का०) तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥ १ ॥ इति ॥

२. अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यध्यापनविधिनाऽध्ययनस्यापि शिष्टत्वादुपदिष्टत्वाद्वेदबोधितत्वादिति यावत् । नहि विधिबोधितं किंचिदफलं भवति ॥

३. तथाच ब्राह्मणं "स्वाध्यायोऽध्येतव्यः, स्वाध्यायमधीयीते"तिच ॥ सु—समीचीनं यथावदामर्यादयापरिपाट्याऽध्यायोऽध्ययनं यस्य स वेदः साङ्गः सफलोऽध्येतव्य इति तदक्षरार्थः ॥

४. भाष्यकारस्यास्य यास्कमुनेरभिप्राय आशयः । "छन्दोऽभिप्राय आशय"इत्यमरः ॥

५. पुष्पं च फलं चेति द्वन्द्वे "जातिरप्राणिना"—(पा. २—४—६) मित्येकवद्भावः ॥

६. क एवमाहेत्यपेक्षायामिदमुक्तम् ॥

७. एतच्चार्थमपेक्ष्योक्तं विग्रहस्तु नित्यसमासत्वादात्मनि—इतीत्येव । अविग्रहो नित्यसमासः अस्वपदविग्रहो वेति नियमात् । अस्वपदविग्रह इति स्वभिन्नेन (शब्दतः) स्वसदृशेन (अर्थतः) पदेन विग्रहो वृत्यर्थावबोधकं वाक्यं यत्रेत्यर्थः नञ्समासादयमर्थो लभ्यते ॥

1. विधिना वेदवाक्येन । बोधितं विहितम् । किंचिद्दुष्फलं किंचिदल्पफलमिति त्वन्यत्सर्वथा फलरहितं तु न किमपि । तथाच शश्वच्छ्रूयते "प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयती"त्येवम् ॥

2. अङ्गैः षड्भिः शिक्षादिभिः । फलेनाध्यात्म—(ब्रह्म) ज्ञानेन च सहितस्तावत्पर्यन्तं यावदात्मज्ञानं न संबध्यत इति भावः ॥

3. आकृतिग्रहणा हि वैयाकरणनये जातिः । आकृत्यावयवसंस्थानेन ग्रहणं ज्ञानं यस्या इति तदर्थः । तथाचोक्तम् आकृतिग्रहणा जाति ("पा. ४—१—६३ वा.) रित्यादि ॥

4. अस्व इति नञ्समसे नञ्योगा"न्नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति"

यज्ञपरिज्ञानं देवतापरिज्ञानमात्मपरिज्ञानं च । एतदेव मन्त्रब्राह्मणात्मकसमस्तवेदप्रतिपाद्यम् । तत्र यद्यभ्युदयलक्षणो धर्मोऽभिप्रेयते तदा दैवतार्थत्वाद्याज्ञं पुष्पं दैवतं फलम् । फलार्थं हि पुष्पं भवति पूर्वम् । यदि पुनर्निःश्रेयसलक्षणो धर्मोऽभिप्रेयते तदोभे याज्ञदैवते पुष्पत्वमेव बिभृतः । दैवते हि तदर्थत्वाद्याज्ञमन्तर्भूतमेवेति दैवतं पुष्पमध्यात्मं फलम् । अत्रेदमवधेयम् ॥ यथा पुष्पं निजं पुष्पभावमुच्छिद्य सरूपविरूपपरिणामाभ्यां फलभावाय प्रभवति, तथा निष्कामकृते आद्ये आत्मज्ञानं संपाद्य निःश्रेयसफलाय भवत इति ॥ ४ ॥

एवं तावच्छास्त्रारम्भमुपसमाधायास्याङ्गान्तरात्प्राधान्यमुच्यते—

साक्षात्कृतधर्माण ऋषयो बभूवुः ॥ १ ॥

यैः प्रतिविशिष्टेन तपसा साक्षात्कृतः प्रत्यक्षतो दृष्टो धर्मस्ते साक्षात्कृतधर्माणः । "धर्मादनिच् केवलादि" (पा० ५-४-१२४) ति समासान्तोऽनिच्प्रत्ययः । ऋषयः ऋषन्त्यवगच्छन्त्यमुष्मात्कर्मण एवमर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैवंलक्षणं फलं (विपरिणामो) भवतीत्यृषयो मन्त्रद्रष्टारो मन्त्रकाले बभूवुः । वक्ष्यति च "ऋषिर्दर्शनात्" (नै. २-३-२) इति ॥ तदेतत्कर्मणः फलविपरिणामदर्शनं धर्म उपचर्यते । नहि धर्मस्य दर्शनमस्त्यत्यन्तापूर्वो हि धर्मोऽतएवादृष्टमिति तस्य नामधेयं भवति ॥

तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्रादुः ॥ २ ॥

ते—ये साक्षात्कृतधर्माणः । अवरेभ्योऽवरकालिकेभ्यः विज्ञानशक्तिहीनेभ्योऽसाक्षात्कृतधर्मभ्यः शाखाप्रवक्तृभ्यः श्रुतर्षिभ्य[3] उपदेशेन शिष्योपाधिकया वृत्त्या

---

१. निश्चितं श्रेयो निःश्रेयसम् "अचतुरे—" (पा. ५-४-७७) त्यादिनाच्समासान्तः । मोक्षः "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् । मोक्षोऽपवर्गः" इत्यमरः ॥

२. आरोप्यते । उपचार आरोपः ॥

३. तेषां हि ततः पश्चादृषित्वमुपजायते, न यथा पूर्वेषां साक्षात्कृतधर्मणां श्रवणमन्तरेणैवेति ते श्रुतर्षय उच्यन्ते। एतेनेदं भाष्यवचनं प्राचीनमेव यास्केनेहानूक्तमिति प्रतिभाति॥

परिभाषणात् । नन्युक्तमिव युक्तं च यद्दृश्यते तत्र तद्भिन्ने तत्सदृशेऽधिकरणे द्रव्ये (वस्तुनि) कार्यं विज्ञायते । हि यतस्तथैवार्थस्य गतिर्ज्ञानं भवति नेतरथा । अतएव च वैयाकरणैः सादृश्यलक्षणं भेदघटितं नोरीक्रियते "तद्भिन्नत्वेसति तद्वतभूयोधर्मवत्त्व" मित्येवम्, किं तु तद्वतभूयोधर्मवत्त्वमित्येव । तेन स्वस्मिन्नपि स्वसादृश्यमक्षतमिति समानः पतिर्यस्याःसा सपत्नीति सिध्यति । नहि द्वयोरेकः पतिःसमानो भवति तन्मतेन (नैयायिकमतेन) कष्टकल्पनयौपचारिकभेदमादाय तत्त्वोपगमे तूक्तमेव वरम् ॥

1. नहि स्वयमेवदुरूहं शब्दं प्रयुज्य तद्व्याख्यानाय च यतितुं प्रवर्त्तते कश्चित् । स्वपदवर्णनमेव भाष्यलक्षणम् । यथाहुः "सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ १ ॥" इति । निरुक्तस्य च निघण्टुभाष्यत्वं सर्वसंमतमिति स्वपदव्याख्यानमपीह न दोषायेत्यपि वक्तुं न युज्यते । यदत्र

मन्त्रान् शब्दतोऽर्थतश्च संप्राहुः सम्यक् प्रदत्तवन्तस्तेऽपि चोपदेशेनैव जगृहुरित्यर्थः ॥

अथ तेऽपि—

उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च ॥ ३ ॥

अवरे । निघण्टु–ब्राह्मण–वेदाङ्ग–कारा उपदेशाय उपदेशार्थं ग्लायन्तः कथमिमेऽल्पायुषोऽल्पग्रहणशक्तिकाश्चैतावन्तं शब्दतोऽर्थतश्च समुपदिश्यमानमर्थजातं ग्रहीतुं शक्नुयुरिति खिद्यमानास्तेष्वनुकम्पया बिल्मग्रहणाय भेदज्ञानार्थम् इमं ग्रन्थं गवादिदेवपत्न्यन्तं निघण्टुपरनामकम् समाम्नासिषुः समाम्नातवन्तः ॥ इममेव न, किंतु वेदं ब्राह्मणं च वेदाङ्गानि चेतराणि ॥

बिल्मपदं भाष्यवाक्यप्रसक्तं स्वयं निर्वक्ति—

बिल्मं भिल्मं भासनमिति वा ॥ ४ ॥

यदेतद्बिल्ममित्युक्तमेतद्भिल्मं वेदानां भेदनम् । भेदोऽत्र व्यासः । शाखाप्रशा-

---

१. अत्र पञ्चेति पदप्रयोगो भ्रान्तिमूलक एव केषाञ्चिद्व्याख्यातृणामित्यवगन्तव्यम् ॥ अतः पूर्वमपि निरुक्तान्तरसद्भावस्याननै–(यास्केनै–)व नैरुक्तसमयश्चेत्येव (नि. १–४–१) मुक्त्या बोधनात् ॥ इममित्युक्त्या च निघण्टोरेव ग्रहणमिष्टम् । ननु निरुक्तस्यास्य । प्रणीयमाने हि निरुक्ते "समाम्नासिषु" रिति परोक्षातीतप्रयोगानुपपत्तेः । अपरंच निरुक्तमासीत् शाकपूण्यादिप्रोक्तं तदभिलक्ष्यैव तथा क्रियाप्रयुक्तेत्यपीह वक्तुं न युज्यते । अनुपदमेव "एतावन्तः समानकर्माणो धातव इत्यादुक्त्या निघण्टुपरिचयस्यैवोपलब्धेः ॥

२. व्यसनं व्यासः । विपूर्वादसुक्षेपण इत्यस्माद्घञ् । यत्समाख्यया बादरायणः पाराशर्योऽपि व्यासः वेदव्यास इति चोच्यते । तत्र व्यस्यतीति व्यासः । ज्वलादित्वादाधे णो द्वितीये तु कर्मण्यण् । (पा० ३–२–१) अयमर्थः । वेदं तावदेकमतिमहत्त्वाद्दुरध्येयं सन्तं तेषामल्पायुषामल्पग्रहणशक्तिकानां सुखग्रहणाय व्यासेनानेकशाखाभेदेन समाम्नातवन्तः । तद्यथा–एकविंशतिधा बाह्वृच्यम् । एकशतधाऽऽध्वर्यवम् । सहस्रधा सामवेदम् । नवधाऽऽथर्वणम् एवं वेदाङ्गान्यपि । तद्यथा व्याकरणमष्टधा निरुक्तं चतुर्दशधेत्येवमादि ॥

बिल्मशब्दस्य भिल्ममिति प्रतिशब्दमुक्त्वापि अर्थान्तरं वदति भासनमिति वेति । संशयमपि ध्वनयति । अतश्च ज्ञायते नेदं स्वपदवर्णनमिति । नहि स्वपदव्याख्याने स्वज्ञानवैकल्पिकत्वप्रकटनमुपयुज्यते क्वचिदपीति । पुराकल्पश्रुतवचनमिदंयास्केनानूक्तमिति निरुक्तालोचनकारा आहुः । एतत्तत्त्वमस्या भूमिकायां द्रष्टव्यम् ॥

1. बह्व्य ऋचोऽधीयते इति बह्वृचाः । "ऋक्पूरब्धूः पथामानक्षे" (पा०५–४–७४) "अनृचबह्वृचावध्येतर्यवे"ति निपातः । बह्वृचानामाम्नायो बाह्वृच्यम् । "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्" (पा० ४–३–१२९) इति ञ्य आदिवृद्धिः । एवमध्वर्यूणामयमाम्नाय आध्वर्यवम् । शैषिकोऽण् ॥

2. तथाचाहुः । "इन्द्रश्चन्द्रः काशकृत्स्नाऽऽपिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिका" इति ॥

स्नादिना नानाकरणम् । वा–अथवा भासनं प्रकाशनमित्येव बिल्मशब्देनोच्यते । वेदाङ्गविज्ञानेन हि वेदार्थः प्रकाशते । एवं भिदेर्भासतेर्वा मप्रत्यये पृषोदरादित्वाद्वर्ण-व्यत्ययेन बिल्मशब्दः साधितः । एवमग्रेऽपि यथायथं द्रष्टव्यम् ॥

एवमिदं साक्षात्कृतधर्मभ्य ऋषिभ्य उपदेशपरम्परया सनिघण्टुकं निरुक्तशास्त्र-मागतमितराणि चाङ्गानीति परिशोधित आगमपन्थाः ॥

अथेदानीं निघण्टुसमाम्नाय निर्वचनाय तदीयविरचनाप्रकारः प्रदर्शनीयः प्रकरण-त्रयविभागेन सुखव्याख्यानार्थमस्य शास्त्रस्य । सोऽयमुच्यते–तत्र तावन्नाम्नो धातुमूल त्वादादौ[1] धातुप्रविभागप्रकारं दर्शयति—

एतावन्तःसमानकर्माणोधातवः ॥ ५ ॥

एतावत्पदेनात्र या चैषु धातुषु व्याख्यातव्येषु प्रतिनियता संख्यास्ति साभिप्रेयते । तद्यथा कान्तिकर्माण उत्तरे धातवोऽष्टादश । गतिकर्माण उत्तरे धातवो द्वाविंशं शतम् (नैघ० ३–२–३) इत्येवमादि ॥

धातुर्दधातेः ॥ ६ ॥

डुधाञ् धारणपोषणयोः (जु० उ०) इत्यस्मात्तुनि धातुशब्दो निष्पद्यते ॥

एतावन्त्यस्य सत्वस्य नामधेयानि ॥ ७ ॥

अत्राप्येतावत्पदेन या नामसु प्रतिनियता संख्यास्ति साभिप्रेयते । तद्यथा इमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि (नैघ०–२–२–३) हिरण्यनामान्यु-त्तराणि पञ्चदश (नैघ० ३–३–१) इत्येवमादि । यत्रैतावर्थौ प्रायेण चिन्त्येते प्रसङ्गतोऽन्यद्यत्किंचित् एवंलक्षणं नैघण्टुकं नाम प्रकरणम् । गवादि–प्राक्जहा–(नैग० ४–१–१) शब्दात् ॥

अथ पुनर्यत्र—

एतावतामर्थानामिदमभिधानम् ॥ ८ ॥

इत्यर्थः प्रायेण चिन्त्यते । तद्यथा आदित्योऽप्यकूपारः । समुद्रोऽप्यकूपारः । कच्छपोप्यकूपारः (नैग. ४–३–२) इत्येवमादि । अनवगतसंस्काराश्च[2] निगमाः[3] (निगमशब्दा.) जहादयः प्रायेण चिन्त्यन्ते प्रसङ्गतोऽन्यद्यत्किंचित् एवंलक्षणमैकपदिकं[4] नाम प्रकरणं जहादि–प्राक् अग्नि (दै० का० ७–३–६) शब्दात् ॥

---

१. नामप्रविभागात्पूर्वम् ॥

२. एतत्सर्वमर्थवशादध्याहृतं वेदितव्यम् यद्यपि निघण्टुसामान्यलक्षणोपलक्षितः प्रकरण-त्रयविभागेनावस्थितो गवादिर्देवपक्ष्यन्तः सर्वोऽप्ययं पञ्चाध्यायीशास्त्रसंग्रहः । तथापि तदेकदेशेऽत्र (प्रकरणे) नैघण्टुकमित्येतया निरूढसंज्ञया व्यवहारः शास्त्रकृतो वेदितव्यः । एवमुत्तरत्रापि यथायथमूह्यम् ॥

३. एतच्चानुक्रमप्यत्र, वक्ष्यमाणतत्काण्डारम्भप्रतिज्ञावाक्यादत्रानुसंहितमिति बोध्यम् ॥

४. अतएवास्य नैगममिति संज्ञात्रैव खण्डसूत्रान्तेप्रतिज्ञास्यते ॥

५. व्यक्तीभविष्यतिचैतत् (नै० ग० का० १–४–१) एकं पदमनेकेचार्था इत्ये-तत्सङ्कल्य कृत्स्नत्वादिदमैकपदिकमित्युच्यते ॥

---

1. यत्रैतावर्थौ चिन्त्येते इत्यादि प्रकरणान्तम् ।

अथ पुनर्यत्र—

नैघण्टुकमिदं देवतानाम, प्राधान्येनेदमिति ॥ ९ ॥

इदमभिधानमनुपदमुदाहरिष्यमाणमश्वादि—नैघण्टुकं—देवतानाम, (अप्राधान्येन) इदमन्यैघण्टुकवदन्यादिच, प्राधान्येनात्र मन्त्रे वर्तत इत्ययं विभागः प्रायेण चिन्त्यते ॥ तत्र किमित्यपेक्षायामुत्तरं वक्ष्यति तद्यानि नामान्नीत्यादि (१–६–६ खं०) अनुपदमत्रैव । संप्रति पञ्चाध्यायीशास्त्रसंग्रहे प्रवृत्तं निघण्टुपदं तद्धितवृत्त्या तदेकदेशे गवादि–जहाशब्दान्ते प्रकरणे प्रवृत्तं कथं पुनरस्मिन्(प्राधान्येन देवताभिधानेऽ)श्वादिशब्देऽनुपदमुदाहरिष्यमाणे प्रवृत्तमिति किमिदमुक्तं भवतीत्याह—

तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत् ॥ १० ॥ ५ खं० ॥

यदिदमुक्तं नैघण्टुकमिदं देवतानाम प्राधान्येनेदमिति । यत्र न ज्ञायते किमिदमुक्तं भवतीति तदेतल्लक्षणत उपदिश्यत इति पर्युपयुक्तस्तच्छब्दः । यत् अभिधानमन्यदैवते अन्यदैवतम् (अन्याप्रधानदेवता) यस्मिन्सोयमन्यदैवतस्तस्मिन् मन्त्रे मन्त्रवाक्ये निपतत्यर्थे निगमयत्यन्यस्यां प्रधानायां मन्त्रदेवतायां, स्वयं चाभिप्रयुज्यमानमङ्गभावं गच्छति तद्गुणभूतं नैघण्टुकम् । संज्ञा हि तस्येयमस्मिञ्छास्त्रे ॥

तद्यथा—

अश्वंन त्वा वारवन्तम् ॥ १ ॥ (ऋ. सं. १–२–२२–१)

अस्यामृचि अश्वो नैघण्टुकः । अग्निः प्रधानम् । इति तदैवत्यं शुनःशेपस्यार्षे गायत्री । वारवन्तीयानुशंसने विनियुक्तौ ॥ अस्य "वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणामिति" शेषः ॥

अत्र नेतीवार्थे । वारशब्दः कपिलादिरतो लत्वविकल्प इत्याह—

अश्वमिव त्वा बालतन्वम् ॥ २ ॥

अयमर्थः । हे अग्ने, अध्वराणां यज्ञानां सम्राजन्तं सम्राट् स्वरूपम् । संपूर्वाद्राजतेः शतरि रूपम् । (स्वामिनम्) अग्निं (हूयमानहविषः) देवानामग्रे नेतारं त्वां नमोभिः

---

१. अनुपदं तत्रैवोदाहरिष्यमाणम् ॥

२. यत्पूर्वमुपक्रान्तं अथ पुनर्यत्र नैघण्टुकमिदमित्यादि–प्रायेण चिन्त्यते इत्यन्तम् ॥

३. सहि अग्निमिति द्वितीयया विभक्तिश्रुत्या साक्षाद्विनियोजको देवतारूपस्य । अश्वस्तु शब्दसामर्थ्यरूपलिङ्गेन श्रुतिकल्पनाद्वारा देवतात्वेन विनियुक्तः सम्राजङ्गभावं भजिष्यतीति, श्रुतितो लिङ्गदौर्बल्यस्य "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि–"ति–जैमिनिना (जै० सू० ३–३–१४)ऽनुशिष्टत्वादिहाग्नेः प्राधान्यतो देवतात्वमेवमुत्तरत्रापि बोध्यम् ॥

४. साम्नश्च वारवन्तीयस्यैषा योनिरिति भगवद्दुर्गः ॥

५. यद्वा दीप्यमानम् । राजृ दीप्तौ (भ्वा० उ०) शता ॥ अध्वराणां मध्ये उत्तरवेद्यादिषु विण्ण्वेष्ववस्थितम् ॥ इति शेषः ॥

स्तुतिभिर्वन्दध्यै (अभिप्रेतार्थसंसिद्धये) वन्दितुं प्रवृत्ता वयमिति शेषः । यदि अभिवादनस्तुत्योः (भ्वा० आ०) "इदितो नुमि"ति (पा० ७–१–५८) नुम् । "तुमर्थे सेसेनि"-(पा० ३–४–९) ति तुमुनोऽर्थे अध्यैप्रत्ययः । अत्र दृष्टान्तोऽयम् । वारवन्तं वालवन्तम् (वृषाश्वं सहि अतितरां वालवान्भवति वन्द्यते परिचर्य्यते च) अश्वं न अश्वमिव । अश्वो यथा वालैर्वाधकान्मशकमक्षिकादीन्परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीति ॥ २ ॥

वालशब्दं निगमप्रसक्तं निर्ब्रवीति—

वाला दंशनिवारणार्था भवन्ति ॥ ३ ॥

तैर्हि दंशादयो निवार्यन्ते । अथ प्रसक्तानुप्रसक्तं दंशशब्दं निर्वक्ति—

दंशो दंशतेः ॥ ४ ॥

दंश दर्शने (भ्वा० प०) पचाद्यच् । दंशतीति दंशः । वनमक्षिका सह्यतितरां दशति ॥

द्वितीयमुदाहरणम्—

मृगो न भीमः कुचरो गिरिष्ठाः ॥ ५ ॥ (ऋ. सं. ८–८–३८–२)

इयमृग्गयनाम्नेन्द्रपुत्रेण दृष्टा त्रिष्टुप् । वैमृधस्य हविषो याज्या (आ० सू० २–१०) अस्यां मृगो नैघण्टुक इन्द्रः प्रधानमिति तद्दैवत्या । अत्रापि नेतीवार्थे तदाह—

मृग इव भीमः कुचरो गिरिष्ठाः ॥ ६ ॥

अस्य "परावत आजगन्था परस्याः । सृकं संशाय पविमिन्द्रतिग्मं विशत्रूं ताहि्ळ विमृधो नुदस्वे"तिशेषः ॥ अयमर्थः । हे इन्द्र ! त्वं कुचरः कुत्सितचरणः (कुत्सितगमनः हिंसत्वात्[1]) गिरिष्ठाः पर्वताश्रयः (पर्वतनिवासी) मृगोर्न सिंहइव व्याघ्रइव वा भीमः भयङ्करोऽसि । स त्वं परस्याः दिवः संबन्धिनः परावतः परस्मात्स्थानाद्द्युलोकादाजगन्थ आगच्छ । आङ्पूर्वाद्गमेश्छान्दसे लिटि क्रादिनियमप्राप्तस्येट "उपदेशेऽत्वतः" (पा० ७–२–६२) इति प्रतिषेधः । (आगत्य च) सृकं सरणशीलं शत्रुवधकार्येषु सर्त्तुं शक्तं वा तिग्मं तीक्ष्णं पविं वज्रं संशाय सम्यक् तनूकृत्य (तीक्ष्णीकृत्य तेन) शत्रूनस्मदीयान्वैरिणो वितार्हि्ळ विशेषेण ताडय विनाशय 'तड आघाते' (चु० प०) ण्यन्तादस्माल्लोटि रूपमेतत् । "छन्दसि परेऽपि"

---

१. पृषोदरादित्वादत्रानुनासिकलोपः ॥

२. अत्र "दंशसञ्जस्वञ्जां शपी"(पा० ६–४–२५)ति नलोपः । मूलेतु धातुनिर्देशे दितप् । "इकूश्लिपौ धातुनिर्देश" (पा० ३–३–१०८ वा०) इति । नात्र शप्परत्वमिति नलोपो न ॥

३. प्राणिवधजीवनत्वात् ।

४. मृगशब्दश्चतुष्पाज्जातिमात्रे मृगशीर्षे मार्गणावां च वर्त्तते न केवलं हरिणएव । तथाचामरः "पशवोऽपि मृगा वेगः प्रवाहजवयोरपी"ति । अत्रापि शब्दादुक्तमर्थद्वयं ग्राह्यम् ॥

(पा० १–४–८१) उपसर्गाः प्रयुज्यन्ते । तथा मृधो हिंसकान्संग्रामोत्सुकान्युयुत्सून्वाऽन्यानपि विबुदस्य विशेषेण तिरस्कुर्वंति ॥ ६ ॥

मृगशब्दं निगमप्रसक्तं निर्वक्ति—

मृगो मार्ष्टेर्गतिकर्मणः ॥ ७ ॥

धातूनामनेकार्थत्वाच्छुद्ध्यर्थे पठितोऽपि मृजधातुः (अ० प०) अत्र गत्यर्थे प्रयुक्तः । (पा० ७–३–११४) तस्मात्कर्त्तरि "पुंसि संज्ञायामि" (पा० ३–३–११८) ति घः । बाहुलकान्मृजेर्वृद्धिरिति वृद्ध्यभावः । "वजो" (पा० ७–३–५२)रिति कुत्वम् । नित्यं ह्यसौ मार्ष्टि गच्छतीति मृगः ॥

भीमो बिभ्यत्यस्मात् ॥ ८ ॥

"भीमादयोऽपादाने"-(पा० ३–४–६४) इति बिभ्यते-(जु० प०) रपादाने मक् । कित्वाद् गुणाभावः । सर्वं एव ह्यस्माद्बिभ्यति प्राणिन इत्ययं भीमः ॥

भीमशब्दसारूप्यप्रसक्तं निराह—

भीष्मोऽप्येतस्मादेव ॥ ९ ॥

उक्तवत्सिद्धिः । धातोः षुगागमोऽत्र विशेषः ॥

कुचर इपि चरतिकर्म कुत्सितम् ॥ १० ॥

कुत्सितं कर्मनित्यं प्राणिवधाख्यं चरतीति कुचरः । मूलविभुजादित्वात्कः ॥

तदेवं निगमप्रसक्तान्कांश्चिन्मृगादीन्निरुच्य कुचरशब्दनिर्वचनप्रसङ्गेन पूर्वोपक्रान्तमर्थं सिंहावलोकितकेनाह—

अथ चेद्देवताभिधानम् ॥ ११ ॥

एतत् कुचर इति तदा—

कायं न चरतीति ॥ १२ ॥

देवताभिधानत्वे कायं न चरति सर्वत्र चरतीति नेदमपि देवताभिधानं कुचर इति ॥

गिरिष्ठा मेघस्थायी ॥ १३ ॥

इति च ॥

इन्द्रोऽपि हि मेघवाहनत्वाद्गिरिष्ठाः । सिंहोऽपि पर्वताश्रयत्वात्तथा चेदं श्लिष्टं विशेषणमुभयोरित्याह—

---

१. यद्वा नानाप्रकारेण प्रेरयत्स्व दूरमपुनरागमाय । नुद् प्रेरणे (तु० प०) पदव्यत्ययश्छान्दसः । "व्यवहिताश्चे"–(पा० १–४–८२)ति विशब्दस्यात्रापि संबन्धः ॥

२. अनेन निगमोक्तकुचरपदे कुपदं "गोत्रा कुः पृथिवी पृथ्वी" त्यमराभिधानबलाद्भूमिवाचीति निरुक्तकृदभ्युपगच्छति । तदपि विभुत्वादेवानां न विरुध्यते । सायणादयस्तु यथाश्रुतथास्माभिरप्यत्र (निगमव्याख्याकाले) उक्तम् ॥

३. तथाचामरः "तुराषाण्मेघवाहन" इति ॥

४. गिरिष्ठा इत्येतदसङ्गतं श्लेषबलेनेन्द्रस्य सिंहस्य च विशेषणमिति भावः ॥

गिरिः पर्वतः ॥ १४ ॥

इति । एतच्च पर्यायाभिधानं व्युत्पत्तिसाधर्म्यप्रदर्शनायेत्युपरिष्टाद्व्यक्तीभविष्यति । तदेव साधर्म्यं व्युत्पत्तिमुखेन तावदाह—

समुद्गीर्णो भवति ॥ १५ ॥

इति । सं-समस्त उद्गीर्णः । वान्त इव भूमौ भवति । समुद्गिरणं चात्र भूम्या एव ॥

पर्वतशब्दं पर्यायाख्यानप्रसक्तं निराह—

पर्ववान्पर्वतः ॥ १६ ॥

शिलाशिखरसंधिभिरसौपर्ववान्भवति । पर्वाणि सन्ति यत्रासौ पर्वतः । "तप्पर्वमरुत्व्या"-(पा० ५-२-१२१ वा०)मिति मत्वर्थीयस्तप्प्रत्ययः ॥

पर्वशब्दं विग्रहप्रसक्तं निराह—

पर्व पुनः पृणातेः ॥ १७ ॥

पूरणार्थस्य पृधातोः (क्रया० प०) "स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्" (उ० ४-१०९) इति वनिपि साधुः । पृणन्ति पूरयन्ति हि ते शिलाशिखरसन्धयोऽखिलं पर्वतमिति तानि पर्वाणि ।

प्रीणातेर्वा ॥ १८ ॥

तर्पणार्थस्य प्रीधातोः (क्रया० उ०) बाहुलकात् (३-३-१) वनिपि ईकारस्याकारः सच्च पकारात्परः । प्रीणयन्ति स्वाश्रयमिति पर्वाणि ॥

तत्पुनरेतत्—

अर्धमास-पर्व ॥ १९ ॥

अमावास्या वा पूर्णिमा वा । दर्शपूर्णमासेष्ट्योः श्रुतौ श्रवणेन तयोरेवात्र प्रसक्तेः ॥

कुतः—

देवानस्मिन्प्रीणन्तीति ॥ २० ॥

हविर्भिरिति शेषः ॥

तत्प्रकृतीतरत्सन्धिसामान्यात् ॥ २१ ॥

तदुभयं शिलासन्धिकालसन्ध्यात्मकं सन्धिसामान्यान्सन्धित्वात्पर्वेत्युच्यते ।

१. कर्तृपदमेतत् । भूमिकर्तृकं पर्वतस्य समुद्गिरणमिव लक्ष्यत इत्यर्थः ॥

२. विधेयप्राधान्यान्नपुंसकनिर्देशः । तत्पदेन हि शिलासन्धय एवोच्यन्ते । उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत्सर्वनामपर्यायेण तत्तल्लिङ्गभाग्भवतीत्यसकृदवोचाम । पर्व तु नपुंसकमेव । "सन्धिर्ना पर्वपरुषी" इति कोशे । रूपभेदान्नपुंसकत्वोक्तिः ॥

३. स्मृतौ तु "चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा । पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव चे"त्युक्तं विष्णुपुराणेऽपीदमेव ॥

प्रकृतीतरत्वरूपेणो भिन्नम् । सन्धित्वसाम्यात्पर्वेति यावत् । तथाचामराभिधानम् "स पर्व सन्धिः प्रतिपत्पदस्योर्यदन्तर"मिति । प्रतिपत्पदस्योर्यदन्तरं स सन्धिः पर्वेत्यन्वयः । यदाह रुद्रः "दर्शप्रतिपदोः सन्धौ प्रन्थिप्रस्तावयोरपि । पर्वण्यपि विजानीयाद्विधुवत्प्रभृतिष्वपी"ति ॥

देवताभिधानपक्षे—

मेघस्थायी ॥ २२ ॥

गिरिष्ठा इत्यस्यार्थः ।

मेघोऽपि गिरिरेतस्मादेव ॥ २३ ॥

असावप्यन्तरिक्षलोके समुद्गीर्णो भवति समुद्गिरणसामान्याद्गिरिः पर्वतो मेघश्चेति ॥

दैवतलक्षणं वदन्पूर्वोपक्रान्तमुपसंहरति—

तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्यास्यामो नैघण्टुकानि नैगमानीहेह ॥ २४ ॥ ६ खं० ॥

तत्-तत्र यानि नामानि अग्न्यादीनि देवपर्यन्तानि प्राधान्येन स्तूयन्त इति प्रधानस्तुतयः कर्मणि क्विन् । देवतास्तासां; तानि सर्वाणि समुदितानि सन्ति एतयैकया देवतामधिकृत्य कृतत्वाद्दैवतमित्येतया सामान्यया प्रकरणसमाख्यया संज्ञया आचक्षते आचार्या इति शेषः ॥ तत्पुनरेतद्दैवतं प्रकरणमुपरिष्टात् (दै० का० ७-४-१) अस्य शास्त्रस्य व्याख्यास्यामः । गुणपदेषु हि व्याख्यातेषु प्रधानदेवतापदानि सुखं व्याख्यास्यन्त इति ॥ यानि पुनर्नैघण्टुकानि गवादीनि,नैगमानि जहादीनि तानि इह प्रकरणद्वये (नैघण्टुकयैकपदिके च) व्याख्यास्याम इत्यनुवर्तते ॥ अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वेहेहेति द्विरभ्यासः ॥ * ॥

इति नि० ल० विवृतौ प्रथमस्य षष्ठः पादोऽध्यायश्च समाप्तः ॥ * ॥

२ अ० १ पादः ।

अथ निर्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशाय द्वितीयाध्यायस्य प्रथमखण्डसूत्रमारचयति—

अथ निर्वचनम् ॥ १ ॥

---

१. नैघण्टुकमिदं देवतानामेत्यादि ॥ ९ वाक्ये ॥

२. नैघण्टुकाश्वादिघटिते "अश्वं न त्वा वारवन्त" मित्यादिमन्त्रवाक्ये ॥

३. निरूढात्रीयमेतस्मिन्नैघण्टुक (निघण्टुप्रोक्त) शब्दसमुदाये संज्ञेति भावः ।

४. समाख्या यौगिकः शब्दः ॥

५. तान्येतानि त्रीणि प्रकरणानि, नैघण्टुक, नैकपदिकं (नैगमं), दैवतमिति । अनेन प्रकरणत्रयविभागप्रपञ्चेनेदमवस्थितं निरुक्तशास्त्रमिति ॥

अथेत्ययं हेतौ, यतो हेते समुपक्रान्ते (नैघण्टुकनैगमे) प्रकरणे निर्वचनलक्षण-मनुक्त्वाव्याख्यातुमशक्यो अथ एतस्मात्कारणान्निर्वचनं लक्षणतो व्याख्यास्याम इति शेषः । अपिहि तस्यार्थस्य परोक्षकृत्तद्धितपरोक्षकृतौ वा शब्दे निष्कृष्य विद्यते वचनं निर्वचनम् । स एष निर्वचनाभ्युपाय उच्यते ॥

इह तावच्छब्दाद्विविधा समर्थस्वरसंस्कारा, असमर्थस्वरसंस्काराश्च । तत्राद्यानधिकृत्योच्यते—

तद्येषु यदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयात् ॥ २ ॥

तत् तत्रैवं सति येषु (तावत्)पदेषु स्वरसंस्कारौ, समर्थौ अर्थमवगमयितुं शक्तौ । तदेवाह । प्रादेशिकेन प्रदेशाभिधायिनाऽर्थमवगमयता गुणेन धातुरूपेणान्वितौ संबद्धौ (अनुगताभिधेयस्थे धातुरूपे स्थितौ) स्यातां भवेतां तानि (तावत्) तथा (एव यथालक्षणं) निर्ब्रूयात् नैरुक्त इति शेषः । लक्षणप्रधानं हि व्याकरणमाद्यभूमावव-तिष्ठते ॥

द्वितीयानधिकृत्य वदति—

अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येन ॥ ३ ॥

अथ पुनरर्थेऽनन्विते न्याय्यस्वरसंस्कारयुक्तेन शब्देनासंबद्धे । तदेवाह—विकारे संस्कारे अप्रादेशिके प्रदेशानभिधायिन्यर्थमनवगमयति सति अर्थनित्योऽर्थप्रधानो भूत्वा, अर्थस्य प्राधान्येन स्वरसंस्कारावनादृत्य शब्दसामान्यादर्थसामान्यं बलीय इति न्यायेन केनचिद्वृत्तिसामान्येन क्रियागुणसामान्येन कथमस्य धातोरर्थसामान्य-

१०२ निरुक्तनिरुक्तिः ।

अथेत्ययं हेतौ, यतो हेते समुपक्रान्ते (नैघण्टुकनैगमे) प्रकरणे निर्वचनलक्षण-मनुक्त्वाव्याख्यातुमशक्यो अथ एतस्मात्कारणान्निर्वचनं लक्षणतो व्याख्यास्याम इति शेषः । अपिहि तस्यार्थस्य परोक्षकृत्तद्धितपरोक्षकृतौ वा शब्दे निष्कृष्य विद्यते वचनं निर्वचनम् । स एष निर्वचनाभ्युपाय उच्यते ॥

इह तावच्छब्दाद्विविधा समर्थस्वरसंस्कारा, असमर्थस्वरसंस्काराश्च । तत्राद्यानधिकृत्योच्यते—

तद्येषु यदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयात् ॥ २ ॥

तत् तत्रैवं सति येषु (तावत्)पदेषु स्वरसंस्कारौ, समर्थौ अर्थमवगमयितुं शक्तौ । तदेवाह । प्रादेशिकेन प्रदेशाभिधायिनाऽर्थमवगमयता गुणेन धातुरूपेणान्वितौ संबद्धौ (अनुगताभिधेयस्थे धातुरूपे स्थितौ) स्यातां भवेतां तानि (तावत्) तथा (एव यथालक्षणं) निर्ब्रूयात् नैरुक्त इति शेषः । लक्षणप्रधानं हि व्याकरणमाद्यभूमावव-तिष्ठते ॥

अथ पुनर्मन्त्रार्थसामन्यमपि नास्ति तत्र कथं निर्ब्रूयादित्यपेक्षायामाह—

अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूया-
त्त्वेव न निर्ब्रूयान्न संस्कारमद्रियेत ॥ ४ ॥

अक्षरैः स्वरः वर्णो व्यञ्जनम् । अमुष्मिन्धातावयमक्षरो वर्णो वा मया दृष्टः स एवास्मिन्नभिधानेऽपि वर्तत इत्येवमुत्प्रेक्ष्यार्थसामन्येऽविद्यमानेऽपि अक्षरवर्णसामान्यमात्रेणापि निर्ब्रूयात्तत्तद्धात्वर्थं प्रकाशयेदेव । नत्वेव न निर्ब्रूयात्तथासत्यनर्थकमे-

द्वितीयोऽध्यायः । १०१

अथ पुनर्मन्त्रार्थसामन्यमपि नास्ति तत्र कथं निर्ब्रूयादित्यपेक्षायामाह—

अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूया-
त्त्वेव न निर्ब्रूयान्न संस्कारमद्रियेत ॥ ४ ॥

अक्षरैः स्वरः वर्णो व्यञ्जनम् । अमुष्मिन्धातावयमक्षरो वर्णो वा मया दृष्टः स एवास्मिन्नभिधानेऽपि वर्तत इत्येवमुत्प्रेक्ष्यार्थसामन्येऽविद्यमानेऽपि अक्षरवर्णसामान्यमात्रेणापि निर्ब्रूयात्तत्तद्धात्वर्थं प्रकाशयेदेव । नत्वेव न निर्ब्रूयात्तथासत्यनर्थकमे-

वत्यः शब्दानामर्थेषु वृत्तयो भवन्ति ॥ अथ केचिच्छब्दाः क्वचिदर्थेऽर्थसामान्येन वर्तन्ते केचित् स्वरसामान्येन केचिद्वर्णसामान्येनेत्यतः—

यथार्थं विभक्तीः सन्नमयेत् ॥ ६ ॥

विभक्तीरपि यथार्थम् अर्थमनतिक्रम्यैव सन्नमयेत् पूर्वोत्तरप्रकरणाविरोधेन विपरिणमयेत् । यतस्तासामपि व्यत्ययो भवत्येव । यथाच दर्शयिष्यते । हृत्सु शोको हृदयानि शोकैः (नै. का० ९–३–१२) इत्येवमादि ॥

अथ यदुक्तं विशयवत्यो हि वृत्तयो भवन्तीति, तदर्थवशेन व्याकरणेऽपि शब्द-विपरिणामो भवतीत्येवं दर्शयति—

प्रत्तमवत्तमिति धात्वादी एव शिष्येते ॥ ७ ॥ १ खं. ॥

इत्येवमादि ॥ प्रोपसृष्टाद्दाञः कर्मणि भावे वा क्ते "दोदद्घो"रित्यनुवर्तमाने "अच उपसर्गादि"-(पा० ७–४–४७) ति घोरचस्तस्य "झरोझरी" (पा० ८–४–६५)तिलोपे दस्य "खरिचे"-(पा० ८–४–५५)ति चर्त्वम् । ततश्च धातुप्रत्यय-तकारयोः संयोगे प्रादिसमासः । एवमेवोपसृष्टस्य दोऽवखण्डन-(दि० प०) इत्यस्य "आ देच उपदेश"-(पा. ६–१–४५) इत्यात्वेऽवत्तमिति पूर्ववद्रूपम् ॥ एवमनयोर्धा-त्वोरादी एव शिष्येते । एवमन्येषामपि दृष्ट्वा यथासंभवमनुविधातव्यम् ॥ १ ॥

तदेवाह—

अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीति ॥ १ ॥

निवृत्तिरत्र गुणवृद्ध्योरभिमता, तस्याः स्थानेषु तथाच क्ङित्प्रसङ्गेषु "श्नसोरल्लोप" (पा० ६–४–१११) इत्यस्धातोरादिलोपो भवति । अत्र धात्वन्त एवशिष्यते ॥

अथाप्यन्तलोपो भवति गत्वा गतमिति ॥ २ ॥

निवृत्तिस्थानेष्विति वर्त्तते । अत्र गमेः क्त्वाप्रत्यये क्ङे च क्ङितीत्यधिकृत्या"नुदा-त्तोपदेशे"(पा० ६–४–३७)त्यादिना अनुनासिकलोपो भवति ॥

अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति ॥ ३ ॥

अत्र गमे"रलोन्त्यात्पूर्व उपधे-(पा० १–१–६५)त्युपधासंज्ञकस्याकारस्य गम-हने"(पा० ६–४–९८)त्यादिना लोपो भवति ॥

अथाप्युपधाविकारो भवति राजा दण्डीति ॥ ४ ॥

राजन् शब्दात्सौ-नोपधाया इत्यनुवर्तमाने "सर्वनामस्थाने चासंबुद्धौ"-(पा० ६–४–८)त्युपधादीर्घत्वम् । एवं दण्डिन्शब्दात्सौ "इन्हन्पूषार्यम्णांशौ-सौ"चे"-(पा० ६–४–१३) त्युपधादीर्घत्वम् । "हल्ङ्याधि"-(पा० ६–१–६८)ति सुलोपे "प्रत्ययलोपे प्रत्ययलक्षणमि"-(पा० १–१–६२)तिपदत्वा "झलोपः प्राति-पदिकान्तस्ये" (पा० ८–२–७) त्युभयोरपि नकारलोपो भवति ॥ एवमुपधा-विकारो भवति ॥

---

१. विकारो हि भावरूपो लोपस्त्वभावरूप इति पृथगुक्तः । व्या० म० भाष्येऽपि—लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् पालयिष्यतीत्युक्तौ लोपाद्वर्णविकारः पृथगुक्तः ॥

अथापि वर्णलोपो भवति, तत्त्वा यामीति॥५॥(ऋ० सं० १-२-१-५१)

अत्र याचामीत्यर्थे यामीति चाशब्दलोपश्छान्दसो भवति । अत एवैचात्मने पदव्यत्ययोऽपि ।

अथापि द्विवर्णलोपस्तृच इति ॥ ६ ॥

अत्र तिसृणामृचां समाहार इत्यर्थे "ऋक्पूरि-(पा० ५-४-७४) त्यादिना ऽकारः समासान्तः । ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसीति वार्तिकेन ऋक्शब्दे परे त्रेः संप्रसारणमुत्तरपदादेर्ऋकारस्य लोपश्च "संप्रसारणाचेति" (पा० ६-१-१०८) पूर्वरूपम् । इत्थं वर्णद्वयलोपो भवति ॥

अथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वादय इति ॥ ७॥

द्युत दीप्तौ (भ्वा० आ०) तस्माद्युतेरिसिन्नादेश्च ज (उ० २-१११) इति इसिन्नुपधागुणो दस्य ज इत्यादिव्यापत्त्या ज्योतिरेवं हन हिंसागत्योः (अ० प०) अस्मात्पचाद्यचि हस्य घो व्यत्ययेनेति घनः । एवं भिदिर्विदारणे (रु० उ०) "भृस्तृभ्यिहि० मनिभ्यश्चेति (उ० १-११) चाद्भिदेरपि उः । भस्य बो व्यत्ययेनेति बिन्दुः । भट भृतौ (भ्वा० प०) तस्मात् ण्यति भस्य वो व्यत्ययेनेति वाद्योभर्त्तव्यः । अयं सर्वोऽपि व्यत्ययो बाहुलक (पा० ३-३-१) बलेन समाधेयः ॥

अथाप्याद्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्किति ॥ ८॥

श्रुतिर् क्षरणे (भ्वा० प०) तस्य पृषोदरादित्वादाद्यन्तविपर्ययेण स्तोकाः ।

१. तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशंसमान आयुः प्रमोषीः ॥ १ ॥ अनया त्रिष्टुभा शुनःशेपो वरुणं तुष्टाव हरिश्चन्द्रमखे उपाकृतः सन् । हे वरुण ! मुमूर्षुरहं त्वा त्वां तत् आयुः यामि याचामि (याचे) कीदृशः । ब्रह्मणा वेदेन वन्दमानोऽभिष्टुवानः । प्रौढेन स्तोत्रेण स्तुवन्वा । अयं यजमानोऽपि तदायुरेव हविर्भिः संस्कृतैश्चरुपुरोडाशादिभिराशास्तेऽभिकाङ्क्षति (प्रार्थयते) तावावां भवन्तमेकमेवार्थं याचावहे स्तुतिभिर्हविर्भिश्च । त्वं चेह कर्मणि समाहूतः । अहेडमानोऽनादरमकुर्वन् बोधि असदपेक्षितं बुध्यस्व । हे उरुशंस ! बहुभिः स्तुत ! नोऽस्मदीयमायुर्मा प्रमोषीः मुखितं माकुरु माङि लुङि (पा० ३-३-१७५) तिलोऽर्थे लुङ् । "न माङयोगे"-(पा० ६-४-७४) इत्यडभावः ॥ १ ॥

२. अतएव याच्ञाकर्मसु ईमहे यामीत्यादिशब्दाः (निघ० ३-७९) पठिताः ॥

३. छान्दसत्वादेव । पदव्यत्यय उपग्रहव्यत्यये पूर्वं सप्रमाणो बाहुलकबलेन उक्तोऽधस्तात् ॥ ( ) ॥

४. पचादिगणे निपातनात् ॥

1. अत्यादृतः सन् । नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात् । अनादरे हि हेडृधातुः (भ्वा० आ०) पठितः । तस्मादत्रशानच् शपू । आनेमुक् (पा० ७-२-७२) इति मुगागमः शबन्तस्य ॥

सृज विसर्गे (दि० आ० × तु० प०) तस्मात्सृजेरसुमूचेति (उ० १-१६) उः । धातोरसुमागमआदिसकारस्य लोपश्च स्कन्देः सलोपश्चे (उ० १-१५) त्यतः सलोपश्चेत्यनुवर्तनात् यण् । सस्य जस्त्वम् रज्जुः । कस विकसने (भ्वा० प०) इतजाद्यन्तविपर्ययश्चौणादिकः । कृती छेदने (तु० प०) तस्मा॑त्कृतेराद्यन्तविपर्ययश्चे (उ० १-१७)त्युः । आदौ तकारोऽन्ते च ककारः ॥ इत्येवं तर्कुः । सूत्रादेः कर्तनसाधनम् ॥ २ ॥

अथाप्यन्तव्यापत्तिर्भवति ॥ ९ ॥ २ खं० ॥

व्यापत्तिर्विपर्यय इत्यनर्थान्तरम् ॥ २ ॥

तद्यथा—

ओघोमेघोनाघोगाधोवधूर्मध्विति ॥ १ ॥

'वह प्रापणे (भ्वा० उ०) तस्यान्तव्यापत्त्यौ घः । वहः कपूधश्चौणादिकः । कित्वात्संप्रसारणं चाद्गुणो हस्य घः । उह्यतेऽसावोघः । मिह सेचने (भ्वा० प०) अस्य मेघः । पचाद्यच् (पा० ३-१-१३४) न्यङ्क्वादित्वात्कुत्वम् । मेहति सिञ्चति वर्षणेन भूमिमिति मेघः ॥ 'णह बन्धने' (दि० उ०) तस्माद्धञि हस्यान्तव्यापत्तिर्धः । 'गाहू विलोडने (भ्वा० आ०) कर्मणि घञ् गाह्यतेऽवगाह्यतेऽसौ गाधः । हस्योक्तवद्धः । 'वह प्रापणे' (भ्वा० उ०) 'वहो धश्च' (उ० १-८०) इत्यूप्रत्ययः । ऊह्यते प्राप्यतेऽसौ वधूः । हस्यः धः । 'मद तृप्तौ' (दि० प०) तस्माद्बाहुलका-(पा० ३-४-१) दुप्रत्ययो धान्तादेशश्च । माद्यन्ति हि तेन पीतेन प्राणिनः । इदं तु स्कन्दस्वामिनो निर्वचनम् । वैयाकरणास्तु मन ज्ञाने (दि० आ०) इत्यस्मा"न्निदि"ति (उ० १-९) वर्तमाने "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चे"-(उ० १-१८) त्युप्रत्ययो धोऽन्तादेशश्च मन्यतेऽतिशयेन जनैरिति मधु ॥ मननीयं मध्विति भट्टभास्करमिश्रः ॥

अथापि वर्णोपजन आस्यद्वारो भरूजेति ॥ २ ॥

उपजन आगमः । तद्यथा आस्यत् अत्रासु क्षेपणे (दि० प०) इत्यस्माल्लुङि तिपि । आडागमे "अस्यतिवक्ती" (पा० ३-१-५२) ल्यङि "अस्यतेस्थुक्" (पा० ७-४-१७)इति धातोस्थुगागमः ॥ वारो वरणं "वृङ् संभक्तौ' (क्या० आ०) घञ् 'अचोञ्णिती-(पा० ७-२-११५) ति वृद्धिराकारः सच उरण्परः (पा० १-१-५२) इति रपरस्सन्नेव प्रवर्तत इति रेफोऽत्रागम एव अवयवतया विहित एवं ल्यागमो व्यपदिश्यते । यल्लक्षणमवयवत्वावच्छिन्नविधेयताश्रयत्वं नव्या व्याकृतिविदो वदन्ति ॥ भरूजेति भ्रस्ज पाके (तु० उ०) इत्यस्य, भिदादित्वा (३।३।१०४) दङि बाहुलकत्वा[1] (३।३।११३) द्रेफस्योपधायाश्च स्थाने रूमागमः अत्र सर्वत्र इतिशब्द आद्यर्थः । तेनान्यत्राप्येवमादिमध्यान्तलोप आदिमध्यान्तविकारो वर्णलोपो द्विव-

१. कृत्वस्तुटो बहुलमिति सूत्रे बहुलग्रहणं योगविभागेन कृत्प्रत्ययमात्रविषये सर्वं बहुलमिति विदधाति ॥

र्णलोप आदिविपर्यय आद्यन्तविपर्ययोऽन्तव्यापत्तिर्वर्णोपजनश्च छन्दसि भाषायां च यथासंभवं द्रष्टव्याः । दृष्ट्वा च यथासंभवमन्ततो बाहुलकबलेनानुविधेयाः । बहुलं छन्दसि । उणादयो बहुलमिति । तत्राहि—संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे॥ कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥ १ ॥ इत्युक्तम् ॥ छन्दस्युक्तमधस्ताद्व्याख्यास्थानम् ॥

एवंमर्थवशेन लक्षणप्रधाने व्याकरणेऽपि शब्दविपरिणामो दृष्टः । किमुत निरुक्ते यदर्थप्रधानमेव तस्मात्साधूक्तं "विशयैवत्यो हि वृत्तयो भवन्तीत्यनन्विते ऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेते"त्येवमादि ॥

अथ (अतः परं) संप्रसारणचिन्तावर्त्तिष्यते तदर्थमिदमारभ्यते—

तद्यत्र स्वरादनन्तरान्तस्थान्तर्द्धातु भवति तद्द्विप्रकृतीनां स्थानमिति प्रदिशन्ति ॥ ३ ॥

त्रिविधा हि धातवः । संप्रसार्यप्रकृतयोऽसंप्रसार्यप्रकृतय उभयप्रकृतयश्च । तत्रैवं सत्युभयप्रकृतिषु शास्त्रविषयगतं यद्वक्तव्यं तत्—इदमुच्यत इति पर्युपयुक्तस्तच्छब्दः । तत्र तावदुभयप्रकृतिलक्षणमाह—यत्रेत्यादिना यत्र-यस्मिन्धातौ स्वरादकारादेरनन्तरा अव्यवहिता अन्तस्था यैरलवा अन्तर्द्धातु—धातुमध्ये भवन्ति तत्—एवं लक्षणं धातुरूपं द्विप्रकृतीनां द्विस्वभावानां शब्दानां स्थानमाश्रय इति एवम् आचार्या इति शेषः । तद्यथा—यज—देवपूजादौ (भ्या० उ०) अत्र द्वेशब्दप्रकृती भवतः । संप्रसारणपक्षे तावदिष्ट्वा—इष्टः इष्टवान् । एताः शब्दप्रकृतयो भवन्ति असंप्रसारणपक्षेतु यष्ट्वा—यष्टुं यष्टव्यम् इत्येताः ॥

तत्र सिद्ध्यामनुपपद्यमानायामितरयोपपिपादयिषेत् ॥ ४ ॥

तत्रैवंसति एकया रीत्या सिद्ध्यामर्थसिद्धावनुपपद्यमानायामितरया रीत्या

---

१. अथ यदुक्तमित्यादिना यत्प्राक् (१०४पृ.) प्रदर्शयितुमुपक्रान्तं तदुपसंहरति—एवमित्यादिना ॥

२. लोपागमवर्णविकाररूपः । यत्परिज्ञानफलमुक्तं व्या. म. भाष्ये "लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्पालयिष्यतीति रक्षार्थं वेदानामध्येयं व्याकरण"मिति ॥

३. अर्थचान्वयवशाद्यथाऽर्थो लभ्यते तथाभूतस्यानुवादः । आदिना विभक्तीरपि यथार्थं सङ्गमयेदिति ॥

४. व्यवधानं च विजातीयैरेव भवतीति व्यञ्जनान्तरिताः पराः पूर्वा वा ॥

५. तदन्यतमः । अन्तस्थाशब्द आवन्तोऽपि । संपूर्वकात्तिष्ठतेः "स्थः कचेः" (पा० ३-२-७७)ति कट्टाप् । स्पर्शोष्मणोरन्तर्मध्ये तिष्ठन्तीति तदर्थः । अतएवान्तस्थाभिश्च संयुतम् । ईषत्स्पृष्टमन्तस्थानामित्यादिं सङ्गच्छते ॥

६. अत्र सिद्धायामिति पाठो मुद्रितपुस्तके धृतोऽप्यनादृतोऽस्माभिरर्थासंगतेः ॥

(तल्लक्षणशास्त्रविहितेनार्थसाधनोपायेन) उपपिपादयिषेदुपपादयितुमिच्छेत् । अर्थो हि प्रधानं स यथैवोपपद्येत तथा यत्नं कुर्यात् ॥

तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति ॥ ५ ॥

तत्राप्येतस्मिन्नपि संप्रसारणलक्षणे सति । एके धातवः अल्पनिष्पत्तयो भवन्ति अल्पेषु शब्दरूपेषु संप्रसारणप्रकृतिरभिनिष्पद्यते—तदेतदुपेक्षितव्यम्—

तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमिति ॥ ६ ॥

तत् यथा एतदुदाहरणजातम्—अवनमूतिः । अवरक्षणादौ (भ्वा० प०) तस्मात्स्त्रियां क्तिन् (पा० ३–३–९४) इति क्तिनि रूपम् । छ्वोःशूडित्यनुवर्तमाने "ज्वरत्वरे" (पा० ६–४–२०) त्यादिना ऊठिति वकारस्योकारोऽभिसंपद्यते । एवं म्रद मर्दने (भ्वा० आ०) तस्मात् "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चे"-(उ०–२९)ति उः । अत्र रेफः संप्रसार्यमाणऋकारः । एवमेव प्रथप्रथने (भ्वा० आ०) इत्यस्य पृथुः । कुषदाहे (भ्वा० प०) इत्यस्य "कुषिरजिभ्यां किदिति (उ० ३–१११) अतच् । सच किदिति संप्रसारणं पूर्वरूपंच ॥ कुण शब्दे (भ्वा० प०) इत्यस्य कुणारुम् । बाहुलकात्कारुप्रत्ययः कित्त्वाद्गुणाभावः ॥ इति शब्द आद्यर्थः । एवमादयोऽन्येऽपि बहवः समूह्याः ॥

तामेनां कृत्सु संप्रसारणचिन्तां वर्तयित्वाऽन्यमपि विशेषद्रष्टव्यमागमशब्दनिर्वचनोपायं वक्तुमुपक्रमते—

अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते ॥ ७ ॥

अथेति प्रकारान्तरोपक्रमे । अपीति वाक्यालङ्कारे । अथापीदमपरमुपेक्षितव्यमनेनागमशब्दान्निर्ब्रुवता । यत्—भाषिकेभ्यः भाषायां प्रायेण प्रसिद्धप्रयोगेभ्यो धातुभ्यो नैगमाश्छन्दोविषयाः कृतः कृत्प्रत्ययान्ताः शब्दा भाष्यन्ते विव्रियन्ते निरुच्यन्त इत्यर्थः ॥

तद्यथा—

दमूनाः क्षेत्रसाधा इति ॥ ८ ॥

दम उपशमे (दि० प०) तस्य भाषायां दाम्यति अनड्वान् दमयत्यनड्वाहम् (नस्योतं करोतीत्यर्थस्तथा च) दान्तोऽनड्वान् । इत्येवमादयः प्रयोगा भवन्ति ।

---

१. द्वयोः संप्रसारणासंप्रसारणप्रकृत्योर्यैर्यैवोपपद्यतेऽर्थस्तयैवोपपादयेत् । अथवोभयथाप्यनुपपद्यमानेऽर्थे स्वयमुत्पाद्य (निर्द्धार्य्य) यथायथोपपद्येतार्थस्तथातथोपपादयेदित्यर्थः ॥

२. उपगम्य तथाभूतेषु शब्देषु ईक्षितव्यमालोचितव्यं नैरुक्तैरितिशेषः । दिग्दर्शनार्थमुदाहियते च अयमेव व्याख्यामार्गोऽन्यत्रापि (अग्रे अथापीत्येतच्छब्दघटिते) द्रष्टव्यः ॥

३. यद्यपि मुद्रितपुस्तकेषु "पृषिरजिभ्यां किदि"ति पाठउपलभ्यते तथापि दुर्गसंमतोऽयं पाठः । संवदति चामुमर्थं पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषस्त्रियामि"ति अमरोऽपि । अत्र हि प्रुषेः कित्वन्तस्य पर्यायवचनतयोपन्यासस्तथा गमयति ॥

४. कित्त्वसामर्थ्याधजादित्वकल्पना । एवमन्यत्रापि ॥

५. तथाच विशेषाधिकारार्थोयमथशब्द इति भावः ॥

छन्दसि पुनर्दमूना अभिरुच्यते । स भाषासामान्येन केनचिन्निर्वक्तव्यो दममना इत्येवमादिना । एवमेव साप्नोतेर्भाषाप्रायो वृत्तेः । "सर्वधातुभ्योऽसुन्" (उ० १-१८८) इत्यसुनि साधा इति । "मित्रं न क्षेत्रसाधसम्" (ऋ० सं० ६-२-४-४) इत्येवमादयो मित्रमिव क्षेत्रसाधसमित्येवमादिना प्रकारेण निर्वक्तव्याः ॥

अथापि नैगमेभ्यो भाषिकाः ॥ ९ ॥

निगमे छन्दसि ये प्रायो वृत्त्या प्रसिद्धास्ते नैगमास्तेभ्यः सामान्यं गृहीत्वा भाषिकाः कृतो भाष्यन्त इत्यनुवर्तते । तद्यथा—

उष्णं घृतमिवि ॥ १० ॥

उष दाहे (भ्वा. प.) एष प्रायेण छन्दसि प्रसिद्धः । "प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः" (य. सं. १-७) इत्येवमादौ । भाषायां पुनरुष्णमिति श्रूयते । स एष नैगमशब्दसामान्येन निर्वक्तव्यः । एवं भाषाविषयेभ्यश्छन्दोविषयाश्छन्दोविषयेभ्यो भाषाविषयाः ॥

अथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु ॥११॥३ खं०॥

एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते विकृतय एकेषु । धातोराख्यातपदभावेन यः प्रयोगः सा प्रकृतिः । नामीभूतस्य तस्यैव यः प्रयोगः सा विकृतिः ॥ ३ ॥

अथ क्व प्रकृतय एव भाष्यन्ते क्व वा विकृतय इत्येतदुपदर्शयितुं चतुर्थं खण्डसूत्रमारचयति—

शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते ॥ १ ॥

शवतिः शवधातुः । (भ्वा.प.) "इकश्चितौ धातुनिर्देशे" (पा. ३-३-१०८ वा.) स गतिकर्मा गत्यर्थः । कम्बोजेषु तन्नामकेषु देशविशेषेषु (तद्देशभवेषु म्लेच्छेषु) एव प्रकृत्या भाष्यते आख्यातपदभावेन प्रयुज्यते, शवतीति, गच्छतीत्यर्थः ॥

उदाहरणविशेषप्रसक्तः कम्बोजशब्दो निरुच्यते ॥

कम्बोजाः कम्बलभोजाः ॥ २ ॥

पृषोदरादिः (पा० ६-३-१०-९) ते हि प्रायेण कम्बलमुपभुञ्जते हिमप्रधानत्वात्तस्य देशस्य ॥

---

१. अत्र निर्वचनप्रकार उक्तः (६४ पृ. २१ प.) स एवात्राप्यनुसन्धेयः ॥

२. कम्बोजशब्दात्तद्राजप्रत्ययस्याञो "कम्बोजाल्लुक्" (पा० ४-१-१७५) इतिलुकि कम्बोजदेशराजानोऽपि कम्बोजाः । 'क्षत्रियसमानशब्दाञ्जनपदात्तस्य राजन्यपत्यवत्'। (४-

निगमे छन्दसि ये प्रायो वृत्त्या प्रसिद्धास्ते नैगमास्तेभ्यः सामान्यं गृहीत्वा भाषिकाः कृतो भाष्यन्त इत्यनुवर्तते । तद्यथा—

उष्णं घृतमिवि ॥ १० ॥

उष दाहे (भ्वा. प.) एष प्रायेण छन्दसि प्रसिद्धः । "प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः" (य. सं. १-७) इत्येवमादौ । भाषायां पुनरुष्णमिति श्रूयते । स एष नैगमशब्दसामान्येन निर्वक्तव्यः । एवं भाषाविषयेभ्यश्छन्दोविषयाश्छन्दोविषयेभ्यो भाषाविषयाः ॥

अथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु ॥११॥३ खं०॥

एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते विकृतय एकेषु । धातोरा-

११८ निरुक्तविषयानुक्रमः ।

एवमनेन प्रकारेण एकपदानि उक्त्वाऽनुक्तानि च निर्ब्रूयात् (आवश्यकमन्यवचनया, देशभाषाऽविरोधिविभागेन च) निर्धार्य ब्रूयात् ॥

एवमतद्धितसमासयोः पदानां निर्वचनोपायमुक्त्वा तयोरपि तद्वक्तुमुपक्रमते—

अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् ॥ ९ ॥

अथशब्दो विशेषाधिकारार्थः "तद्धिताः" (पा० ४-१-७६) इत्यधिकृत्य ये प्रत्यया विहितास्ते तद्धिताः। "समर्थः पदविधिः" (पा० २-१-१) इत्यधिकृत्य ये विहितास्ते समासास्तेष्वभयेष्वपि तद्धितसमासेषु। अविशेषेणैकपर्वसु एकपदेषु अनेकपर्वसु अनेकपदेषु च (एकश्चो वाक्यालंकारे) पूर्वं तद्धितार्थं समासार्थं च पूर्वमेव (पदार्थात्) अपरं पदार्थमपरं पश्चादेव (क्रमेण—पदार्थात्—समासार्थाच्च) प्रविभज्य विगृह्य निर्ब्रूयात् ॥

तत्रैकपदतद्धितोदाहरणम्—

दण्ड्यः पुरुषः ॥ १० ॥

इति। अत्र दण्ड्य इति पुरुषविशेषणं तत्र तावत्तद्धितार्थं निर्वक्ति—

दण्डमर्हतीति वा दण्डेन निष्पद्यत इति वा ॥ ११ ॥

कस्मिंश्चिदपराधे दण्डमर्हतीति दण्ड्यः। तदर्हतीत्यधिकारे "दण्डादिभ्यो यत्" (पा० ५-१-६६) इति द्वितीयान्तायत्। दण्डेन वा कार्षापणादिना यः निष्पद्यते संपद्यते(संयुज्यते)स दण्ड्यः।" "तेन यथाकथा च हस्ताभ्यां णयता" (पा०५-१-९८) इत्यतस्तेन यदित्यनुवर्त्य "संपादिनि" (पा. ५-१-९९) इत्यनेन संपन्नार्थे यदिति यास्कोऽभिप्रैति। पाणिनीयास्तु तेनेत्येवानुवर्तयन्ति प्रत्ययस्तु "प्राग्वतेष्ठन्" (पा. ५-१-१८) इति "तेन तुल्यमि-" (पा० ५-१-११५) ति वतिं यावद्वनेवासति विशेषेऽनुवर्तत इत्याहुः ॥

अथात्र पदार्थनिर्वचनम्—

दण्डो ददतेर्धारयतिकर्मणः ॥ १२ ॥

धारणार्थस्य दद्धातोः (भ्वा. आ.) कर्मण्यौणादिकेमनि धातोर्णुमागमे ष्टुत्वे च दण्डः। धार्यते क्रोधोऽपराधेषु राजभिः ॥ अत्र लोकदर्शनं तावत् प्रमाणयति—

अक्रूरो ददते मणिमित्यभिभाषन्ते ॥ १३ ॥

---

१. तद्धिते पदेषु समासे पदेषु च। तत्र तद्धितपदं प्रत्ययग्रहणपरिभाषया तद्धितान्तपरं यद्वा तद्धितयुक्तपरमेवं समासपदं तद्युक्तपरं तदस्मिन्वाक्यार्थे पूर्वं तद्धितं तदप्यर्थपरमेवं समासपदमपि।

२. पर्वात्र पदंतदपि शक्यं न तु सुप्तिङन्तरूपम्। तदेतदग्रे स्फुटीभविष्यति ॥

३. यद्यपि दद दाने दध धारणे इत्युदात्तावनुदात्तेतावात्मनेपदिनौ भ्वादौ पठ्येते। तथापीह दधतिसाहचर्याद्ददतिरपि धारणार्थे प्रयुक्तश्छान्दसत्वाद्धातूनामनेकार्थत्वाच्च ॥

४. अत्र ददतेर्धारणेऽर्थे वृत्तौ तावत्प्रथमम्। लोकस्यैव व्यवहारे प्राथम्यमिति तमेवादौ प्रमाणयति। यत्र त्वविसंवादं धारणार्थे वृत्तिः स वेदस्तु नेह प्रमाणितः प्रचुर-

अक्रूरो नाम राजा कृष्णवन्धकाधिपतिः स मणिं स्यमन्तकनामानं भक्तिपुष्टेन भगवता भास्करेण प्रदत्तं ददते शिरसा धारयति इति—एवं लोकेऽपि दर्पतिं धारणार्थेऽभिभाषन्ते शिष्टाः ॥

अत्रैव मतान्तररीत्या साधनान्तरमुपवर्णयति—

दमनादित्यौपमन्यवः ॥ १४ ॥

दमनाद्दण्ड इत्यौपमन्यव आचार्यो मन्यत इति शेषः । तेन हि अदान्तो दम्यते राजभिः । दाम्यत्युपशाम्यत्यनेनेति दण्डः । दम उपशमे (दि. प.) "अमन्ताड्डः" (उ० १–११३) इति करणे डः ॥ अतएवादान्तान्दमयेद्दण्डेनेत्युक्तं दण्डनीत्याम् । लोकेऽपि हि प्रसिद्धो यः कश्चिददान्तो भवति तमधिकृत्य वक्कारो वदन्ति—

प्रयोगतया सुगमत्वाच्चत्र ह्यर्थे लोक एव प्रमाणं तत्र किमिति वेदानुधावनम्—तत्र यथा दिङ्मात्रमुदाहियते—

"उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽभिजातः । द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वाददन्त ॥ (ऋ० सं० ५–३–२४–११)–इयं त्रिष्टुप् मित्रावरुणयोरुर्वशीमप्सरसं दृष्ट्वा जले पतितायेतसो वसिष्ठोत्पत्तिमभिनन्दतीति वसिष्ठस्तुतिरियम् । तथाचादितेर्मित्रावरुणौ जज्ञाते इति प्रकृत्य (स्मृतौ) पठ्यते—"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्वशीम् । रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥ १ ॥ तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ । अगस्त्यश्च वसिष्ठश्च तत्रर्षी संबभूवतुः ॥ २ ॥ बहुधा पतितं रेतः कलशे च जले स्थले । स्थले वसिष्ठस्तु मुनिः संभूत ऋषिसत्तमः ॥ ३ ॥ कुम्भे त्वगस्त्यः संभूतो जले मत्स्यो महाद्युतिः । उदियाय ततोऽगस्त्यः शम्यापात्रो महातपाः ॥ ४ ॥" मानेन संमितो यस्मात्तस्मान्मान्य इहोच्यते । यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते॥५॥ कुम्भ इत्यभिधानं च परिमाणं च लक्ष्यते । ततोप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ॥ सर्वतः पुष्करे तं हि विश्वेदेवा अधारयन् ॥" इति ॥

मन्त्रार्थस्तु । उतापिच हे वसिष्ठ ! त्वं मैत्रावरुणोऽसि मित्रावरुणयोः पुत्रोसि । हे ब्रह्मन् वसिष्ठ ! उर्वश्या अप्सरसो–मनसो ममायं पुत्रः स्यादितीदृशात्संकल्पात् द्रप्सं द्रवीभूतं घनीभूतं रेतो मित्रावरुणयोरुर्वशीदर्शनात्स्कन्नमासीत् । तस्मादधिजातोऽसि । तथा च वक्ष्यते । सत्रेऽहं जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् । ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ॥ (ऋ० । सं० ५–३–२४–१३) एवं जातं त्वां दैव्येन देवसंबन्धिना ब्रह्मणा वेदराशिना अहंभुवा युक्तं विश्वेदेवाः सर्वेदेवाः पुष्करे पद्मकोशे अददन्त अधारयन्त । इति ॥

१. एष प्रसंगः श्रीमद्भागवते (द० स्क० अ० ५६) द्रष्टव्यः ॥

---

1. इयमेतन्मन्त्रार्थव्याख्याने सायणेन धृता ॥

2. सत्रे बहुकर्तृके यागे जातौ दीक्षितौ मित्रावरुणौ इषिताऽध्येषितौ स्वयमन्यैर्जनैर्नमोभिः स्तुतिभिः कुम्भे वासतीवरे कलशे समानमेकदैव रेतः सिषिचतुः असिञ्चतां । ततो वासतीवराकुम्भान्मध्यान्मध्यभागादगस्त्योमुनिः शमीप्रमाण उदियाय प्रादुर्बभूव । तत एव कुम्भाद्वसिष्ठमप्यृषिं जातमाहुः इति पदपूरणः ॥ १३ ॥ इति सायणः ॥

दण्डमस्याकर्षतेति गर्हायाम् ॥ १५ ॥ ४ खं. ॥

हे सभासदः ब्रूयमस्यं दण्डमाकर्षत दण्डमस्मै प्रयच्छत । तेन दण्डेन सम्पद्यतामयं ततो दान्तो भविष्यतीत्येवं गर्हायां दृष्टः ॥ एवं दमनाद्दण्ड इत्यौपमन्यवो मन्यते इति संपुटितो वाक्यार्थः ॥ ४ ॥

अथैकपदतद्धितस्यैव द्वितीयमुदाहरणमाह—

कक्ष्या रज्जुरश्वस्य ॥ १ ॥

कक्ष्या इत्येष तद्धितः (तद्धितान्तम्) योऽयमश्वस्य रज्जुः सन्नहनसाधनं "तङ्ग" इति भाषायां प्रसिद्धः स कक्ष्येत्युच्यते ॥ एवं कक्ष्याशब्दस्य तत्त्वमुक्त्वाऽधुना तद्धितार्थं ब्रवीति—

कक्षं सेवते ॥ २ ॥

कक्षो बाहुमूलप्रदेशं "बाहुमूले उभे कक्षावि"त्यमरः । तं सेवते तत्र भवा वा । "तत्र भवः" (पा० ४–३–५३) इत्यधिकारे "शरीरावयवाच्चे–" (पा० ४–३–५५) ति यत् ॥

अधुनापदार्थं निर्वक्ति—

कक्षो गाहतेः ॥ ३ ॥

विलोडनार्थस्य गाहधातोः (भ्वा० आ०) अयं कक्ष इति निपात्यते । पृषोदरादित्वात् ॥ गाहते विलोडयति द्रष्टव्यमर्थमस्मिन्निति कक्षः ॥

अत्र साधनप्रक्रियामाह—

क्स इति नामकरणम् ॥ ४ ॥

क्स इत्ययं नाम (संज्ञाशब्दः) क्रियते निष्पाद्यतेऽनेनेति संज्ञाकरणं संज्ञा-(त्व) प्रयोजकः प्रत्ययभूतः शब्दः धातोश्च कादेशः । प्रत्ययावयवस्य च सस्य षत्व "मादेशप्रत्यययोः–" (पा० ८–३–५९) इति एवं सर्वमन्यदाद्यन्तविपर्ययादियथासंभवमन्यत्रापि योज्यम् ॥

ख्यातेर्वाऽनर्थकोऽभ्यासः ॥ ५ ॥

प्रकथनार्थस्य ख्याधातोः (आ. प.) अनर्थकोऽभ्यासो द्विर्भावः ककारः । कख्यः सन् कक्ष इत्युच्यते । अत्र ख्याधातो"रातश्चोपसर्ग–" (पा० ३–३–१०६) इत्यत्रात इति योगविभागात्कमभिप्रैति यास्कः । "आतो लोप इटि चे–" (पा०-६–४–६४) त्याकारलोपः ॥ ख्यातीवायमिति कक्षः ॥

---

१. अस्याकर्षतेति क्रियायाऽभिप्रेतस्यापि संबन्धमात्रविवक्षायां शेषषष्ठी सतांगतमितिवत् ॥ सद्भिर्गतमिति हि तदर्थः ।

२. यथोपदर्शितम् ।

३. पाणिनीयास्त्वस्य (ख्यातेः) सार्वधातुकमात्रविषयत्वं मन्वते । चक्षिङः ख्याञादेशस्य ख्शादित्वप्रयोजनान्वाख्याने "मस्यानत्वं नमःख्यात्रे" इति वार्तिककृदुक्तस्य प्रयोजनस्य सस्यानो जिह्वामूलीयः स नेह भवति । ख्शाञः सस्य यो वेत्यस्यासिद्धकाण्डे पाठेनासिद्धत्वात्कुप्वोः परत्वाभावादिति पतञ्जलिना समर्थनात् । सतिशास्यार्धधातुकविषय-

यद्वाऽर्थवानेव ककार इत्याह—

किमस्मिन्न्यायनमिति ॥ ६ ॥

एवं किमस्मिन्न्यापनीयमस्ति ? । न किंचिदपि अदर्शनीयत्वात् । गूहनीयोऽयमित्यर्थः । स एव एवं कृत्वा किंख्यः सन् कक्ष इत्युच्यते ॥

कषतेर्वा ॥ ७ ॥

हिंसार्थकस्य कषधातोः (भ्वा. प.) "वृतृवदिहनिकमिकषिभ्यः सः" (उ०-३-५९) इति सः । षस्य कत्वं (पा० ८-२-४१) सस्य षत्वम् (पा० ८-३-५९) नित्यकालं खसौ खेदशीलत्वात्कण्डूं ददाति । ततो नखैः कष्यते इति कषणक्रियायोगात्कक्षः ॥ एवं स्त्रीकक्षं व्युत्पाद्य पुंकक्षं व्याचष्टे—

तत्सामान्यान्मनुष्यकक्षः ॥ ८ ॥

तस्य स्त्रीकक्षस्य सामान्यात्समानधर्मवत्वान्मनुष्यकक्षः पुरुषकक्षोऽपि कक्ष इत्युच्यते ।

बाहुमूलसामान्याद्‌श्वस्य ॥ ९ ॥

अश्वस्यापि यो बाहुमूलप्रदेशः स कक्ष इत्युच्यते । तं सेवत इति कक्ष्या ॥ इत्येवमेकपदतद्धितोदाहरणं दिग्दर्शनार्थं द्विधादर्शितं दुर्बोधं, सुखबोधं तु ऋजुमतिभिरप्यूहितुं शक्यमिति नो दर्शितम्—। एतेनानेकपदतद्धितोदाहरणादिकमपि सुखबोधतयैवोपेक्षितं तदस्माभिर्ऋजुमतीनामवगृह्यशासुपयोगाय किंचित्प्रदर्श्यते—तत्र तावदनेकपदतद्धितोदाहरणम्—गार्ग्यायेण इति । अनेकानि ह्येषं पदानि स्वात्मन्यन्तर्णीय प्रवर्तते

लेऽस्यैव तृचा तत्सिद्धेरिति तेषां भावः ॥ योगविभागोऽपि भाष्यानुक्तो न संगृह्यते तैर्लक्षणैकचक्षुष्कैः । अयन्तु (यास्कः) लक्ष्यैकदृगिति नोपेक्षणीयमेतद्व्याख्यानमभियुक्तैः । पाणिनिस्त्वसादर्वाचीन इत्यपि बहवः ॥

१. दुर्गस्तु वार्ष्यायणिरित्युदाजहार विजग्राह च वृषस्यापत्यं वार्ष्यः । वार्ष्यस्यापत्यं वार्ष्यायणः । तस्यापि वार्ष्यायणिरिति । तदेतदसमञ्जसम् । तथा "कौशल्यकार्मार्या-भ्यांचे" (पा० ४-१-१५५) ति सूत्रे "छागवृषयोरपी"ति वार्तिकं पठ्यते । अपत्ये हि तेन फिञ् विधीयते सच "परमप्रकृतेरेवायमिष्यत"इति वृषशब्दादेव भवति । प्रत्ययसन्नि-

1. तेषामयं भावः । शाकटायनगार्ग्यवार्ष्यायणादीनां व्याकृतिविदां मतं यथात्रानेनानूद्यते न तथा पाणिनेः नामनिर्देशमनुवदनमिहास्तीति ॥ पुराणप्रसिद्धः पाणिनिरिति तु गुरवः ॥ तदेतत् ब्रह्मवैवर्ते प्रकृतखण्डे चतुर्थाध्याये "शेषः पाणिनये प्रादादि"त्यादि सरस्वतीमन्त्रप्रसंगे द्रष्टव्यम् । शेषोऽत्रानन्तः । यदंशः पतञ्जलिः । एवं गणेशखण्डेऽपि (अ० २३-श्लो० १४) और्वः कात्यायनश्चैव कणादः पाणिनिस्तथेतिपठ्यते ॥ एवं देवीभागवतेऽपि द्रष्टव्यम् ॥ अतएवात्र निरुक्ते (१-४-१) वैयाकरणानाञ्चैकशब्दमुख्या पाणिनिमेव लक्षयति । एके प्रधानाः । "एकोऽन्यार्थे प्रधाने चेति" कोशः । पाणिनिना संक्षिप्य "वृषादरादीनि यथोपदिष्टम्" इत्येवमुक्तमेवार्थं वार्क्षो विस्तार । तदेतत्सूत्रभाष्यादौ द्रष्टव्यम् ॥

तद्यथा गर्गस्य गोत्रापत्यं गार्ग्यः "गर्गादिभ्यो यञि"–(पा० ४–१–१०५)ति गोत्रे यञ् । आदिवृद्धिः । गार्ग्यस्यानन्तरापत्यं गर्गस्य युवापत्यं गार्ग्यायणः "अत इञि"–(पा० ४–१–१०१) ति यून्यपत्ये फक् ॥ अत्र "समासेष्वप्येकपदेषु चैवं निर्देशात् यथावक्ष्यामः । एकशेषः एकपदसमासः । तथाच पाणिनिसूत्रम् "सरूपाणामेकशेष एकविभक्तौ"–(१–२–६४) इति । तद्यथा पुरुषश्च पुरुषश्च पुरुषौ पुरुषश्च पुरुषश्च पुरुषा इत्येवं"विधिं दुर्गो वक्ष्यति ॥ एकपदसमासस्तु नैव भवतीति स्फुटमनुपदम् ॥ एवं तद्धितनिर्वचनलक्षणं सोदाहरणमुक्त्वा समासोदाहरणमुच्यते—

योगेन प्रकृतिरूपं निपात्यते । तथा च वृषस्यापत्यं वार्ष्यायणिरित्येव विग्रहो न्याय्य इति ॥ गार्ग्यायणशब्दात्तु "अत इञि" (पा० ४–१–७६)ति इञ् न भवति सहि अपत्ये विधीयमानो न यूनि, गोत्रावयवान्यञिलुगभि" (पा० ४–१–९४) ति गोत्रप्रत्ययान्तादेव तद्विधानं । नापि गोत्रे "एकोगोत्र–" (पा० ४–१–९३) इति निषेधनात् । अपत्यसामान्ये (अनन्तरापत्ये) तु नैव स्यात्तस्या"पत्यं पौत्रप्रभृतिगोत्रमि"–(पा० ४।१।१६२) ति गोत्रसंज्ञावश्यंभावात् ॥ तत्र चैकस्य पूर्वं विधानेनापरस्य पुनर्विधातुमशक्यत्वात् ॥

२. एव गार्ग्यायणशब्दः । अनेकानि पदानि गर्ग–यञ्–कफ् इत्येतानि । अन्तर्णीयान्तः प्रवेश्य ॥

१. "समर्थः पदविधि"–(पा० २–१–१) रित्यधिकृत्य ये विधीयन्ते ते समासा इति प्रतिज्ञाविरोधात् । वस्तुतस्तु समर्थः पदविधिरित्येष नाधिकारः किंतु परिभाषापदोद्देश्यकविधित्वमेवास्य प्रवृत्तिबीजम् । तच्च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपपञ्चवृत्तिषु साक्षात्परम्परया वास्तीति सर्वेषां समर्थविषयत्वम् । तत्रैकशेषस्य द्वन्द्वापवादभूतस्य तदेशतया सह विवक्षाविषयत्वंतत्सहचरिततया पदविधित्वं चेत्यस्ति समर्थपरिभाषाविषयत्वम् । तत्र पदविधिसहचरितोऽपि पदविधिशब्दे न गृह्यत इति हि भाष्यकृदादिस्वरसः । अतएव चास्य समासमध्ये परिगणनं कथंचित्तस्य (दुर्गस्य) उपपद्यत इति बाढं प्रतीमः । यास्कस्त्वेतमर्थं नाभ्युपैतीति स्पष्टमनुपदोक्त्या ॥

२. द्विपदस्यैव समासोदाहरणस्य मूलकृताप्रदर्शनात् समासपदार्थनिर्विवक्षया "राज्ञ इत्युक्ते सर्वं स्वं गम्यते । षष्ठीसामर्थ्यात्तथा पुरुष इत्युक्ते सर्वः स्वामी गम्यते निर्देशसा-

1. केषुचित्कर्मण्यणि (पा० ३–२–१) त्यादिषु साक्षात्केषुचित्तत्सहचरितेषु पदोद्देश्यकविधिघटितप्रघट्टकघटकत्वादिरूपपरम्परया । तेनैकशेषस्यापि पदविध्यपवादत्वात्परंपरया पदविधित्वोक्तिर्न विरुध्यते ॥ अतएव च माता गच्छति पिता मुङ्क्ते इत्येवंस्थले "पितामात्रे"–(पा० १–२–७०) त्येकशेषेण पितरौ, मातापितरौ, मातरपितराविलेवं न भवति ॥ इति तत्त्वम् ॥

2. स्वत्वं हि षष्ठ्यर्थः । राजा निरूपितत्वेन, तच्चाश्रयत्वेन पुरुषेऽन्वेतीति राजनिरूपितस्वत्ववान्पुरुष इति नव्यमते वाक्यार्थः । प्राचस्तु स्वामित्वं षष्ठ्यर्थस्तत्राधेयतया राजा विशेषणं, तत्तु निरूपकतया पुरुषे । तथाच राजनिष्ठस्वामितानिरूपकः पुरुष इति वाक्यार्थमाहुः ॥

राज्ञः पुरुषो राजपुरुषः ॥ १० ॥

राजस्वामिकः पुरुषविशेषः समासार्थो न राजा नापि पुरुषमात्रम् । प्रधानोपसर्जने हि सहभूते विवक्षितमेकं कमप्यर्थं ब्रूतः । पुरुषोऽत्र प्रधानं राजा चोपसर्जनमतएव ततः "षष्ठीशेषे" (पा० २–३–५०) भवति । उपसर्जनादेव हि तेन सो विधीयते । यथाहुः—

"भेद्यभेदकयोर्यैव संबन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि संबन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ १ ॥" इति ॥

भेदकं व्यावर्तकं विशेषणमुपसर्जनमित्यनर्थान्तरम् ॥

एवमनेकपदसमासार्थमुक्त्वा पदार्थमाह—

राजा राजतेः ॥ ११ ॥

दीप्त्यर्थस्य राजृधातोः (भ्वा० उ०) "कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव" (उ० १–१५६) इति कनिन् ॥ नान्तलक्षण उपधादीर्घः (पा० ६–४–८) दीप्यते ह्यसावष्टानां लोकपालानां वपुषा । तथाच स्मृतिः "अष्टाभिर्लोकपालानां मात्राभिर्जायते नृप" इति । मात्रा अंशाः ॥

मर्थात् । अथेदानीं राजपुरुष इत्युक्ते, राजा पुरुषमन्येभ्यः स्वामिभ्यो विनिवर्त्य त्वात्मना संयुनक्ति । तावुभावप्यन्योन्यविमिश्रपदार्थकौ मिथः संसृष्टपदार्थौ समस्येते । अथेदानीं राजपुरुषमानयेत्युक्ते न राजानमानयन्ति नापि पुरुषमात्रम् । नाप्युभयम् । किंतु राजस्वामिकं पुरुषमानयन्ति । इति स एव समासार्थ" इति तेनैव (दुर्गेण) व्याख्यानाच्च ॥

१. वाक्ये ।

२. षष्ठी शेष इति सूत्रेण । सा–षष्ठी ॥

३ भिनत्ति (भेदयति) व्यावर्तयतीतरेभ्य आत्मना स्वविशेष्यमिति भेदकम् । एवं व्यावर्तयति भेदयतीति व्यावर्तकं, विशिनष्टि विशेषयति (व्यावर्तयति) विशेषणं "नन्द्यादित्वा" (पा० ३–१–१३४) ल्युः । उपसृज्यतेऽन्यत्रासावित्युपसर्जनं कर्मणि ल्युट् (पा० ३–३–११३)

४. अनेकपदसमासाः षट् तथाच संग्रहः—

"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च ।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥ १ ॥" इति ॥

तत्र "संख्यापूर्वो द्विगुः" (पा० २–१–५२) पञ्चमूली पञ्चरथीत्येवमादि । पञ्चानां मूलानां समाहार इत्यर्थे "तद्धितार्थोत्तरपदसमाहारेचे–"(पा० २–१–५१)ति समासः । "अकारान्तोत्तरपदो द्विगुस्त्रियामिष्ट" (पा० २–४–१७) इति स्त्रीत्वा "द्विगो–" (पा०४–१–२१) रिति ङीप् । एवमन्यत्राप्यूह्यम् ॥१॥ "चार्थे द्वन्द्वः" (पा० २–१–२९) स पुनर्विभाषैकवद्भवति । द्विपदो बहुपदश्चेति । तद्यथा प्लक्षन्यग्रोधौ । अहिनकुलम् ॥ भीष्मार्जुनवासुदेवा इत्येवमादि ॥२॥ उपसर्गनिपातादिपूर्वकोऽव्ययीभावः । तद्यथा उपमणिकम् । अनुसमुद्रम् । व्यभ्रमित्येवमादि ॥ ३ ॥ तुल्यविभक्तिलिङ्गयो रुभयोः पदयोः समानाधिकरणः कर्मधारयः (पा० १–२–४२) तद्यथा कृष्णमृगः । रक्ताश्वः । श्वेतपताका । इत्येवमादिषु

पुरुषः पुरिषादः ॥ १२ ॥

पूः शरीरं बुद्धिर्वा तयोरसौ विषयोपलब्ध्यर्थं सीदतीति पुरि सीदनात्पुरिषादः । स एवातिपरोक्षवृत्तितामापादितः पुरुषः ॥ यद्वा—

पुरि शयः ॥ १३ ॥

तयोरसौ शेते विशेषेणास्त इति पुरिशयः सन्पुरुष इत्युच्यते ।

पूरयतेर्वा ॥ १४ ॥

पूरयत्य-(पूरणा-)र्थकस्य पॄ धातोः (जु० प०) "पुरः कुषन्" (उ० ४-७४) इति कुषन् प्रत्यये "उदोष्ठ्यपूर्वस्ये-(पा. ७-२-१०२) त्युत्वमृकारस्य तस्य (उकारस्य) च रपरत्व"मुरण्रपर" (पा० १-१-५१) इति ॥ पूर्णमनेन पुरुषेण सर्वगतत्वाज्जगदिदमिति पुरुषः ॥

तदेतदर्थतोऽनुवदति—

पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य ॥ १५ ॥

अन्तरित्येवमन्तरपुरुषस्य ब्रह्मणोऽभिप्रायेण प्रासङ्गिकमुच्यते ॥

अत्र (वाक्यद्वयेनोक्तेऽर्थे) निगमं प्रमाणयति—

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति किंचित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ १ ॥

अनेकप्रथमान्तस्यान्यपदार्थे बहुव्रीहिः । तथाच सूत्रम् "शेषो बहुव्रीहिः" । "अनेकमन्यपदार्थे" (पा० २-२-२४) इति । शेष इत्यस्य प्रथमान्त इत्यर्थः । अनेकोक्तेर्बहूनामप्ययं भवति—तथथा प्राप्तोदको[1] ग्राम-ऊढ़रथोनड्वान्-चित्राजरतीगुरित्येवमादि । प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः । अयं तु प्रायेण[2] द्विपद एवेऽति स एव प्रसिद्धो राजपुरुष इत्यत्र दर्शितः ॥

१. तयोरित्येतत्पुरीत्येकयोक्त्यात्र सूत्रे निर्दिश्यते । उभयं व्याप्य तिष्ठतीति ॥

---

1 अत्र प्राप्तमुदकं यमिति उदकप्रधानो वाक्यार्थः । यत्कर्मैकप्राप्तिकर्म्युदकमिति । समानार्थस्तूदककर्तृकप्राप्तिकर्मग्राम इति । विशेष्यविशेषणभावव्यत्ययेऽपि तुल्यार्थतया वृत्तिविग्रहयोः समानार्थत्वमित्युपपादनीयम् । एवमुत्तरत्रापीति बोध्यम् ॥

2 तत्पुरुषभेदावेव द्विगुकर्म्मधारयाविति चतुर्धैव समास इति संख्याविदः ॥ एषां लक्षणानि भेदा-(अवान्तरविशेषा-) श्चान्यत्र द्रष्टव्याः । दिङ्मात्रमत्रोच्यते । प्रायेणान्यपदार्थप्रधानो बहुव्रीहिः । प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः । प्रायेण चोभयपदार्थप्रधानो द्वन्द्व इति ॥ तथाचाहुः । षोढा समासाः संक्षेपादष्टाविंशतिधा पुनः । नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥ तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः । सप्तधा च बहुव्रीहिर्द्विगुराभावितो द्विधा ॥ द्वन्द्वोपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः । तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधमिति ॥

3 क्वचिद् द्वे अहनी जातस्य (यस्य-स) ब्राह्मजात इति त्रिपदस्तत्पुरुषस्त्वौपसंख्यानिको न सूत्रकृदुक्तः । तथा च वार्त्तिकम् । "उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यान-" (पा० २-२-५) मिति ॥

इत्यपि निगमो भवति ॥ १६ ॥ ५ सं० ॥

अस्यार्थः । यस्मात्पुरुषात्परं परस्मादपरमधस्ताद्वा न किंचिदस्ति । यस्माच्च न किंचिदणीयोऽतिशयेनाणु "द्विवचनविभज्योपपदे तरबीयसुनौ" (पा० ५-३-५७) इति विभक्तव्ये उपपदे ईयसुनि "टे" (पा० ६-४-१५५) इति टिलोपः । नापि ज्यायोऽतिप्रशस्यं महदन्यदस्ति । अत्र "प्रशस्यस्य श्रः । ज्यके" (पा० ५-३-६१) ति ज्यादेशे "ज्यादादीयस" पा० ६-४-१६०) इत्यात्वम् (स एव सर्वमित्यभिप्रायः) यथ वृक्षइव स्तब्धो नित्यसङ्कोचविकाशधर्मा दिवि द्योतनवति स्वात्मनि सर्वविभागेन तिष्ठति तेन पुरुषेणेदं सर्वं जगत्पूर्णमिति ॥ ५ ॥

समासस्यैव द्वितीयमुदाहरणमाह—

विश्वकद्राकर्षः ॥ १ ॥

विश्वकद्रमाकर्षतीति विश्वकद्राकर्षः ॥

अत्रावयवार्थाभिर्विवक्षन्श्वन्शब्दस्य प्रसिद्धार्थत्वाद्वि-पदं-कद्रपदं च व्याख्यन्भाष्यान्तरधृतं चकद्रपदव्याख्यानपरं भाष्यमनुभाषते—

वीति चकद्र इति श्वगतौ भाष्यते ॥ २ ॥

वि-इति-चकद्र-इति-च शब्दद्वयं श्वभिः साकं गतिर्यस्य तस्मिन्मनुष्ये भाष्यते उच्यते । समासघटकतयेत्याशयः । कथम्—

द्रातीति गतिकुत्सना ॥ ३ ॥

अत्र पुनर्द्रातीति-द्रा-धातुः । "इक्दितपौ धातुनिर्देशे" (पा० ३-३-१०८ वा) इति-अनेन गतिकुत्सना कुत्सिता गतिरुच्यते इति शेषः । द्रा कुत्सायां गतौ (अ०-प०) इदं हि तस्य कुत्सितगतिलं यदस्य श्वभिः सह गतिः ॥

कद्रातीति द्रातिकुत्सना ॥ ४ ॥

इदानीं कद्रातीति द्रातिकुत्सना कुत्सितगतिकुत्सना उक्तवदर्थः । कत्पूर्वकेन द्राधातुना कुत्सितगतेरपि कुत्सना उच्यत इति ॥ अत्र "रथवदयोश्चे" (पा० ६-३-१०२) ति चकाराद्रातावपि कोः कदादेशः ॥ इदमपरं कुत्सिततरं यद्गत्वा श्वभिः सह निहन्ति तस्मात्कद्रातीति कुत्सितगतिकुत्सनेत्युपपद्यते ॥

---

१. इदं हि निघण्टुभाष्यं शाकपूण्यादिषु यास्कपूर्वतनेषु निरुक्तकारेष्वन्यतमेन केनचित्कृतं यदनुवादोऽत्र यास्केन कृतः । एतेन हि (चकद्रशब्देन) कद्रशब्दोऽपि तेन व्याख्यात एवेति कृत्वा । क्वचिद्विश्वचकद्राकर्ष इत्येवमपि संहितादिषु पाठः स्वाशयमभिप्रेत्य भाष्यान्तरीयाणां तथा व्याख्यानाभ्युद्यम इत्यप्यनेन प्रतिभाति ॥

२. गतिनिद्रायां कुत्सायां, क्वचित्कुत्सायामित्येव पाठो धात्वर्थनिर्देशे। गतिस्तु क्रियासामान्यमिति कृत्वा धात्वर्थमात्रशिष्टत्वात्तत्र विशिष्य न निर्दिष्टा स्यादिति वाढं प्रतीमः ॥ कृत्सा कुत्सनेत्युभयमनर्थान्तरं भाववचनम् ।

चकङ्गतीति कङ्गातीतिसतोऽनर्थकोऽभ्यासः ॥ ५ ॥

अथेदानीं च इत्येष कङ्गातीत्येवमेव सतः शब्दस्वरूपस्यानर्थक एवाभ्यासः । यदेवोक्तं भवति कङ्गातीति–तदेव चकङ्गातीति ॥

तदस्त्यस्तीति विश्वकङ्गः ॥ ६ ॥

तदस्मिन्द्वितयमप्यस्ति । कुगतित्वं कुत्सिततरगतित्वं च । तथाच कङ्गाणं कङ्गा भिदादित्वात् (पा० ३–३–१०४) अङ् । टाप् ॥ श्वभिः सह कङ्गा श्वकङ्गा विविधाः श्वकङ्गा यस्य स विश्वकङ्गः । श्वजीवनः पुरुषः । यद्वा श्वैव विश्वकङ्गः । शुनां हि कङ्गाः श्वकङ्गाः विविधाः श्वकङ्गा यस्येत्येवम् । यावद्विधाः शुनां कुत्सिततरा गतयस्ताः सर्वा अप्यस्य सन्तीति भवति श्वैव विश्वकङ्गः । तं कस्मिंश्चिदपराधे वर्तमानं श्वजीवनं, पादादिविकलं मृगयानुगतं श्वानं वा यः कश्चनाकर्षति स विश्वकङ्गाकर्षी इत्युच्यते ॥

अधुना रूपसमासं दर्शयति—

कल्याणवर्णरूपः । कल्याणवर्णस्येवास्य रूपम् ॥ ७ ॥

कल्याणवर्णं सुवर्णं तस्येव रूपं यस्यासौ कल्याणवर्णरूपः । अग्निरन्यो वा कश्चित् ॥

कल्याणादिशब्दान्विप्रहप्रसक्तान्निर्ब्रवीति—

कल्याणं कमनीयं भवति ॥ ८ ॥

सर्वैः कमनीयं प्रार्थनीयं भवतीति कल्याणं, कामयतेः कर्मणि लट् "आयादय" (पा० ३–१–३१) इति णिङभावे "सार्वधातुके यगि"–(पा० ३–१–६७) ति यक् आगमशास्त्रमनित्य (प० पा० ९४) मिति आनेमुगि (पा० ७–२–८२) ति मुम् । मकारस्य लत्वं नस्य णत्वं च पृषोदरादित्वात् ॥

वर्णो वृणोतेः ॥ ९ ॥

आवृणोत्याश्रयमिति वर्णः । आङ्पूर्वाद्वृधातोः (स्वा० उ०) बाहुलका–(पा० ३–३–१) दौणादिको नन् गुणो रपरत्वम् ॥ बाहुलकादेवोपसर्गलोपोऽपि ॥

रूपं रोचतेः ॥ १० ॥

तद्धि रोचते दीप्यते इति रूपम् । रुचदीप्तावित्यस्य (भ्वा० आ०) बाहुलकादौणादिके कर्मणिपनि चस्योत्वं पृषोदरादित्वात् ॥ अथोपसंहरति—

एवं तद्धितसमासान्निर्ब्रूयात् ॥ ११ ॥

एवमनेन प्रकारेण तद्धितांश्च समासांश्चैकपदिकाननेकपदिकांश्च निर्धार्य व्याकरणादिलक्षणैरर्थैश्चापि समीक्ष्य ब्रूयान्निर्वचनलक्षणेन नैरुक्त इति वाक्यशेषः ॥

---

१. रूपशब्दघटितेष्वेवंविधवाक्येषु समासप्रकारं दर्शयतीत्यर्थः । अयं भावः । "कल्याणवर्णरूप" इत्यादिषु वर्णरूपयोः समानार्थयोः सहोपादाने कल्याणशब्दो न सुवर्णवचनः किन्तु कमनीयमात्रवचनस्तथाच कल्याणः कमनीयो वर्णोऽस्येति कल्याणवर्णं सुवर्णम् ।

तदेवं तद्धितसमास–नाम–निर्वचनलक्षणमुक्त्वा निर्वक्तव्यार्थे संप्रदानपरिरक्षणायाभ्युदयार्थं च किंचिद्विशेषमाह—

नैकपदानि निर्ब्रूयात् ॥ १२ ॥

यान्येकपदानि जहादीनि नैगमकाण्डे वक्ष्यमाणानि तत्सदृक्षाण्यन्यानि वा प्रकरणोपपदविरहितानि सन्ति, तानि केवलान्येव परेणाभिद्रोहबुद्ध्या पृच्छ्यमानानि प्रकरणादिकमनभिज्ञायैव न निर्ब्रूयान्न निर्वक्तव्यानि । तेषां ह्यनवगतसंस्काराणामेकपदानां प्रकरणादर्थावधारणमुपपदाद्वा भवति नान्यथा । अन्यथा तु ब्रुवाणः प्रत्य-

---

तस्येव रूपं यस्येति बहुव्रीहौ इवपदलोपो वाचनिको वार्त्तिककृदुक्तः "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च (२–२–२४ वा.)" इति । महाभाष्यकृच्चिन्तत्र (इवार्थगर्भबहुव्रीहौ) पूर्वपदं स्वसम्बन्ध्युत्तरपदार्थसदृशे लाक्षणिकमिति कृत्वा बहुव्रीहिर्दर्शितः । उष्ट्रः मुखं यस्येत्येवम् । तथेहापि कल्याणवर्णः रूपमस्येत्येव विग्रहः । अर्थस्तु कल्याणवर्णशब्दस्य कल्याणवर्णसम्बन्धिरूपसदृशमिति–लक्षणाबलात् ॥ इयमेवदिगन्यत्रापीति ॥

१ पदान्तरासमभिव्याहृतानि ॥

२. विद्याप्रकर्षजिज्ञासया । नतु स्वबोधाय ।

३. सहसा । आत्मनो विद्याप्रकर्षविचिख्यापयिषया ॥

४. यथाच वक्ष्यते (नैग० का० ४–१–१) तत्र जहा इत्यादिकं यत् (नै० घ० का० ४–१) उक्तं । तस्य निर्वचनाभ्युपायश्चिन्त्यतेऽनवगतसंस्कारे हि तस्मिन् (जहादौ) न ज्ञायते प्रकरणोपपदमन्तरा कतमस्य धातोरयं, किं हन्तेः (अ० प०) उत–ओहाक् त्यागे (जु० प०) इत्यस्य धातोः स्यात् ? इति । यथाच निगमः । कोनु मर्या अमिथितः सखा सखायमब्रवीत् जहाको अस्मदीषते ॥ (ऋ० स० ६–३–४९–२) त्रिशोकस्य काण्वस्येयमार्षी गायत्री । अस्यामृचि जहेत्यस्य शब्दस्य पूर्वोत्तरपदाविरोधप्रकरणशब्दसारूप्यार्थोपस्थितिभिः संस्कारानवगमेऽपि सति हन्तेरेवाविशेषणार्थोऽवतिष्ठते न जहातेः प्रकरणोपपदबलात् । तथाच निगमः । मान एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु ॥ (ऋ० स० ६–३–४८–४) हे शूर इन्द्र ! नोऽस्मानेकस्मिन्नागस्यपराधे । "आगोऽपराधो मन्तुस्त्वि" त्यमरः । मा वधीर्माहिंसीः । द्वयोरागसोरपि मा वधीरुतापिच त्रिष्वागस्स्वपि मावधीर्भूरिष्वसंख्यातेष्वप्यागस्सु मावधीः ॥ एतस्मिन्प्रकरणे ब्रवीति–कोन्विति–हे मर्या मनुष्याः । युष्मानेव तावत्पृच्छामि । को नु कः खलु अमिथितोऽनाकृष्टः परुषमपि वा कश्चिदनुक्तः सखा समानख्यानः सखायं समानख्यानमेव सन्तम् (यथाभवतामहं यज्ञेऽत्र समानख्यानः । एवं सन्तम् अब्रवीत्) । ब्रूयाधथा यूयमनाहताः सन्तो मां ब्रूत मा वधीरिति । "जहाकोऽस्मदीषंत" अत्र यास्कः "मेथतिराक्रोशकर्मा–पापकं जघान कमहं जातु,–कोऽस्मद्गीतः पलायत" इत्याह व्याख्यन् । अत्रापापकशब्द उपपदभूतो(जहाशब्दात्प्राग)ध्याहृतो

---

1 जहाशब्दः ॥

यायै न योक्ष्यते । तथाच श्रूयते—'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति याऽध्यापयति वा स्थाणुमृच्छति गर्तं वा पद्यते प्रपद्यते पापीयान्भवति यातयामान्यस्य छन्दांसि भवन्ति' इति ॥ तदेवंनिर्वचनलक्षणान्तमभिदधता मुनिना (यास्केन) सपरिकरं विषयप्रयोजने प्रतिपादिते । संप्रति यस्मै निर्वक्तव्योऽयमुक्तनिर्वचनलक्षणः समाम्नायस्तमधिकारिणमनुबन्धेष्वशिष्टं लक्षयति—

नावैयाकरणाय नानुपसन्नाय नानिदंविदे वा ॥ १३ ॥

निर्ब्रूयादित्यनुवर्तते ॥ वैयाकरणो हि लक्षणज्ञो भवति । यः पुनरलक्षणज्ञस्तस्मै

भाष्यकारेण (यास्केन) जह्राशब्दस्यार्थद्योतनार्थोऽर्थसंगत्यर्थश्च कमहं जात्विति च । तथाच—अपापकमनपकारिणं सन्तं कमहं जातु कदाचिदपि जह्रा—'जघान (प्रमार्दतो विक्षिप्तचित्तोऽपि सन्) इति इन्द्रस्तान् (मा वधीरिति वदतः) प्राह । न कदाचिदपि कश्चिदपापको मया हतपूर्वः । पापकं (पापकारिणं) तु हन्मीत्यभिप्रायः । ते यूयमपापका एवाजस्रं भूयास्थ न वो हनिष्यामि । यत्पुनरेतदुक्तं भवद्भिर्भूरिष्वप्यागस्सु 'मात्मान्वधीरिति । कथमागस्कारी न हन्येत । एवं सति सर्वमसमञ्जसं स्यात् । किमेष ह्वा पुरोडाशमवलिहल्लुडेन न हन्येत ॥ अथ चेदेवं ब्रूथ—मनुष्यानपापानपि हंस्येव त्वमिति । अत्र ब्रूमः "कोऽस्मदीषते" इति । कोऽपापकारी अस्मत् अस्मत्तः (भीतः सन्) ईषते पलायते । न कश्चिदप्यपापकारी मत्त उद्विजमानः पलायते । सहि शुद्धेन चेतसाऽभिमुख एव मामभ्येति । य एव तु पापकारी भवति स एवात्मापराधशङ्कितया बुद्ध्याऽस्मत्तो भीतः सन्पलायते इत्यभिप्रायः ॥ अत्रास्मदिति पञ्चमीबलादीषते—(श्वा० आ०) गतिसामान्यवाचिनोऽपि पलायनेऽवस्थानम् । यो हि यस्माद्बिभेति स तस्मात्पलायते इति भीतशब्दोऽध्याहृतो भाष्यकारेण । न ह्यभीतः पलायते । इत्येष समस्तप्रकरणस्यार्थः ॥

१. न विदितानि आर्षेयच्छन्दोदैवतब्राह्मणानि यस्य तथाभूतेन मन्त्रेणेत्येवमर्थकेनानेन निगमवचनेनार्थज्ञानापेक्षदेवतादिज्ञानस्यैव याजनाद्युपयोगेन पुरुषार्थसाधनत्वमुच्यते । अज्ञानस्य तु प्रत्यवायसाधनत्वम् ॥

२. विषयप्रयोजनसंबन्धाधिकारिलक्षणाश्चतुर्विधा अनुबन्धा ये पूर्वमुपक्रान्तास्तेषु यथाप्रतिज्ञातंतुरीयांसमनुबन्धमनेनोपोद्घातान्तसंदर्भेणोच्यते ॥ एतल्लक्षणादिकमुक्तमधस्तात् ॥ (२पृ.१३पं)

३. व्याक्रियन्ते धातुप्रत्ययादिप्रविभागेण व्युत्पाद्यन्ते—शब्दा अनेनेति व्याकरणं व्याङ्पूर्वात्करोतेः "करणाधिकरणयोश्च" (पा० ३—३—११७) ति ल्युट् । व्याकरणं वेदेति वैयाकरणः । "तदधीते तद्वेद—" (पा० ४—२—५९)ति वेदित्रर्थेऽण् । "नञ्वा-

---

1 निराकाङ्क्षीकरणार्थं जह्राशब्दस्याधस्ताच्चोपरिष्टाच्च "अपापकं" "कम्" "अहं" "जातु" इति सर्वमेतत्पदचतुष्टयमध्याहृतं भाष्यकारेणेत्यर्थः ॥

2 अतएवोत्तमपुरुषे लिङुपपद्यतेऽन्यथा स्वक्रियायां पारोक्ष्यं दुरुपपादम् । तथाचोक्तं (सि० कौ०) उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम् । इति । "मुमोऽहं किल विलपाये"ति । "बहुजगद पुरस्तात्तस्य मत्ता किलाहमि"ति चोदाहृतम् ॥

अवैयाकरणाय न निर्ब्रूयाद्यतो ह्यसौ व्युत्पाद्य निरुच्यमानमेतन्नावबुध्येत । ततश्च व्यर्थ एव श्रमः स्यात् । तथा चैतन्निषेधति मनुः । 'विद्यैव समं कामं मर्तव्यं ब्रह्मवादिना । आपद्यपि च घोरायां न चैनामिरिणे वपेत्' इति ॥ इरिणं शून्यमूषरमित्यमरः । यथा तत्रोप्तं बीजं नोत्पद्यत इति नोप्यते तथैतस्मिन्नधिकारिणि विद्यापि नो देयेति तद्भावः ॥ तस्मा अप्यनुपसन्नाय परां. शिष्यवृत्तिमनास्थिताय न किंत्वास्थितायैवेत्येवं व्यतिरेकमुखेनाधिकारिलक्षणकथनं नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वेन तन्निश्चयनाय । एवं हि धर्मो न हीयते ॥ तथाभूतायाप्यनिदंविदे–इदं निरुक्तशास्त्रं वेत्ति–(वेदितुंशक्नोति) ति–इदंवित् स न भवतीत्यनिदंवित्तस्मै इदं वेदितुमसमर्थायैव न किन्तु समर्थायैव निर्ब्रूयादित्यर्थः ॥ अत्र हेतुमाह—

नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया ॥ १४ ॥

यो हि न विजानाति (नावबुध्यते) तस्याविज्ञातुर्विज्ञाने नित्यम् (नित्यकालमेव) नियमेनासूया गुणेषु दोषाविष्करणमुपजायते ॥ स हि अनवबुध्यमान आत्मीयं दोषमाचार्य एवावसृजति स्वयमेव तावदयं न बुध्यते किमस्मान्बोधयिष्यतीति ॥ एतस्मात्कारणादश्रुतपूर्वान्यशास्त्रायाखिन्नमनसे नेदं निर्ब्रूयादिति पुष्कलम् ॥

एवमधिकारिपरिज्ञानायानधिकारिणमुक्त्वा संप्रत्यधिकारिणमाह—

उपसन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा ॥ १५ ॥ ६ खं. ॥

भ्यामि–(पा० ७–३–३) ति यात्पूर्वमैजागमः ॥ सहि लक्षणानि पाणिन्यष्टकादीनि जानातीति लक्षणज्ञः ॥

*१. "आकेस्तच्छीले–"(पा० ३–२–१३४) त्युक्ते"रन्येभ्योऽपि दृश्यते"–(पा० ३–२–७५) इति ताच्छील्ये किप् ॥ विशिष्टे कर्त्तरि लटमाह वेदितुं शक्नोतीति ॥

२ अथवा इदमित्थमेन यत्किञ्चिच्छास्त्रं निर्दिश्यते । येन चान्यत्किमपि शास्त्रं नाधिगतं तस्मा अनिदंविदेऽनास्फालितहृदयकुड्मलायेदं निरुक्तशास्त्रं न निर्ब्रूयात् । इदंविदे तु निर्ब्रूयात् । यो हि शास्त्रान्तरविद्भवति स विशातसमुपसत्तिको विशदान्तष्करणः सुखं ग्राहयितुं शक्त इति तस्मै निर्ब्रूयादिति पर्यवसितोऽर्थः । अथवा इदमित्यात्मपर्यायोऽपि संभवति–सन्निकृष्टत्वात्सर्वस्य ह्यात्मा सन्निकृष्टएव भवति । इदमश्चं सन्निकृष्टे शंक्तिरितीदंविद आत्मविदे योगिने । सद्यात्मज्ञानंविधूतकल्मषोऽल्पेनैव यत्नेन बोद्धुं सूक्ष्मानर्थान्छक्त इति तस्मा इदन्निर्ब्रूयादित्यर्थः संभवति ॥

३. आरोपयति ॥

---

1. यद्यपि सततकरणं ताच्छील्यं तथापि शक्तिमन्तरा सततकरणं नोपपद्यत इति शक्तिरत्राभिहिता ॥

2 यथाहुः—

"इदमस्तु सन्निकृष्टे समीपतरवर्त्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ॥ १ ॥" इति ॥

जन्मान्तरानुभावितप्रज्ञावान्मेधावी ग्रहणधारणपटुरुत्पन्नो प्रशस्ततपाः । प्रशंसाया "मत्वर्थाभ्यामेधास्रजोर्विनि–(पा० ५–२–१२१) रिति" विनिप्रत्ययेन । तस्मै । यो वाऽन्यः कश्चिदिदं विज्ञातुमलं पर्याप्तस्तस्मै दृढग्राहिणे (स्थिरबुद्धये) अवैयाकरणायापि निर्ब्रूयादेवं परमुपसन्नाय अनुपसन्नाय तु तपस्विनेऽपि मेधाविनेऽपि दृढग्राहिणेऽपि वा नैव निर्ब्रूयात् । उक्तं च मनुना 'यश्चान्यायेन निर्ब्रूयाद्यश्चान्यायेन पृच्छति । तयोरन्यतरो मृत्युं विद्वेषं वाधिगच्छति ॥' इति ॥ ६ ॥

अथाप्येतमर्थमधिकृत्योदाहरन्ति—

विद्या ह वै ब्राह्मणमाजगाम ॥ १ ॥

विद्या वागधिष्ठात्री देवता । ह इति पुरातीते पादपूरणे वा । वै इति निश्चये । सा किल कामरूपिणी भूत्वा ब्राह्मणं संयतात्मानं विदितवेदाङ्गवेदार्थं कंचनोपाध्यायं विप्रं प्रति आजगाम । आगत्य च प्रह्वीभूतोवाच—

गोपाय माम् ॥ २ ॥

मां गोपाय रक्ष । गुपूं रक्षणे (भ्वा. प.) 'गुपूधूपविच्छिपणिपनिभ्यआय' (पा० ३–१–२८) इत्यायन्तस्य 'सनाद्यन्ता' (पा० ३–१–३२) इति धातुत्वाल्लोट् । का त्वमसीति पृष्टे वाह—

शेवधिष्टेऽहमस्मि ॥ ३ ॥

ते तवाहं शेवधिर्निधिरस्मि "निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधे"रित्य-

---

१. तत्र हि—

"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥ १ ॥" इत्युक्तम् ॥

प्रशस्ततपसा मेधाविना वा स्वयमपि वेदार्थोऽभ्यूहितुं शक्यते किमुतोच्यमानोऽवबोद्धुम् ॥

२. अतएव पूर्वस्माद्भेदार्थकस्तुशब्द उपन्यस्तो मुनिना ॥

३. यद्यपि समुपलभ्यमानमनुस्मृतिपुस्तकेऽन्यथापाठ उपलभ्यते–यथा—

"अन्यायेन च यः प्राह यश्चान्यायेन पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥ १ ॥" इति

तथाप्यर्थतस्तौल्याद्दुर्गेण यथानिर्दिष्टमिहोपनिबद्धं तदनुसारित्वादस्या लघुविवृतेः ॥

४. तथाभूतायैव हि गोपनोपदेशः फलिष्यतीति । तथाभूत एव ब्राह्मणाद्ब्राह्मण्यामुत्पादितः कृतसंस्कारः प्रशस्ततरो मुख्यो ब्राह्मणपदार्थः । अन्यस्तु जात्यैव ब्राह्मणः न कर्मणा नापि श्रुतेन । तथा चोक्तंमहाभाष्ये पतञ्जलिना–"तपः श्रुतं च योनिश्चेत्येतद्ब्राह्मणकारणम् । तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥" इति ॥ ब्राह्मणकारणं मुख्यब्राह्मणत्वव्यपदेशकारणम् ॥

५. विनीतासती वरार्थैर्नीयेति भावः ।

मरः । यथा निधिर्धनिना चिरादपि यथारुचि गृह्यमाणो नापक्षीयते किंत्वविरतं परिपूर्णरूपएव प्रस्फुरति । एवमहं विदुषा शश्वत्प्रदत्ताऽपि नापक्षतिमाचामि किंतु वर्धीम्येवेति वाग्देवी अहमस्मीति निगूढाभिसंधिरेवमाह ॥

कुतः पुनस्त्वां रक्षामीति पृष्टेवाह—

असूयकायानृजवेऽयतायं न मा ब्रूयाः ॥ ४ ॥

खम् असूयकाय गुणेषु दोषाविष्कारिणे परापवादशीलाय वा अनृजवे कुटिलवृत्तये (शठायै) यस्य वा मनोवाग्देहेष्वसमाः प्रवृत्तयस्तस्मै । अयतायासंयतेन्द्रियाय (विप्रकीर्णेन्द्रियाय) यत्किंचन कायाशुचये वा मा—मां न ब्रूयाः मा वद ॥

किं तथाकृते भविष्यति ?

वीर्यवती तथा स्याम् ॥ १ ॥ ५ ॥

तथा सत्यहं ते वीर्यवती—निग्रहानुग्रहसामर्थ्यभूता स्यां भवेयम् ॥ यस्मै त्वमनुग्रहीष्यसि तस्मै प्रभविष्यामि, यस्य वा निग्रहीष्यसि तं पराभविष्यामि । ततः पराग्भविष्यामि वा ॥

अधुना शिष्यमुपदिशति—

य आतृणत्त्यवितथेन कर्णावदुःखंकुर्वन्नमृतं संप्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्च नाह ॥ २ ॥६॥

यो गुरुस्ते कर्णावपिहिताविव सन्तावातृणत्ति आभिनत्ति (विवृणोति) उत्तृदिर् हिंसानादरयोः (रु० उ०) 'रुधादिभ्यः श्नम्' (पा० ३-१-७८) । केन ? अवितथेन सत्येन ब्रह्मणा वाचा । कथंपुनरातृणत्ति—अदुःखं दुःखाभावं कुर्वन् । अन्यो हि यः कश्चन कर्णावन्यद्वाऽऽतृणत्ति स दुःखयति । अयं तु न तथा । किंत्वमृतममृतत्व—(मोक्ष—) प्राप्तिहेतुज्ञानं संप्रयच्छन् ददत् । हेतावत्रोभयत्र शता । तं मन्येत पितरं मातरं च नेतरौ मातापितरौ स्तः (तथा समुद्धर्तुं भवन्तं प्रभवतः) उक्तं च—

उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ।
ब्रह्मजन्म च विप्रस्य प्रेत्य चेह च शाश्वतम् ॥ १ ॥ (म० सं० २-१४६)

इति । अतस्तस्मै मातापितृभूताय गुरवे कतमच्चनाह कदाचिदपि (कष्टा यामप्यापदि) (अहेति खेदे) न द्रुह्येत् अपकुर्यात् । 'क्रुधद्रुहेर्ष्यासूयार्थानां यंप्रति कोपः' (पा० १-४-३७) इति चतुर्थी ॥

---

१. दुर्गस्तु "गोपाय मा" रक्ष माम् ततस्तेऽहं गुप्ता सती ते शेवधिः सुखनिधानं भविष्यामीत्यर्थमाह । अघ्न्यासीति वर्तमानसामीप्ये लङुक्तिः सद्यो भविष्यामीत्येतमर्थमवयामवतीति तद्भावः ॥

२. "निकृतस्त्वनृजुः शठ" इत्यमरः ॥

३. दुःखप्रतिघातकमिहामुत्र सुखं वा ।

अधुनेतरान्दुष्टशिष्यानभिप्रपन्तीदमाह—(विद्या)

अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतन्तत् ॥ ३ ॥ ७ ॥

ये विप्रा मेधाविनो द्विजन्मानोऽध्यापिताः सन्तो गृहीतविद्या वाचा प्रियवचनेन मनसा शुभानुध्यानेन कर्मणा परिचरणेन गुरुं गुप्तं वेदरहस्यं रुवन्तमुपदेष्टारं निजमध्यापकं नाद्रियन्ते गुरुंप्रति नादरं कुर्वन्ति । किं तेषामित्युच्यते—यथैव ते शिष्यास्तस्य गुरोर्न भोजनीया न भोजनार्हाः । न भोगदायिनः । तथैव तान् शिष्यान् तत् गुरूपदिष्टं श्रुतं वेदशास्त्रादिकमपि न भुनक्ति न पालयति । श्रुतफलेन न संयुनक्तीत्यर्थः ॥

अधुना यस्मै वक्तव्या तस्य लक्षणमाह—

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥४॥इति॥८॥

हे ब्रह्मन् यमेव शुचिं सदाचारसंपन्नमप्रमत्तमवहितं यमनियमेषु[2] । मेधाविनं मेधावन्तं (ग्रहणधारणसमर्थं[3]) ब्रह्मचर्येणोपपन्नं विद्या जानीयाः । किंच यस्ते तुभ्यं कतमच्चनाह कदाचिदपि (सर्वास्वप्यापत्सु) न द्रुह्येत् न द्रोहमुपगच्छेत् तस्मै निधिपाय निधिवद्रोप्त्रे मां त्वं ब्रूयाः वदेः । विधौ लिङ् ॥ इतिशब्द उक्तिसमाप्त्यर्थः उक्तिस्वरूपपरामर्शार्थको वा ॥

निधिशब्दार्थमाह—

निधिः शेवधिरिति ॥ ९ ॥ ७ ॥

अयमितिशब्द उपोद्घातप्रकरणसमाप्त्यर्थः ॥ इति श्रीमद्यास्कमुनिप्रणीतनिरुक्तशास्त्रे द्वितीयाध्यायस्य प्रथमः पादः ॥ ❀ ॥

इति श्रीमद्यास्कमुनिप्रणीतनिरुक्तलघुविवृतौ नैघण्टुककाण्डे द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥

॥ समाप्ता चेयं सप्तपदिका यास्कनिरुक्तलघुविवृतिः ॥

श्रीमन्मुकुन्दशर्म्माऽवदातकर्म्माम्बिकापदाऽऽसेवी ।
करमाहावंशाम्बुधिचन्द्रः प्राणेष्टसद्विवृतिम् ॥ १ ॥

---

१. अत्र "निधिपायब्रह्मन्नि"त्यस्याभ्यासोलिखितपुस्तके दृष्टः

२. यमाश्च पतञ्जलिना योगसूत्रे उक्ताः । "अहिंसा सत्यास्तेयापरिग्रहा यमा" इति । नियमाश्च "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा" इति । एषां लक्षणानि ततएव द्रष्टव्यानि ॥

३. "धीर्धारणावती मेधा" इत्यमरः ॥

अथोपोद्घातप्रकरणशेषस्य-
शाखान्तरगतमन्त्रचतुष्टयस्य सायणोक्तव्याख्यानमुच्यते ॥

१ विद्याभिमानिनीदेवता ब्राह्मणमुपदेष्टारमाचार्यमागत्यैवं प्रार्थयामास, हे ब्राह्मण ! मामनधिकारिणेऽनुपदिश्य पालय । तवाहं निधिवत्पुरुषार्थहेतुरस्मि । तादृश्यां मयि—मदुपदेष्टरि त्वयि च योऽसूयां करोति, यश्चार्जवेन विद्यां नाभ्यस्यति, योऽपि स्नानाचमनाद्याचारनियतो न भवति तादृशेभ्यः शिष्याभासेभ्यो मां न ब्रूयाः । तथासति लद्धृदये स्थित्वा फलप्रदा भवेयम् ॥

२ पूर्वस्मिन्मन्त्रे आचार्यस्य नियममभिधायास्मिन्मन्त्रे शिष्यस्य नियमोऽभिधीयते वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यं तद्विपरीतं सत्यं वेदवाक्यमवितथम् । तादृशेन वाक्येन य आचार्यः शिष्यस्य कर्णावातृणत्ति सर्वतस्तर्दनंपूरणं करोति, उपसर्गवशादौचित्याच्च तृणत्ति धातोरर्थान्तरे वृत्तिः, सर्वदा वेदं यः श्रावयतीत्यर्थः । किंकुर्वन् । अदुःखं कुर्वन् मन्दप्रज्ञस्य माणवकस्यादावर्धर्चमृचं वा ग्रहीतुमशक्तस्य यथा दुःखं न भवति तथा पादं पादैकदेशं वा ग्राहयन् । किंच अमृतं संप्रयच्छन् अमृतत्वस्य देवत्वजन्मनो मोक्षस्य वा प्रापकत्वात् अमृतं वेदार्थरूपस्य दानं कुर्वन् तं तादृशमाचार्यं सच्छिष्यो मुख्यं मातापितृरूपं मन्येत पूर्वसिद्धौ तु मातापितरौ अधमस्य मनुष्यशरीरस्य प्रदानादमुख्यौ । तस्मै मुख्यमातापितृरूपायाचार्यायैकमपि द्रोहं न कुर्यात् ॥

३ ये त्वधमा विप्रा गुरुणाऽध्यापिताः सन्तो विनयोक्त्या तदीयहितचिन्तनेन शुश्रूषया वा गुरुं नाद्रियन्ते आदररहितास्ते शिष्याभासा गुरोर्न भोजनीया अनुभवयोग्या न भवन्ति । नहि तेषु गुरुः कृपां करोति । यथैव ते गुरुणा न पालनीयास्तथैव तानधमान् शिष्यान् तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न पालयति फलप्रदं न भवतीत्यर्थः ॥

४ हे आचार्य ! यमेव मुख्यशिष्यं शुचित्वादिगुणोपेतं जानीयाः । किंच यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत्तस्मै तु मुख्यशिष्याय त्वदीयनिधिपालकाय हे ब्रह्मन् वेदरूपां मां विद्यां ब्रूयाः । इत्थं विद्यादेवतया प्रार्थितत्वादाचार्येण मुख्यशिष्याय वेदविद्योपदेष्टव्या ॥ इति ऋग्भाष्यभूमिकायाम् ॥

१. पुराणादिभिश्चानुदेशविधास्यानैरुपबृंहिताया विद्याया ग्रहणेऽधिकारिविशेषमतिपादकत्वेत्यादिः ॥

निरुक्त(लघु)विवृतिशुद्धिपत्रम् ।

अशुद्धम्	पृ.	पं.	शुद्धम्
ऽपक्षीयते वर्द्धते	१७	३	वर्द्धते ऽपक्षीयते
५ ॥ ३ ॥	१८	३	८ ॥
९	१८	९	९ ॥ ३ ॥
१६ ॥	२३	९	१६ ॥ ५ ॥
यस्या	२८	२०	अथयस्या
प्रकर्षे	३३	१	प्रकर्षे एवंकिलेति
रूप्य	३४	१६	रुप्य
मघहति	३८	८	मघमिति
नतिहाय	४०	१३	नति
र्यातः	४३	१४	र्यादातः
यन्तं	४४	२४	यत्रं
हृदतेः	५२	१९	ह्रादतेः
गौरश्वः	५९	१०	यथा गौरश्वः
नश्च	७०	२७	नश्च
नया	७३	१४	नाया
जुः सामाभि	७४	२३	जुर्वाभि
२२ ॥	७४	२३	२२ ॥ १ ॥
णे न	७५	२३	णेन
यते	७६	७–१७	येत
लोकेऽप्ये	७६	१९	लौकिकेष्वप्ये
णोइनमि	७६	१९	णोऽनमि
( )	८०	३१	(२१ पृ० २४ पं०)
ज्ञावयमत्र	८३	१४	ज्ञा अत्र
ल्यादौ	८३	१९	रितिहिः, तादौ
र्यर्चन्ति	८४	२१	भ्यर्चन्ति
अथैकः	८७	२७	अप्येकः

	पृ०	पं०	पृ० पं०
अथै	८८	६	अन्ये
प्रवान्ति	९१	१६	प्रवन्ति
तन्व	९७	२१	वन्त
इपि	९९	१५	इति
मेघस्था	९९	२३	रिगिस्था
दय	१०५	९	व्य
( )	१०५	२९	(४८ पृ० ३२ पं०)
स्थचा	११०	८	स्था
निष्प	१११	१५	सम्प
निष्पद्यते संप-	१११	१७	संप-
रणम्	११३	१९	रणः
कद्रा	११८	१०	कद्रा
कद्र	११९	२४	कद्र